श्यादितयाज्ययासंधाय यजतीत्यर्थः॥ सर्वा आनुवाक्यावत्यो प्रैषा अन्या अन्वाया
त्याभ्यः॥ या अन्वायातशब्देनानुनिर्वपतिशब्देन वा चोदिताः ता अन्वायात्याः ताभ्योऽन्याया
देवता अनुवाक्यावत्यः प्रैषाश्च ताः सर्वा आदिश्य यष्टव्याः। अन्वायात्यानामनुवाक्या राम
रहितानां च संप्रैषाणां चादेशो न कर्तव्य इत्यर्थः। सर्वग्रहणमाज्यभागयोरपि संप्रैष १९

योरादेशनिवृत्त्यर्थं॥ सौमिकीभ्यश्च याज्यांतरे पात्नीवतं वैश्वानरीयं पत्नीसंयाजांश्च॥ सौमि
क्यः कीभ्यः सोमेज्यादेवताभ्यः न सोमे प्रयोज्याः अपितु तत्रोत्पन्नानामेव तत्र भवति संभवात् वैश्वा
नरीयपत्नीसंयाजानां तत्र चोदितानामेव ग्रहणं युक्तं। अत एव तस्मिन्नेवासने वैश्वान
रीयस्य यजतीत्येतदेव गृह्यते पत्नीसंयाजेष्वरित्वा चन्द्रार्थं व्रजंतीति। एतदेव च। अन्या
इत्यनुवर्त्तते अंगप्रधानरूपे सोमकर्मणि यौ तौ वैश्वानरीयपत्नीसंयाजशब्दचोदितौ पदा
र्थौ तयोर्मध्ये यास्तत्रैवोत्पन्ना देवतास्ताभ्योऽप्यन्या देवता आदिश्य यष्टव्याः॥ न ता आदिश्य य
ष्टव्या इत्यर्थः॥ एतौ वार्त्रघ्नौ पौर्णमास्यां॥ यावेतौ पौर्णमास्यामाज्यभागौ तौ वार्त्रघ्नसंज्ञौ
भवत इत्यर्थः। सनिमित्ते यं संज्ञेत्याह॥ अनुवाक्यालिंगविशेषान्नामधेयान्यत्वं। ततो
विचारः॥ अनुवाक्यात एवं विचारे विमार्गोन्यत्वमित्यर्थः॥ नित्ये याज्ये॥ उक्ते एवेमे सर्वत्र याज्या
ना ज्यौ अनुवाक्यावदेतयोरन्यत्वमित्यर्थः॥ वृधन्वंतावमावास्यायां॥ अग्निः प्रत्नेन मन्मना
सोमगीर्भिष्ट्वा वयमिति॥ आतो वाग्यमनं॥ आदित आरभ्याज्यभागपर्यंतं वाग्यमनं भव

ति॥ अनन्तरायं याज्यानुवाक्ये॥ निगदानुवचनानि शिष्टवचनशास्त्रे तदानीमारम्भसमाप्तेः॥ अ
त्रानिष्टवचनसंस्तवनशास्त्रेति संस्तवनशब्दः पठितव्यः। आरम्भेति वचनमन्यदपि यत्तया
ज्यादिन्या स्तदारम्भासमाप्तेर्वाग्यमनसिध्यर्थं होतुरधिकारात्कर्त्तिरस्यापि प्रापणार्थं चेति॥
अन्यद्यज्ञसाधनात्॥ यज्ञसाधनवचसोऽन्यत्र वाग्यमनं नियम्यते। यज्ञसाधनवचो नाम यद्य
ज्ञसंपादनार्थं तद्द्वेषपरिहारार्थं च॥ आपद्यातो तोदं अवदनुं इति जपेत्॥ आपद्येति नियमम
तिक्रम्येत्यर्थः॥ अपि वान्यां वैष्णवीं॥ अन्यामपीति वचनं पूर्वोक्तायाअपि वैष्णवीत्वप्रतिपत्त्यर्थं॥
॥५॥ उक्तादेवतास्तासां याज्यानुवाक्या अग्निर्मूर्धा भुवो यज्ञस्य अयमग्निः सहस्त्रिणइ
ति वेदं विष्णुर्विचक्रमे त्रिर्देवः पृथिवीमेष एतामग्नीषोमा सवेदसा भुवमेतानि दिवि
रोचनानानी द्वाग्नी अवसागतं गीर्भिर्विप्रः प्रमतिमिच्छमानः ऐन्द्रसानसिं रयिं प्रससा
हिषे पुरुहूत शत्रून्महाँ इन्द्रो य ओजसा भुवस्त्वमिन्द्र ब्रह्मणा महानिति यद्यग्नीषोमी राम २०
यपुरोडाशोऽग्नीषोमौ योऽद्य वामान्यो देवो मातरिश्वा जोनारेति॥ उक्तसंकीर्त्तनं देव

ताविधिक्रमस्मरणार्थं तासां याज्यानुवाक्या वक्ष्यमाणा लिंगक्रमाभ्यां योजनीया इति इदमपि उक्तसं
प्र २ कीर्त्तनस्यैव योजनं। यत्र देवताविधानानन्तरमृचो विधीयंते। तत्र तासां देवतानां ता एव याज्यानुवा
क्या इति सार्वत्रिकोयं विधिरित्येतत् ज्ञापयति। अयमग्निरिति गायत्र्यपि याज्यानंतरमुक्तत्वाद्या
ज्यैव भवति। सानुगायत्री सामान्यादाधान एव भवति। यद्यग्नीषोमीय इति व्युत्क्रम्यां तेपवन्नप्र
संज्ञाया ऋगुक्तवाचो नोयं॥ अथ स्विष्टकृतः पिप्रीहि देवाँ उशतो यविष्ठेत्यनुवाक्या॥ अथ
शब्दः प्रधानानंतरं स्विष्टकृतो यागः स्यान्नावाहनक्रमेणेति अनुवाक्यावचनं सर्वत्र पूर्वमनुवा
क्या पश्चाद्याज्येति प्रदर्शनार्थं॥ येयजाम ह्यग्निं स्विष्टकृतमयाळग्निरित्यस्य पश्चाद्विभ
क्त्या देवतामादिश्य प्रियाधामान्ययाळित्युपसंतनुयात्॥ आवृत्ति विधानं निगदादावे
व स्यान्न ऋगादाविति। अग्निं स्विष्टकृतमिति वचनं अग्निं होत्राय यज्ञादेनादेशो न स्यादिति॥
षष्ठीविधानं द्वितीयायानिवृत्त्यर्थं। देवतामादिश्य प्रियाधामानीत्युपसंतनुयात्। अया
ड्ढ्राद्धः पूर्वपठित एवोत्तरेण सूत्रेण तस्यास्तस्या देवतायाः पुरस्तादिति देशरूपेण विधीयते।

श्रौ॰ सू॰
२१

या

देवतांउपरिष्टाद्धीयमानेन प्रिया धामानि शब्देन संधानार्थं । प्रिया धामान्ययाळिति संततं
पठितं । अतोत्र प्रतिदेवतमेकएव यायाड्शब्दः प्रयोक्तव्यो न द्वितीय इति स्थितं ॥ एवमुत्तरा अयाळि ऊया
ति देवतासांपुरस्तात् ॥ उत्तरासामयं विशेषः अयाड्शब्दं देवतासांपुरस्तात्प्रयोज्यो नाग्नि
शब्देपीति । एतदुक्तं भवति । प्रथमदेवतायाः पुरस्तादयाळग्निशब्दः उत्तरासामयाड्शब्द ए
व सर्वासामुपरिष्टात्प्रिया धामानि शब्दः सर्वेव संततावक्तव्य इति ॥ आज्यपानमनुकम्य देवा
नामाज्यपानां प्रिया धामानि यक्षदग्ने देवः प्रिया धामानि यक्षत्स्वं महिमानमायजता
मेज्या इषः कृणोतु सो अध्वरा जातवेदा जुषतां हविरग्ने यदद्य विशो अध्वरस्य होतरि
त्यनवानं यजतीति ॥ आज्यपानमिति प्रसिद्धक्रमसंग्रहादादावादनक्रमोत्रापि परिगृह्यते तेते
नांस्त्वानिन्यानिगमनमिहापि स्यात् आज्यपानमेवमुक्त्वा तदनंतरेण प्रिया धामानि शब्देनय
क्षदिति संधाय यथासूत्रमुक्त्वा जुषतां हविरग्ने यदद्येत्यनवानुच्छासन्यजेत । सर्वत्रानुच्छासः क नाम
र्तव्योस्यां याज्यायां ॥ प्रकृत्या वा ॥ अर्धर्चे वोच्छ्वसेत ॥ ६ ॥ प्रदेशिन्याः पर्वणी उत्तमे अंजयेलोष्ठ २१

णी

योरन्यात्मानं निमार्ष्टि ॥ प्रदेशिनीनामांगुलिविशेषः पर्वसंधी तत्र मेद्वस्यतो द्वे पर्वणी इत्यर्थः । अ
धर्युणा ते पर्वणी अंजयित्वा आत्मानं पाणितलं कृत्वा ओष्ठयोरंपर्वणी निमार्ष्टि ॥ वाचस्पति बामर
ना तेकृतस्येह प्राणाय प्राश्नामीत्युत्तरमुत्तरेमनसस्पतिना तेकृतस्योर्जे पानाय प्राश्नामी
त्यधरमधरे ॥ अनेनैकस्मिन्नित्यनयोरर्थः ॥ स्पृष्टोदकमंजलिं नेळां प्रतिगृह्य सव्ये पाणौ कृ
त्वा पश्चाद्स्या उदगंगुलिं पाणिमुपधायावांतरेळामवदापयीत ॥ द्विहस्तसंयोगोंजलिः तं
कृत्वा तेनेळां गृहीत्वा सव्ये पाणौ कृत्वा निधायेत्यर्थः । अस्या इती ळाया इत्यर्थः । याहस्तेवदीय
ते सा अवांतरेळा अवदापयीताध्वर्युं ॥ अंतरेणांगुष्ठमंगुली च स्वयं द्वितीयमादधीत ॥
अंगुल्यंगुष्ठयोर्मध्ये प्रदेशेन स्वयमिळाया अवांतरेळामादधीत ॥ प्रत्यालब्धामंगुष्ठेनाभि
संगृह्य प्रत्याहृत्य ॥ प्रत्यालब्धां स्पृष्टामध्वर्युणो वेत्यर्थः ॥ अंगुलीरग्रमुष्टिं कृत्वा दक्षिणा
तद्वा परिगृह्यास्यसंमितामुपह्वयते प्राणसंमितां वा ॥ अगुष्टिं कृत्वा अंगुलीभ्यो बहिरंगुष्ठ
मकृत्वेत्यर्थः । सव्ये हस्ते निहितामिळां दक्षिणेन हस्तेन गृहीत्वा वांतरेळां तां दक्षिणतः परिगृह्यास्य

ते नैवावांतरेळावदानहस्तेन दक्षिणतद्वा प्रतिगृह्य नीत्यन्वितायां १

श्रौ० सू० २२ संमितां प्राणसंमितां वेळां कृत्वा तामुपह्वयते प्राणसंमितां नासिकासंमितामित्यर्थः॥ इळोपहूता सह
ह दिवा बृहतादित्येनोपास्मां इळा ह्वयतां सह दिवा बृहतादित्येनेळोपहूता सहान्तरिक्षेण
वामदेव्येन वायुनोपास्मां इळा ह्वयतां सहान्तरिक्षेण वामदेव्येन वायुनेळोपहूता सह पृथि
व्या रथंतरेणाग्निनोपास्मां इळा ह्वयतां सह पृथिव्या रथंतरेणाग्निनोपहूता गावः सहाशि
र उप मां गावः सहाशिरा ह्वयंतामुपहूता धेनुः सहऋषभोप मां धेनुः सहऋषभा ह्वयता
मुपहूता गौर्घृतपद्युप मां गौर्घृतपदी ह्वयतामुपहूता दिव्याः सप्त होतार उप मां दिव्याः सप्त
होतारो ह्वयंतामुपहूतः सखा भक्ष उप मां सखा भक्षो ह्वयतामुपहूतेळा हरिष्टिरुप मामि
ळा हरिष्टिर्ह्वयतामित्युपांश्वथोच्चैः इळोपहूतोपहूतेळोपास्मां इळा ह्वयतामिळोप
हूता। मानवी घृतपदी मैत्रावरुणी ब्रह्म देवकृतमुपहूतं दैव्या अध्वर्यव उपहूता उपहू
ता मनुष्याः य इमं यज्ञमवान्ये च यज्ञपतिं वर्धानुपहूते द्यावापृथिवी पूर्वजे ऋतावरी दे राम
वी देवपुत्रे उपहूतोऽयं यजमान उत्तरस्यां देवयज्यायामुपहूतो भूयसि हविष्करण इद २२

मे देवा हविर्जुषंतामिति तस्मिन्नुपहूत इति॥ इळोपहूता सह दिवेत्यादिना तस्मिन्नुपहू
त इत्यंतेनेत्युपांश्वित्यनेन निगदानां त्रैस्वर्यत्वादप्राप्तमुपांशुत्वं विधीयते। तेनैकश्रुत्यम
नुपरतमेवेति सिद्धं। अथोच्चैरित्यनेनोत्तरस्य निगदभागस्य तत्र स्वरानपगमः कथ्यते प्रा
प्तत्वान्नापूर्वं विधीयते। तस्मिन्ननुच्यमाने संशयः स्यान्निगदमध्ये उपांशुत्वमुच्यमानं किं
सर्वस्य निगदस्य। आहोस्वित्पूर्वस्य भागस्य परस्यवेति अस्मिन्नुच्यमाने पूर्वस्यैव भागस्यो
पांशुत्वं विहितं भवति नोत्तरस्य भवतीति नात्र संशयः। इळोपहूता। मनुष्याः। देवी देवपुत्रे।
इति त्रीण्यवसानानि॥ उपहूयावांतरेळां प्राश्नीयादिळे भागं जुषस्व नः पिन्व गा जिन्वार्व
तो रायस्पोषस्येशिषे तस्य नो रास्व तस्य नो दास्व तस्यास्ते भागमशीमहि सर्वात्मानः स
र्वतनवः सर्ववीराः सर्वपूरुषाः सर्वपुरुषा इति वा॥ उपहूयेत्यनुच्यमाने हविर्जुषंतामिति
निगदांते स्यात्। तस्मिन्नुपहूत इत्यवांतरेळाप्राशनमंत्रः स्यादिळे भागमिति वानयोर्विक
ल्पार्थो वाशब्दः सर्वपूरुषाः सर्वपुरुषा इति पदद्वयविकल्पश्च मंत्रे इत्येते दोषाः स्युः एतस्मि

स्तूयमाने तस्मिन्नुपह्वतइत्येवमंतो निगदः स्यात्। प्रसर्पंइतिचाद्यो निगदैकदेशः स्यात्। वाशब्द
श्चानंत्राववयवविकल्पार्थएवस्यात्। सर्पंतु प्रसर्पाइत्यर्थं तद्इति शब्दात् नैतावानेवचमंत्रः स्यात् इत्ये
वं सर्वं समंजसं भवति। होतावीतरेळां भक्षयित्वेळामपि भक्षयेत्। सर्वे च स यजमानाइळां नेळायां भक्षस्य न स्या मिति ज्ञापकात्
भक्षयेयुः [illegible] इळा सर्वेषामिति पशुविभागे दर्शनात्। शास्त्रीतरे च यजमानपंचमाइळां भक्ष
येयुरिति दर्शनाच्च॥७॥ मार्जयित्वानुयाजैश्चरंति॥ मार्जनं इलाभक्षणांगं पित्र्यायामिळाभक्ष
णाभावेमार्जनस्याप्यभावदर्शनात्। भक्षयितु मार्जिने हष्टश्चोपकारोस्ति शुद्धिर्नाम। तइलां
तकर्मत्वेपि मार्जनभक्ष्ये वनैतदनुयाजांगं चतुर्धाकरणादक्षिणादानाभ्यां व्यवहितत्वात्।
पित्र्यायामनुयाजाभावेयाम पितदभावदर्शनाच्च। अतोमार्जयित्वानुयाजैश्चरंतीति वच
नं चतुर्धाकरणदक्षिणादानयोरनित्यत्वसूचनार्थं। तथाह्यनाग्नेयेषु चतुर्धाकरणं ना
स्ति आग्नेयेषुदक्षिणादानं नास्तीति॥ परिस्तरणेरंजलिंभंतधयापश्चादासत्वयतेनमा राम
र्जनं॥ आहवनीयस्य परिस्तरणेः भक्षणार्थं निष्क्रम्य पुनः प्रविष्टानां प्रथमप्राप्तत्वात्ते २३

भाष्यटे०आद्येत्र्यंओगे

षामासेचयतेऽपः सहकारिणा॥ देवाद्योऽनुयाजाः॥ देवाद्योर्यै देवस्त्राह्मादयः इत्यर्थः।
पुनरनुयाजग्रहणं उत्तरस्य सूत्रस्य प्रयाजानुयाजार्थत्वाय॥ वीतवत्स होताः॥ वीतव
त्पदांतत्वं प्रयाजानुयाजयोर्गुणः स्यात्। त्रयः॥ तेनुयाजास्त्रयो भवंति॥ एके प्रेषितो
यजति॥ देवान्यजेति प्रथमसंप्रैषस्य सर्वार्थत्वे सत्यपि पुनः प्रेषितएव यजेत्। इमेनुयाजाः।
देवं बर्हिर्वसुवनेवसुधेयस्य वेतु देवो नराशंसो वसुवने वसुधेयस्य वेतु देवो अग्निः स्विष्ट
कृद्द्रविणोमदः कविः सत्यमन्मायजी होता होतुर्होतुरायजीयानग्ने यान्देवानयाड्
अपिप्रेये ते होत्रे अमत्सत तान्ससनुषीं होत्रां देवंगमां दिविदेवेषु यज्ञमेरयेमं स्विष्ट
कृच्चाग्ने होता भूर्वसुवने वसुधेयस्य नमोवाके वीहीति। अनवानं॥ अमत्सतेत्यत्रावसायवा। वा४
इळानिगदप्रेषाकाव अनवसायवायजेत्॥ ना॥ सूक्तवाकाय सं प्रेषितेइदं द्यावापृथिवी भद्रमभूदार्ध्म सूक्तवाकमु अनुयचनत्वत्
सूक्तनायः
त नमो वाग्ने के ध्यास्म सूक्तोच्यमग्ने त्वं सूक्तवागसि। उपश्रुती दिवस्पृथिव्योरोमन्वती तेस्मि
न्यज्ञे यजमान द्यावापृथिवी स्तां। शंगयाजीरदानू अत्रस्नू अप्रवेदेउरुगव्यूती अभयंकृतौ।

श्रौतद

२४

इति धावारीत्या पात्नी वेषु वैभयो उवाकउक्त्यि ती वपयस्वतीं वसपचरणाच स्वधिचरणाच
तयोरावि दीय वसाय प्रथमया विभक्त्यादित्यदेवता मिदं हविरजुषतावीवृधत महोज्या
योकृतेत्युपसं तनुयात्॥ असि। स्तां। अभयं कृतो। दिवि। अकृतेतिच। अक्रातामिकृतेत्येवं
यजमानस्य नामनि। मानुषाः। इत्यवसानानि सर्वाणि निगदे अत्र तु। प्रथमा विधानं द्वितीया
नि इत्यर्थः। आ विदीयत्वावसाय प्रथमया विभक्त्यादित्यदेवतामिदं हविरित्युपसं तनुयात्॥
एवमुत्तराः॥ उत्तरा अपि देवता आदित्य इदं हविरित्येवमुपसं तनुयात्॥ अक्रातामकृतेति
यथार्थं उ ऊहमुपांशोः॥ आवहस्त्वाहे स्वक्रमित्यर्थः। उक्तस्य वचनमस्य निगदस्य पश्चादपी
ष्टिवदेव प्रयोगार्थं नमस्कवाकप्रैषवदजुषतादीनामुपांशुत्वं भवति॥ आ वापिकांतमनुद्रु
त्य देवा आज्यपा आज्यमजुषंतावीवृधंत महोज्यायोकृताग्निर्होत्रेणेदं हविरजुषतावी
२५ वृधंत महोज्यायोकृतास्यामृद्धौ होत्रायां देवंगमो यामाशास्तेयं यजमानोऽसावसावित्यसौ नाम २४
दित्यनाम नीउपांशुमान्निधो सुनोरायुराशास्ते सुप्रजास्त्वमाशास्ते नायस्पोषमाशा

द्विदेवत बहुदेवतयोरेवमूहः कर्तव्यः। यथार्थवचनमर्थवशेनाभिधानमित्येवमर्थः॥५ धे

स्ते सजातवनस्यामाशास्ते उत्तरां देवयज्यामाशास्ते भूयो हविष्करणमाशास्ते दिव्यं
धामाशास्ते विश्वं प्रियमाशास्ते यदनेन हविषाशास्ते तदश्यात्तदृध्यात्तदस्मै देवा रासंतां
तदग्निर्देवो देवेभ्यो वनते वयमग्नेर्मानुषाः। इष्टं च वीतं चोभे च नौ द्यावापृथिवी अंहस
स्यातामेह गतिर्वामस्येदं च नमो देवेभ्य इति। आ वापिकांतमित्येतदावापिकदेवताक्रमप्रा
स्यर्थं तेनास्थानित्यत्रापि निगद्यते दिवा आज्यपा इति यथासूत्रं। असावसावित्यत्र यजमान
स्य नामनी प्रथमया विभक्त्या निर्दिशेत्। सांव्यवहारिकं नाक्षत्रं वा होतुर्गुह्यं यजमानस्य विपरीतक्रमोपि देयत्रातमतेद
तस्य निधो उपांशु नामनी ब्रूयात्॥ धा [illegible] संप्रेषितः स्तब्धं योवा [illegible] मदूइत्याहा
अननुवचनत्वात् नुवाक्यावद्यगां॥ अनुवाक्यावद्यचमसैकस्य प्रापणार्थं प्रणवामिति प्रणवो निषिध्य
ते॥ तं ग्रहीयाद्वेदोसि वेदो विदेयेति॥ तमिति विस्पष्टार्थं यदा होता दद्यात्तदा तं गृह्णीयादित्यर्थः। तं३
यदि होतुर्युगपद्दद्यात्तदोहेन मंत्रं ब्रूयात्॥ वरुणप्रघासादिषु॥ उ दायुर्वेत्यतेनोपो [illegible]
[illegible] पत्न्यस्योपवित्रय सोमं त्वष्टारं देवानां पत्नीरग्निं गृहपतिमित्याज्येन यजंति॥ एतेनेति व
३ वेदमस्य प्रयच्छ्य पुनः वेदग्रहणकालज्ञापनार्थमिति सूत्रं। अतो ध्वर्युणा दत्ते गृह्णीयात्। अदत्तेपि स्वयमेव गृह्णीयात् ३

यागे इळायां चोभयत्राज्यग्रहणं समानद्रव्यप्रतिपत्त्यर्थं ज्ञापनीप
ष्टेउ नयत्र ज्ञापनीति१

२५

भाग१ चनं प्रकृतिविकारभावेपि कृत्स्नस्य मंत्रस्य प्रापणार्थं। आज्यवचनं यत्राज्येन सोम इज्यते तत्रैते
याज्यानुवाक्ये भवतः नान्यद्धविष्के सोम इति। यजंतीति वचनं याग एव नासां देवतानां निगमेष्वनुवृ न२
त्तिरिति॥ आप्यायस्व समेतु ते सं ते पयांसि समु यंतु वाजा इत्येते ... पंच
... देवानां पत्नी रुद्राणी ... इति द्वे अग्निर्होता गृहपतिः स राजा हव्यवाळग्निरज
रः पितानः इति पत्नीसंयाजाः॥ इदं संज्ञाविधानार्थं। अथ प्रजाकामो राकां सिनीवालीं कुहू
मिति प्राग्गृहपतेर्यजेत॥ अथशब्दः पक्षांतरपरिग्रहार्थः। अथ चेद्यजमानः प्रजाकामः स्या
त्तदैवैता देवता यजेतेति। प्राग्गृहपतेरिति देशविधानेन एताभिः समुच्चयं दर्शयति॥ राकामहं सि
नीवालि कुहूमहमिति द्वे द्वे याज्यानुवाक्ये॥ याज्यानुवाक्यास्वनेन प्रजाकामो यजेतेत्यनेन यज
नयष्टास्या३ मानेसंनिहितेपि होतैव कुर्यादिति। याज्यानुवाक्ययोर्देहि ... अन्यतः प्रसिद्धमिति। कुहू
महमिति प्रतीके गृहीतेपि स्वयमेव पठति॥ कुहूमहं सुकृतं विद्मनापसमस्मिन्यज्ञे सुहवां जो राम
हवीमि। सा नो ददातु श्रवणं पितृणां तस्यै ते देवि हविषा विधेम। कुहूर्देवानाममृतस्य पत्नी ह २५

व्या नो अस्य हविषः शृणोतु। सं दाशुषे किरतु भूरि वामं रायस्पोषं यजमाने दधात्विति। आज्यभा
अवांतरे का याज्या वादत्र भक्षमेशोन भवति२ गांतं वदापयीत ते ... सर्वं प्राश्नीयात्॥ एवं जिनाद्युपक्षानीतं कार्यं नाशावतिरेकात्पा
णितळस्तु माज्यमिळेत्युच्यते। ततः सर्वं प्राश्नीयादित्युच्यते॥ शंयुवाको भवेन्नवा॥ आज्येळा
या ऊर्ध्वं शंयुवाको भवति न भवतीत्यध्वर्यूणां संस्था प्रकाराः संतीति तत्सूचनार्थमितरत्र य
दि स्याद्धोतापि तथा कुर्यादित्येवमर्थं॥१०॥ वेदं पत्न्यै प्रदाय वाचयेद्धोताध्वर्युर्वा वेदोसि वित्तिर
सि विदेय कर्मासि करणमसि क्रियासं सनिरसि सनितासि सनेयं घृतवंतं कुलायिनं रा
यस्पोषं सहस्रिणं वेदो ददातु वाजिनं यं बहव उपजीवंति योजना नाम सद्वृती। तं विदेय प्र
जां विदेय कामाय त्वेति। पत्नी वेदं प्रदायतां वाचयति होताध्वर्युर्वा। वेदोसीत्यादि कामाय त्वे
त्येभ्यं वेन मंत्रं। वाचनमंत्रस्योह्यः प्रयोगो थो सिध्यति। कार्यं तु लिंगजनितमेव। वेदं शिरसा नी वेदमुपस्थे त्रिः प्रास्य स्वाप स्त्री ... त्र२
देश भिमालभेत प्रजाकामा चेत्॥ यदि पत्नी प्रजामे स्यादिति कामयेत तदा वेदस्य जानुसदृ
शेन प्रदेशेन पत्नी स्वनाभिमालभेत। कामाभावेपि वाचनं भवत्येव॥ अथास्या योक्त्रं

अध्वर्युणा नत्रवाचनेका नियितियो क्त्रविमोकादिसंस्कारपरिहारस्तत्कर्तकमिति २

यद्यनंतरं योक्त्रविमोकः स्यात्तदेवावाचनमपीति पाठांतरं १

२८

विवृतेस्त्वा सुचामिव रूपस्य पाशादिति ॥ अथेति संबंधार्थः । कामानावेवाचनात् नंतरं योक्त्रविमोकः स्यात्तचात्मनेन मपीति । अस्या इतियो क्त्रविमोचनं दोहं कर्तकमिति दर्शयति ॥ तस्य गार्हपत्याद्विगुणं पाकुपाशं निधायोपरिष्टादस्योदगग्राणि वेदतृणानि करोति ॥ तद्यो क्त्रं द्विगुणं कृत्वा गार्हपत्यात्पश्चिमायां प्राङ्मूलगत्रप्रदेशामित्यर्थः । तं निदध्यात् । योक्त्रस्य मूलप्रदेशः पाशः पाशाशक्तोत्रमूला त्रयोः प्रदर्शनार्थः । अस्य योक्त्रस्योपरिष्टाद्वेदतृणान्युदगग्राणि निदध्यात् । पुरस्तात्पूर्णपात्रं संश्लिष्टं वेदतृणः । तृणेभ्यः पुरस्तात्तृणैः संश्लिष्टं पूर्णपात्रं निदध्यात् ॥ अभिमृशय वाचयेत् पूर्णमसि पूर्णं मे भूयाः सुपूर्णमसि सुपूर्णं मे भूयाः सदसि सन्मे भूयाः सर्वमसि सर्वं मे भूया अक्षितिरसि मा मे क्षेष्ठाः इति ॥ अभिमृशया भिमृशन्नित्यर्थः । तां वाभिमृशंतीं वाचयेत् । प्रत्यगाशीष्ट्वान्मंत्रस्य ॥ अथैनां पूर्णपात्रात्पतिदिशमुदकमुदु क्षंत्तुदुक्षंतीं वाचयति प्राच्यां दिशि देवा ऋत्विजो मार्जयंतां दक्षिणस्यां दिशि मासाः पितरो मार्जयंतां प्रतीच्यां दिशि गृहाः पशवो मार्जयंतामुदीच्यां दिश्यापओषधयो वन

पूर्णमसीति मंत्रपत्नीप्रत्याशीर्वादः ३

तेन १

म.  उदगग्राणि

इदं दृशिम तं वेदवशात मतं च

 सिद्धांत भाष्यमतं

ना म २६

कुशा

स्पतयो मार्जयंतामूर्ध्वायां दिशि यज्ञः संवत्सरः प्रजापतिर्मार्जयंतां मार्जयंतामिति वा ॥ पूर्णपात्रादुदकं गृहीत्वा तदुक्षंतीं तामेवं कुर्वतीं वाचयति । अत्रोक्षणमकुर्वत्या वाचने मंत्रलिंगस्य विरोधान्नावाडुक्षणमपि विधीयते । सर्वत्र मंत्रलिंगादेवाभिमर्शनमकुर्वत्या मंत्रोच्चारणं न संभवतीति । न तस्याभिमर्शनं विहितं । मार्जयंतामिति पदद्वयमात्र विकल्पः ॥ अथास्या उत्तानमंजलिमधस्ताद्योक्त्रस्य निधायात्मनश्च सव्यं पूर्णपात्रं निनयन्वाचयेन्मार्द प्रजां परासिचं यानः संयावरीस्थन । समुद्रे वो निनयानि स्वं पाथोऽपीथेति ॥ योक्त्रस्याधस्तात्पत्न्यंजलिमुत्तानमात्मनश्च सव्यं पाणिमुत्तानं निधाय पूर्णपात्रं निनयन्मार्द प्रजामिति तां वाचयेत् । यथा तन्निनीयमानमुदकं हस्तयोरेव पतेत् । तथा निनयेत् । अंजुरवत्वमत्र नाद्रियते । अधस्तादंजलिनिधानस्यादृष्टार्थत्वप्रसंगात् । अत्र पत्नी द्वित्वे बहुत्वे सर्वासां वाचनं कर्तव्यं प्रतिपत्नि योक्त्रविमोचनमावर्तते । सर्वेषां योक्त्राणां द्विगुणीकृत्य निधानं भवति । निनयने न सर्वासां स्वयोक्त्रसंपृक्तोदकत्वान्नायौडुक्षणेऽपि सर्वासामन्वयः । वाचने वाच्यमंत्र

आर्थिकाश्रादिति भावः ४

योक्त्रस्याधस्तादिति दोषः ७

अंजलिमध्येऽप्रवृद्धखुरवीति नयनं कर्तव्यं वाचनकर्वति ७

वाच्यपुरुषशब्देन पत्न्या अंतरालोच्यते तस्य संस्कारः एवं सति पुल्लिंगे लगति अंतरा सपत्नी १

वेदोसि यथित्वसि सा दिशा पृथिसंतः अतो वरुण प्रधान पुरुष्यते आ पस्तंबानामी क्रमिमोका भावादेतेन नवं तिवेदस्तरणा दितु भवति संस्थाजपवर्जं। संस्थाजपस्तव भव्योत्तरं। का सा पत्नी नायोक्त विमोकस्यात्र सत्यानि सरोवेदोस्थानि नीत्वइत्यूह: १

वाच्यस्य मंत्रस्य वाचनेनेत्यन्वयः १

लिंगाज्जनितकार्याभावेपिवाच्यस्य पुरुषस्यैवायं संस्कार इत्यवगंतव्यं। ये एते पत्नीसंबंधाः प दार्थाः क्तोसर्वे परस्परसंबंधाः। अथवाद्वेनतल्लक्षणेनान्येन वाधितस्तेसर्वेस दैवकर्तव्याः। नैकैक त्रः॥ वेदस्तरणान्यग्रगृहीत्वा विधन्वत्संतं संस्तरणीसयेन गार्हपत्यादाहवनीयमेति तं तु तन्वन्त्र अस्रो मानु मान्विहीति॥ वेदबंधस्यमुक्तस्तृणानीत्युच्यंते। तानि दक्षिणेन हस्तेनाग्रप्रदे शेगृहीत्वा धन्वन्नविधलकेनार्क पयन्न गार्हपत्यादारभ्य सव्येन हस्तेन संततं संस्तृणन्नाहवनीयं गच्छति। तं तु तन्वन्निति स्यात्स्तरणमंत्रः। न गमनेनमंत्रः ततो मंत्रांतेस्तरणारंभः॥ शेषं निधा य प्रत्यमुदगाहवनीयादवस्थाय स्थाल्यां स्रुवेणादाय सर्वप्रायश्चित्तानि जुहुयात्स्वाहा कारांतेर्मंत्रैर्न चेन्मंत्रे पठितः॥ शेषं निधायेति वचनाच्चानि न सर्वाणि स्तरितव्यानि नियमेन शेषि
३ तव्यानीति गम्यते। आज्यस्थाल्याः स्रुवेणाज्यमादायाहवनीये स्रुवेणैव जुहुयात। आहवनीया त्प्रत्यमुदवेगस्थाय सर्वप्रायश्चित्तानि संज्ञैषां होमानां स्वाहाकारांतैर्मंत्रैर्मंत्रांते स्वाहाकारं कुर्वन्नित्यर्थः। नाम २७

इति शं

आहोमच्येते वा १

न चेन्मंत्रेयत्र क्वापि स्वाहाकारो न पठितः। तदंते स्वाहाकारः कर्तव्यः। यत्र क्वापि पठितस्तेस एव प्रदानार्थो भवति॥ यत्क्वचापि विनोपजेदन्यत्रापि॥ यः कश्चनास्मिंश्छास्त्रे देवतोद्देशेन द्र व्यत्यागात्मको व्यापारो यागो होमो भ्याधानं बलिहरणादिर्यो वा मंत्रेण साध्यते तत्र सर्वत्र स्वा हाकारः कर्तव्य इति सूत्रार्थः। अन्यत्रेति वचनं गार्ह्येष्वपि प्रापणार्थं। अप्रेषितइति वषट्कारस
यजेदिति याज्याया मपिप्राप्ते

मुच्चयनिष्टत्त्यर्थः॥ एवं सर्वाव्यक्तहोमाभ्याधानोपस्थानानि च॥ एवं भावोनामैवं प्रकारः आह वनीयात्प्रत्यमुदग्देशोस्थित आज्यं स्रुवेणादायाहवनीय इति। एवं प्रकार विशिष्टः कर्त्तव्य एवंभूत इत्युच्यते। विशेषणपरोयं निर्देशः। अव्यक्तशब्देनाविदितविशेषउच्यते। यत्र होमाभ्या धानोपस्थानान्यविदितविशेषाणि विधीयंते। तत्रानेनप्रकारेण कर्त्तव्यानीत्यर्थः। एकदेशावि शेषेणाप्यपेक्षितमात्र मस्माद्गृह्यते॥ अयाश्चाग्नेस्यनभिशस्तीश्च सत्यमित्वमया असि। अया सावयसा कृतोयासन्हव्यमूहिषे यानो धेहि भेषजं स्वाहा॥ अतो देवा अवंतु न इति द्वाभ्यां व्याहृतिभिश्च भूः स्वाहा भुवः स्वाहा स्वः स्वाहा भूर्भुवः स्वः स्वाहेति॥ एकमंत्राणि कर्माणीति न्वा
हुआहुतीः अतो नाभिहिंकारः २

विष्णु होमे-ततः सभि-धो स्वाहेत्यभिधति-एसोप तिष्ठतेइत्यादि

येन द्वाभ्यांद्वे आकुती होतव्ये। व्याहृतीभिरिति निर्देशांत्कृत्वा पुनः पठितेन ज्ञायते व्याहृतिपदेनो
नेन क्रमेणैते चत्वार इति॥ कृत्वा संस्थाजपेनोपस्थाय तीर्थेन निष्क्रम्या नियमः॥ स्यादिति शेषः।
कृत्वेति वचनं संस्थाजपेन होमस्य संबंधार्थं। यत्र संस्थाजपोस्ति तत्र प्रायश्चित्तहोमोपि भ
वतीति। अतः स्वेष्टेष्वपि संस्थाजपस्य प्रयोज्यत्वात्प्रायश्चित्तहोमोपि प्रयोज्य एव। उपस्थायां
ते तीर्थेनैव निष्क्रामेत॥ निष्क्रम्यानियम इत्यर्थः लुप्तानियम इत्यर्थः। अर्थलुप्तश्चेसत्यपि आनिय
मविधानं कर्ममध्येपि तीर्थेन निष्क्रांतस्यो व्याहृत्यादयो नियमा न भवंतीति। तेन प्रयोगमध्ये मा
र्गांतरेणानिष्क्रांतस्यापि नियमा भवंत्येवेति ज्ञायते॥ ॐ च मे स्वर अमे यज्ञोप च ते नम च यत्तेन्यू
नं तस्मै ते नूष्व य त्ते तिरिक्तं तस्मै ते नम इति संस्थाजपः॥ अन्वर्थसंज्ञेयं तेनायं सोमेष्टिष्वनुव
र्तते॥ इति होतुः॥ इति शब्देनात्रैतावत्सूच्यते। एतावदेव होतुर्नान्यदिति होतृग्रहणं होतुरेवैत
वत। आग्नीध्रस्यान्यदपीति॥११॥ अथ ब्रह्मणः॥ अथ शब्दोधिकारार्थः। इदानीं ब्रह्मणोपि वि
धायो वक्ष्यत इत्यर्थः॥ होत्राचमनयज्ञोपवीतशौचानि॥ व्याख्यातानीत्यर्थः। स्नानाचमनादि

तीर्थेन निष्क्रम्या प्रास्ता मा पुरो काशस्मप गादि सूत्र ६

ग हस्ते पा धी वष्टेपि व्या या च सांश [illegible] स्वत जपेनिवचनात् ४

संस्थाजपेनोपतिष्ठेतेयथपदे नाक मणि इत्यनेन [illegible] रूपमेते ४

नाऽग्निर्भूत्वा ब्रह्मत्वं करिष्यामीत्याग्नुरितो विहारं प्रविशन् प्राङ्मुख आचमनं कुर्यात्कर्मांग
त्वाद्यज्ञोपवीत ग्रहणं पेहक्रमानुषंगयोरपि कर्मणोर्वचनाद्दते यज्ञोपवीत्येवस्यादिति। शौचग्रह
णं कत्वर्थमपि अग्नेरविकसंपादियत्तद्विहाराद्बहिः कर्त्तव्यमिति। एतच्चाप्राप्तं विधीयते। अयमपि
तीर्थेन विहारं प्रपन्न इति। प्राक्पस्ताद्स्यनेष्यते यज्ञमना इति कर्माभिमुख्याएव यज्ञमनस्योपप
त्तेर्॥ अंकधारणसुपवेशांगतया प्राप्तमदृष्टार्थता परिहारायैव यावदासनमनुवर्त्तते। तच्च वेत्कर्म
त्यस्यापि कर्मसंबंधात। अथ्याहुत्तिरविशिष्टेवं दक्षिणांगत्वाच्च तत्र चेत्कर्मस्य स्वरुत्तरांगत्वे
नाविशेषादस्यापि भवति॥ नित्यः सर्वकर्मणां दक्षिणतो ध्रुवाणां प्रजतां वा॥ अन्यतः प्राप्तस्य
ब्रह्मणोयं नियम उच्यते। ध्रुवाणां प्रजतां च पूर्णानां यानि कर्माणि तेषां दक्षिणतो नित्यो न वेत। प्रा पा ४
कृतानाम प्राकृतानां च ध्रुवाणां नित्यं दक्षिणत्वं ध्रुवेणो वकतृत्वस्य तत इति ध्रुवेषु ध्रुव एव भवेत् प्रज त २
तां कर्मसु नित्यं दक्षिणत्वा यत्र जन्मैव न वेत। ध्रुवाणां प्रजतामिति कर्तृविशेषणं न कर्मणां नित्यत्व
मन्त्रोपक्रमप्रभृत्याप्रदिसमाप्तेर्दक्षिणत्वसिद्ध्यर्थं वा शब्दः समुच्चयार्थः। कचित्कर्मणि कश्चित्तिष्ठ

प्राप्तापि नेष्यते तत्र हेतुर्यज्ञमना इत्यादि ४

२७

अंबके स्यादौ २

तिकश्चिद्व्रजति तत्र व्ययसां धर्मः परिगृह्यते॥ बहिर्वेदियां दिशं व्रजेयुः सैवैतत्र प्राची॥ यत्र बहि
र्वेदिवसतीवरीग्रहणादि कुर्युर्यां दिशमभिमुखाव्रजन्ति स्म लिङ्गः तत्र तामेव दिशं प्राचीं कृत्वा दक्षि
णतो भवेत्॥ वेद्यास्वमंत्रासु स्थानासनयोर्विकल्पः॥ अमंत्रेषु कर्मसु स्थानमासनं भवेत्। वाशब्दे वा
नैव विकल्पोऽस्ति द्वे विकल्पवचनमव्यवस्थया विकल्पसिध्यर्थं ते नैकस्मिन्नपि प्रयोगे क्वचिदासनं क्व
चित्स्थानमिति लभ्यते॥ तिष्ठद्धोमा वषट्कारा:॥ तिष्ठंतीयं होमा वषट्कारसहिता यत्र तेषु वस्था वषनेवस्रो धोरा कालेहोत्रप्राय श्चित्तादौ च ५
वा नमासनं भवेत्॥ आसीनान्यत्र॥ अन्यत्रेत्यनंतरसूत्रद्वयविषयादन्यत्रेत्यर्थः॥ समस्तपाण्यंगु
ष्ठोग्रेणाहवनीयं परीत्य दक्षिणतः कुशोऽभ्युपविशेत्॥ समस्तोपाणौ अंगुष्ठो वै यस्य सोयं समस्त
पाण्यंगुष्ठः सव्येन पाणिना दक्षिणं पाणितलप्रदेशं गृह्णीयात् दक्षिणेन सव्यांगुष्ठं एवं कृते पा
णौ अंगुष्ठो व समस्तो भवति। एवंभूतोऽग्रेणाहवनीयं परीत्य वस्य दक्षिणतः कुशेषूपविशेत्। निर
नमंतियेत्तथैवस्वयं गसैस्त्रोपवितरोतर सनं कृत्वा कुशाग्रहणात् सतिसंभवे तर्वासनेषु प्रकल्प्यंते। दक्षिणत इति पुनर्वचनमाहवनीयस्ये राम
व दक्षिणतो न क्रियमाणस्य कर्मण इत्येवमर्थं॥ बृहस्पतिर्ब्रह्मा ब्रह्मसदनमासीदिष्यते बृहस्प २८

ब्रह्मणस्पशासेषु पशौ अग्नीषोमप्रणयनादौ आदौ निरसनोपवेशनमात्रे भवतः। यरुणप्रख्यासपशु अग्नीषोमप्रणयनांतेषु निरसनोपवेशनेऽब्रह्मजपश्चेति त्रितयं भवति ६

ते यज्ञं गोपाय इत्युपविश्य जपेत्॥ उपविश्य ग्रहणं सकृदुपविश्य पुनरपि कर्मण एव दक्षिणतो न भवेत्
आसमाप्तेः तत्रोपविशेदिति॥ एष ब्रह्मजपः सर्वयज्ञतंत्रेषु साग्नेयत्रोपवेशनं॥ एवमंत्रो
ब्रह्मजपसंज्ञो भवति स चातिदेशाद्वा ब्रह्मनपेक्ष्य सर्वेषु यज्ञेषु भवति। तत्र ग्रहणं पाकयज्ञेष्वपि
प्रापणार्थं पाकयज्ञा नाम तत्तत्रैव मित्रमिति तत्र ग्राह्यलात्तेषामिति। साग्नौ यत्रोपवेशनमित्यग्निप्र
णयनेन साग्निके कर्मणः प्रतिपन्ने यत्रोपवेशनं विहितं तत्रायं जपो भवति। एतदुक्तं भवति। एष ज
पः सर्वेषु यज्ञेषु प्रविष्टमात्रे न भवेत्। अग्निप्रणयने वस्त्वग्निप्रयोगे नातरमेव भवति॥ उपविष्टम उपवेशनात्प्रकृतमिति मात्रस्य ब्रह्मजपस्य नियमः क्रियते ६
ति सर्जयते॥ अनुज्ञापनार्थं मंत्रेणामंत्रयते अध्वर्युरित्यर्थः। उपविष्टग्रहणं प्रवेशकालज्ञापना
र्थं यस्मिन्काले उपविष्टस्योपवेशनानंतरमध्वर्युणातिसर्जनं संभवति तस्मिन्काले प्रविशेदि
त्यर्थः॥ ब्रह्मन्नपः प्रणेष्यामीति श्रुत्वा न भुवि स्वर्बृहस्पतिप्रसूत इति जपित्वा प्रणयेत्यतिसृजेत्स
र्वत्र॥ अध्वर्युमंत्रपाठे प्रश्नाद्य सहितेऽपि यांश्चावचने प्रणयेत्येवानुजानीयात् आपः प्रणयेदित्येवं॥
श्रुत्वेति वचनं श्रुत्वा पश्चाज्जपेन्न सह इति सर्वेष्वनुज्ञावचनेष्वस्य विधेः प्रापणार्थं। यथा कर्मत्वा

जपित्वेति पूर्वस्योपांशुत्वाम उत्तरस्य च तंत्रस्वरत्वाय। अतिसृजेत् अनुजानीयात्। सर्वत्रेति १

हविष्कृन्तऊद्वैर्वचनंयेनवाक्येनक्रियतेतदुद्वादनंवाक्यं हविष्कृदेहीति२

देशाः॥प्राप्तस्यार्थविशेषोविधिः।यस्मैकर्मणेअनुज्ञामिच्छतितदेवानुज्ञानीयात्प्रणयेत्येवंयथाकर्म
कर्मानुरूपमादेशाःकर्तव्याइत्यर्थः॥प्रणवाग्धर्थे॥उत्तरविवक्षार्थां।ऊर्ध्वंवाप्रणवात्।।उच्चैर्भवती
त्यर्थः॥अतऊर्ध्वंवाग्यतआहृतआहविष्कृन्तऊद्वादनात्।।प्रणीताप्रणयनोपलक्षितात्कालादूर्ध्वमाह
विष्कृन्मंत्रोच्चारणाद्वाग्यतोभवति।आहुइतिवचनंअमंत्रेष्वपिकर्मस्वस्मिन्नवसरेआसनमेवेति
नियमार्थं॥आमार्जनात्पशौ॥पशावग्निप्रणयनमारभ्यआचालालमार्जनात्वाग्यतोभवेत्।।सो
अनुवषट्कृतेः तिप्रैषंमैः६ मोघर्मादिष्वातिप्रैषादिवासुब्रह्मण्यायाः॥घर्ममारभ्यातिप्रैषंवारभ्यासुब्रह्मण्यायावाङ्नियमः॥
सोमग्रहणांपश्वधिकारात्पशुनामैकएवसोमस्यादितितन्निवृत्त्यर्थंसर्वसोमेषुप्राप्त्यर्थं॥प्रातर
नुवाकाद्यांतयामात्॥प्रातरनुवाकलक्षितात्कालादूर्ध्वंआअंतयामहोमादित्यर्थः॥हविर्वतोनुसव
नमैळायाः॥तथासवनत्रयेपिपुरोळाशप्रचारमारभ्यापुनोळाशेळायाः॥स्तोत्रेष्वतिमार्जनाद्यावषट्
कारात्।स्तोत्रादौस्कन्धमिउपाकरणं।तदादिआशास्त्रयाज्यावषट्कारात्वाग्यतोभवेदित्यर्थः॥ओद्दृचः
पवमानेषु॥पवमानस्तोत्रेषूपाकरणादारभ्यआउद्दृचः।उद्दृगितिसमाप्तिरुच्यते।यद्यकिंचमंत्रंकरा॥ राम २०
अमंत्रवतिवेदिमानादिषुवाग्यतोनभवति१

यद्यपिपशौघर्मादयोनविद्यंतेतथापिपशुनामधरकाहोस्ति५

सघस्कालवत्पशौअग्निप्रणयनादिआचालालमार्जनात्६
वरुणप्रघासादौअग्निप्रणयनादिआहविष्कृन्तऊद्वादनात्६

होत्रकाणांतुहोत्रकइतिसमाख्यानात्नैवविहितवाग्यमनंआपत्तिश्चनवति सर्वत्रमंत्रवतिकर्मणिवाग्यमनंभवति।दोषांतरेषु॥उक्तादन्योयोविषयस्तत्राप्यस्यवाग्यमनंहोतुर्वत्
भवति।आतोवाग्यमननित्यादिनियमोस्याप्यधिक्रियतइत्यर्थः॥आपत्तिश्च॥आपद्यातोदेवाश्च
वुनइतिजपेदित्यकल्पादेतत्प्रायश्चित्तमापतिरित्युच्यते।अनंतरोक्तैर्वाग्भिःसूत्रैर्विहितस्यवाग्य अतऊर्ध्वमित्यादिहोत्राशब्दस्तेः२
मनस्यभ्रेषएतदेवप्रायश्चित्तमित्यर्थः।अन्यत्रैवेभूरित्याहुतिः॥यत्राग्निः प्रणीयतेपिससोमे
नदादितत्रवाग्यमनं॥विहितएववाग्यमनेवदादिलमात्रेमंत्रविधीयतेतुशाहृसमन्वयात्अपिस
सोमेसोमसद्दितेपिअग्नीषोमीयप्रणयनेपीत्यर्थः।तत्रवचनंयस्मिन्नहन्यग्निःप्रणीयतेतस्मि
न्नेवाहनिकर्मप्रवृत्तौतदादिवाग्यमनंनस्वेष्ट्यादिप्रणयनेतदादित्वनियमः।तथाहसघस्कालेषुर
वेद्यग्निःप्रणीयतेवरुवरुणप्रघासादिषु॥दक्षिणतश्चव्रजंजपत्योपाः दिशानइतिसूक्तं॥सूक्तयद्द
शांव्रजन्जपतीविव्रजतोजपविधानात्।व्रजनसमाप्तावपिकृत्स्नसूक्तप्रयोगविधानार्थंदक्षिण
तोव्रजनविधानेदक्षिणतोव्रजतएवायंजपस्यान्नाग्निंसोमंवाप्रणयतःतदाद्यस्येणगच्छंतीति॥स वा२
माप्योपवेशनात्सूक्तं॥समाप्येतिवचनेसमाप्योपवेशनादियदुक्तंतदेवकुर्यात्तिसूक्तान्तिगमनात्

श्रौ॰ वृ॰ सौमिकप्रणयनं नाम उत्तरवेद्यामग्निः प्रणीयते तत्सौमिकमग्निप्रणयनं नाग्नीषोमप्रणयनं तत्राग्नीध्रीये निस्थापने। उत्तरवेदेर्दक्षिणतो निरसनोपवेशने सौमिकप्रणयने आदौ भवतः। ब्रह्मजपस्त्वादौ भवति न भवति वेति विचारणीयं। अंते तु ब्रह्मजपो न भवति। निरसनोपवेशने तु विहिते ४
ब्रह्मणः आग्नीध्रीयेऽग्निस्थापनकाले निरसनोपवेशने विचारणीये

३० परिसमाधावपीति। आदिति ग्रहणेन ब्रह्मजपः परिगृह्यते। उपवेशन ग्रहणेन निरसनमपि गृह्यते।
सहचारित्वात्। एतत्त्रयमग्निप्रणयनाग्नीषोमप्रणयनयोरंते विधीयते। नेन स्तन्त्रेणां सामान्यो यो
पवेशनमित्यनेन सादिप्रणयनेषु पश्चादिषु कर्मसु अग्निप्रणयनांत एव ब्रह्मजपो नान्यत्रेति
नियम्यते॥ न तु सौमिके प्रणयने ब्रह्मजपः॥ सोमे यदग्निप्रणायनं तदंते न ब्रह्मजपो भवति। तत्र नि
रसनोपवेशने एव भवतः॥ अन्यत्र विसृष्टवाग् बहुभाषी यज्ञमनाः॥ यज्ञमनाः क्रियमाणपदा
र्थपरामर्शी विसृष्टवाग् अपि यज्ञमनाः स्यादिति योगविभागः कृतः॥ विपर्यासे तु रिते कर्मणि वा मंत्रे
रव्याते वोपलक्ष्य वा आज्यं वाभ्यादुत्याहुतिं जुहुयात्॥ विपर्यासो व्युत्क्रमः। अंतरितो निगमनेन मंत्रयोः कर्म
णोर्वा विपर्यासे तरिते मंत्रे कर्मणि वा स्वयमुपलक्ष्य परेण वा ख्याते दक्षिणं जान्वनिपात्य वक्ष्यमा
णेन मंत्रेण वक्ष्यमाणे गना वाहुतिं जुहुयात्। सर्वत्र जान्वनिपातं मुख्यत्वोच्चान वाविरोधेन कर्तव्यं। राम
न॥२ नन्यगमावै केन विकृष्य कारेणानि कर्मादिना दोषनिबंधनात्। आख्याते उपलक्षणा ग्रहणाम न्यस्मि ३१
न पि विषये यथाकथंचिद् ज्ञाते एतत्प्रायश्चित्तं भवतीत्येवमर्थं। तेनैवमस्य सत्यस्या थोर्विगतं यः सिवे

इष्टिमध्ये चेदिष्टिसमाप्य तदनंतरमेव प्रायश्चित्तं न विलंबः। नात्यंतशश्वदात्। अग्निहोत्रहोममध्ये चेदादौ प्रायश्चित्तं ततः प्रारब्धं कर्म ४
होतृब्रह्मणोरप्यध्वर्यसादि अज्ञातेपि भवति ५

षु न्येषु ध्वेतत्प्रायश्चित्तं सामान्यरूपेण भवति। यदन्यत् न्येषु विशेषे विहितं तदस्यापवादकं
भवति। विपर्यासांतरितयोरत्र भेदेन ग्रहणात्तद्विषयविशेषेणाप्यस्य समुच्चयो भवति। सर्वेषां नै
मित्तिकानां मयमुत्सर्गः। निमित्तादनंतरं कर्तव्यमिति। यस्य पुनर्बलवता प्रमाणेनानंतरं कर्तुमसं
भवति। तस्य यावत्सं न कस्य कर्षेनात्यंतमिति ब्राह्मणस्याद्विसचारणं ज्ञातरवनिमित्तेरतत्प्रायश्चि
त्तं न सर्वोक्तं सर्वप्रायश्चित्तं न वेदज्ञायं तेपीति ज्ञानार्थं। आहुतिमित्येकवचनं बहुष्वपि निमित्तेषु युग
भिति६ पत्ज्ञातेष्वेकैवाहुतिः कर्तव्या न प्रतिनिमित्तं ज्ञापनाय॥ उत्तरार्धेद्रिति गार्हपत्ये। यजुष्टो भुव इति
दक्षिणे। आग्नीध्रीये सोमेषु॥ प्रागाग्नीध्रीय प्रणायनात् सोमेऽपि दक्षिणाग्नावेव दक्षिणाग्नेर्मुख्यत्वादा
ग्नीध्रीय प्रणयनस्य॥ सामतः स्वरित्याहवनीये सर्वतो विज्ञाते भूर्भुवः स्वरित्याहवनीय एव। य
दा सर्वेभ्यो वेदेभ्यो युगपद्द्वेषा आगच्छेयुः तदा समस्ताभिरेकाहुतिराहवनीय एव कार्या। एवकारग्रहणं
समस्ताभिरेकाहुतिराहवनीय एवेति ज्ञापनार्थं। अविज्ञातुरिति स्मार्तानां शौचाचमनादीनां न्येषे स्थापा
पनार्थं। एते त्रगादयः शाखा वेदवचनान्नजातिवचनाः॥ प्राकूप्रयाजेभ्यो गार्हपत्यदक्षिणाग्निर्हतंस्तुव

जातिशब्देन आध्वर्यवे समाम्नेव चर्चेदस्य च पठितास्ताद्रसर्वे। तत्र सकृत्प्रेषप्रायश्चित्तं न (स्कन्दापनास्ववेदष्टेरारंभाद्र्ध्वंदप्रायश्चित्तं। ततऊर्ध्वमिदं तस्य कमिति
भवति। यजुर्भ्यो भवति। एवं हौत्रे यजुर्वेदस्थमंत्रभ्रेषे सभ्रेष प्रायश्चित्तं १

स्व

दंडेनाग्निं निदध्यान्मा तपो मा यज्ञं पन्मा यज्ञपतिं तपन्। नमस्ते अस्त्वायते नमो रुद्र परायते नमो
यत्र निषीदसीति॥ प्रास्य प्रयाजेभ्य इति स्रुगादापनात्प्राक् कृत्स्नं संगृह्य तेवद्भिः परिधीत्यस्य परिधिशा
ब्दस्य देशोपलक्षणार्थत्वात्सर्वतोनिवर्तित्तं गृह्यते तत्र वक्ष्यमाणैः मन्त्रैः स्पर्शयति॥ अमुं मा हिंसीरमुं
मा हिंसीरिति प्रतिदिशमध्वर्युयजमानौ पुरस्ताद्ब्रह्मयजमानौ दक्षिणतो होतृपत्नीयजमाना
न्वाहार्यादाग्नीध्रयजमानावुत्तरतः॥ अध्वर्युं मा हिंसीर्यजमानं मा हिंसीरित्येवमेतेन मोत पञ्चत्वेन पुरस्ता
न्निर्गतमग्निं निदध्यात्। एवमुत्तरेष्वपि प्रयोगो द्रष्टव्यः। चशब्दोमुमादेः सर्वेण स्तु समुच्चयार्थः। दिगनुक्र
मणेन प्रतिदिशन्नार्थंसिद्ध एव यत्प्रतिदिशग्रहणं करोति तद् ज्ञापयति। सर्वदिक्संबंधकर्मानेन क्र
मेण कर्तव्यमिति॥ अथैनमनुप्रहरेदादं यज्ञं दधे निर्ऋतेरुपस्थात् तं देवेषु परिददामि विद्वान्। सुप्र
जास्त्वं वाताद्दिमा मदं तं इहंनो देवा मयि शर्म यच्छतेति॥ नम्चाहाकान्तं॥ तमग्निं जुहुयादग्ने सहस्र
शृंग गोवृषभो जातवेदास्तोमपृष्ठो घृतवान्सुप्रतीकः। मा नो हिंसी द्विंसितो नेत्वा जहामि गोपोषं
च नो वीरपोषं च यच्छस्वाहेति॥ तमिति प्रहृतमेवांगारमग्निं जुहुयादित्यर्थः॥ १२॥ प्राशित्रमाह्रियमा

राम
३२

ह्रियमाणामीक्षते मित्रस्य त्वा चक्षुषा प्रतीक्ष इति। देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो ह
स्ताभ्यां प्रतिगृह्णामीति। तदंजलिना प्रतिगृह्य पृथिव्यास्त्वा नाभौ सादयाम्यदित्या उपस्थ इति। कु
शेषु प्राग्दंडं निधायांगुष्ठोपकनिष्ठिकाभ्यामसंखादं प्राश्नीयात्। अग्नेष्ट्वास्येन प्राश्नामि बृहस्पतेर्मु
खेनेति। आचम्यान्वाचामे सत्येन त्वाभिजिघर्मि यान प्रत्यं तदेवता स्वादं ग्नामयं तु न स्तु श्रोत्रं प्राणान्मे
मा हिंसीरिति इंद्रस्य त्वा जठरे दधामीति नाभिमालभेत। प्रक्षाल्य प्राशित्रहरणं त्रिरनेनांभ्यात्मम
पोनि नयते॥ तद्धित्याह तस्य प्रतिग्रहणार्थं नाह्रियमाणस्येति। अंतर्वेदि कुशेषु प्राग्दंडं प्राशित्रहरणं
निधायासंखादं प्राश्नीयात्। असंखादन् दंतैरपीडयन्नित्यर्थः। शौचार्थमाचमनं कृत्वा पुनर्मन्त्रेणापः
पिबेत्। पुनरपि प्राग्वत् शौचार्थमाचमनं कुर्यात्। अनेन प्रक्षालितेन प्राशित्रहरणेनात्मनोभिमुखेन ह म
स्तेन चतस्रो नाभेर्नाभिनः पुरतस्त्रिरपः सिंचेत्। मार्जयित्वास्मिन् ब्रह्मभागं निदध्यात्॥ सर्वैः कर्तृभिरिळा भि
नक्षणस्यानुष्ठेयत्वात्तदंगत्वाच्च मार्जनस्यास्मिन्नवसरेऽयमपीळां भक्षयित्वा मार्जनं कृत्वा ततः प
श्चात्कुर्यात् करणे कृते ब्रह्मणे आनीतं ब्रह्मभागं प्राशित्रहरणे निदध्यादित्यर्थः॥ पश्चात्कुशेषु यजमान
भागं॥ यस्मिन्देशे प्राशित्रहरणं निहितं तत्स्य पश्चात्कुशेषु यजमानभागं निदध्यात्। प्राशित्रहरणस्य

मंत्राचमने नैव शुद्धिरपि स्यादिति शौचाचमनविधानं ६

र्थः॥अन्वाहार्यमवेक्षेत प्रजापतेर्भागोऽस्यूर्जस्वान्पयस्वान्क्षितिरसि मा मे क्षेष्ठा अस्मिंश्च लोके मुष्मिंश्च।
इतिकाराध्याहारेण सूत्रच्छेदः॥ प्राणापानौ मे पाहीत्यादिकामायतस्त्वेत्यस्य स्पृष्ट्वा नव प्रायौ मुष्टौ पकनिष्ठिकाभ्यां
त्रिष्टुंभ दीक्षा ब्रह्मभागं निदध्यात्॥ अन्ये नांगेनास्पृष्टान्वर्जयेत्। अन्वाहार्यं प्राप्य नाक्रियादिनान्त्रि (ग)
ष्टं पुलाकं कलामात्रमित्यर्थः। तन्मात्रमन्वाहार्याद्धृत्वा ब्रह्मणो भागं निदध्यात्॥ ब्रह्मन्प्रस्थास्याम
इति श्रुत्वा बृहस्पतिर्ब्रह्मा ब्रह्मसदनआशिष्ट बृहस्पते यज्ञं मे गोपाय स यज्ञं पाहि स यज्ञपतिं पाहि स
मां पाहि॥ अध्वर्युमंत्रपाठः प्रस्थास्यामि प्रस्थास्यामीति वा श्रुत्वा प्रतिष्ठेत्युपांशु शावचनं ब्रूयादित्येव
मर्थः॥ भूर्भुवस्वर्बृहस्पतिप्रसूत इति जपित्वा प्रतिष्ठेति समिधमनुजानीयात्। संस्थिते जघन्यत्रलि
जां सर्वप्रायश्चित्तानि जुहुयाच्चामित्यन्वारंभणेन च॥ भूर्भुवस्वरित्यादेः पावः समुच्चयार्थः। समिद्ग्र
हणं समिदाधानानुज्ञानमपि समत्युतिमंत्रमेवंरूपमेव भवति। नाधेहीत्येवंरूपैः त्रलिजां कर्मसु संस्थिते
ष्वपरेषु अनुपरते यजमानकर्मणि जघन्यः सन्सर्वप्रायश्चित्तानि जुहुयात्। अत्राग्नीधोन्वारंभे तद्ब्र राम
ह्मणां बहुत्वनं विकल्पार्थं॥ होतारं वा॥ होतारं वेत्यन्वारंभेन च॥ एतयोर्नित्यहोमः॥ होमएवैतयोः ३२

जघनेभवः सर्वर्त्विजां कर्मणि समाप्ते विद्यमानः २

ना१ कार्येन्वारंभः परस्परं त्वित्यर्थः॥ सर्वे संस्थाजपेनोपतिष्ठंते उपतिष्ठंते॥ सर्वे होमकर्तारोन्वारंभकर्तार
इत्यर्थः॥ १२॥ इत्याश्वलायनसूत्रवृत्तौ नारायणीयायां प्रथमोऽध्यायः॥ छ॥ ॥ पौर्णमासेनेष्टिपशु
सोमा उपदिष्टाः। प्रथमेध्याये दर्शपूर्णमासौ व्याख्यातौ विध्यंतसहितौ उत्तरत्रेष्टयः पशवश्च वक्ष्यंते
विध्यंतरविहिताः। तेषां विध्यंतापेक्षास्ति यथार्हं न हि तत्करणं लोके वेदे वाक्विदीदृशानि तिकर्तव्यता
साध्योयस्य नानुग्रहेर्थि[illegible]तेति एवं च तदपेक्षायां सत्यां तदपि वैदिकमेव श्रौतमेव यपि सिद्धे श्रौतेषु चाग्नि
होत्रिकदार्शपौर्णमासिकसौमिकेषु त्रिषु सत्स्वस्येति विध्यंतविशेषग्रहणे चोदनासामान्यं स्वरूपसा
मान्यं चमुक्त्वान्यस्यविशेषलिंगस्याभावात्तैरेवविशेषलिंगैर्विध्यंतविशेषः परिगृह्यंते। तानीमानिवि
ध्यंतरविशेषग्रहणलिंगानि। निर्वपेत्तद्धितआज्यमौषधं पयो दधि। कपालानि च तत्संख्यादेव
ताशब्दएव च। तस्मिन्नक्षरसंख्या च तद्धा[illegible]त्वोहोकूपि। दुग्धत्वं प्राकृतः शब्दो हविषः प्रजावादि
वा। एतद्ब्राह्मणशब्दश्च तद्ददित्यपदेशानं। नामधेयं तथा व्यक्तचोदना वान्यदीदृशं। लिंगान्येता
नि वान्यानि गुरूणि च लघूनि च। समीक्ष्ययं प्रकृतिश्चेयं विकृतिश्चेति कल्पना। द्रव्यदेवतयोर्यत्रवि

औ०सू०
२८

रोधस्तत्र निश्चये। तत्र द्वैधं बलीयस्याद् देवताया इति स्थितिः। अत्र सर्वासामिष्टीनां दर्शपूर्णमासौ प्र
कृती तत्र विशेषलिंगाकारासां चिह्नशि प्रकृतिः। का सांनित्यौर्णमासीत्येवं समीक्ष्य व्यवस्था कल्पनी
या। एवं सर्वेषां पशूनां दर्शपूर्णमासावेव प्रकृती। तद्धितादि विशेषलिंगोल। अग्नीषोमीयस्य पशोर
षोमी न्येषां च। अत्र न्यायविद आहुः। अग्नीषोमीयस्य पशोर्दर्शपूर्णमासौ प्रकृती। नान्येषां पशूनां। सवातिदे
शिके रौपदेशिके च संबंधो ऽन्येषां पशूनां प्रकृतिः। एवं सत्कपकार प्राप्तिर्विंडितान बलीति। सत्य २
मेषा न्यायविदां स्थितिः। किंतु चक्रकल्पसूत्रकाराणामेवं प्रवृत्तिः। सर्वेषु पशुषु दार्शपौर्णमासि
कोविध्यं तो दर्शपूर्णमासाभ्यामेव प्राप्नोति। अग्नीषोमीयाच्च पशोः प्राप्तक इति। अत एवास्मिन् सूत्रे ऽ
ग्नीषोमीयमनुक्त्वा पशुसामान्यवाचिनं पशुशब्दमेव प्रयुक्तवानाचार्यः। तेनैवायमतिदेशः सर्वेषां
पशूनां नाग्नीषोमीयस्यैवेति गम्यते। अत एव भाष्यकारः। अथ सवनीयैः स्मिन्सूत्रे यद् देवताग्रहण ने
स्येदं प्रयोजनमनुक्तवान्। अनुक्तदेवतानामपि पशूनां सवनीयत्व प्राप्तौ तेषामपि समाम्नातत्वं भवती ग्राम
ति। समाम्नातत्वे चवार्त्रघ्नाज्यभागस्य लाभः प्रयोजनं तान्यत्र। अतः सर्वपशूनामतिदेशः सिद्धः। तत्रा २४

ग्नेयत्व पांशुयाजोऽग्नीषोमीय इति पूर्णमाससंज्ञका यागाः। आग्नेयस्तु पांशुयाज ऐंद्राग्न इत्यसंनय
तो मावास्यायां। संनयत ऐंद्राग्नस्थाने ऐंद्रे माहेंद्रो वा दधिपयसी इति। तयोः समुदाययोरपि पौर्णमा
स्यमावास्या नामनी भवतः। अनयोस्तत्र साधारणं। एतावानेव भेदः प्रधानदेवताः आज्यभागयोरनु
इति वाक्ये च। तत्र प्रधानदेवताविकृतिषु प्रत्यक्षं तत्रातिदेशव्यापारो नास्ति। अतः पारिशेष्यादाज्य
भागानुवाक्ययोरेवातिदेशः फलति। एवं स्थिते अस्मिंछास्त्रे समाम्नाताद् इष्टयः पशवश्चात्रैव प्रकर
णे विशेषिताज्यभागाश्च तेषां मध्ये केषां चिं वार्त्रघ्नाज्यभागतां मत्वा तदुपदेशार्थमितत्सूत्रं प्रणीत
वानाचार्यः। तस्यायमर्थः। [redacted] उपदिष्टा समाम्नाता इत्यर्थः। अ
नुवादलेनवायं शाद्धः संबध्यते। अतोऽयमर्थः सूत्रस्य। यस्मिंछास्त्रे उपदिष्टा इष्टयः पशवश्चापि अवि
शेषिताज्यभागास्ते सर्वे वार्त्रघ्नाज्यभागा इति। पौर्णमासे ते त्यस्यायमर्थः। पौर्णमासेन व्याख्याता इ
तिवार्त्रघ्नाज्यभागा इत्यर्थः। तेन संसमाम्नातानामिष्टीनां पशूनां च सिद्धो भवति। तथा चोक्तमिध्ययन न्यायादेव तत्र
प्रकरणे। असमाम्नातास्वर्थात्तिन्न विकार इति। तत्र पशूनामपि प्रदर्शनार्थत्वेनोक्तमिति द्रष्टव्यं। सोम नियमः २

श्रौ०सू०
२५

ग्रहणानुत्तरार्थं। अत्रापि किंचित्प्रयोजनमस्ति। याज्याधर्माणां निरसनादयः। एवं प्रकाराः श्रुतावनार
स्याधीतास्तु अप्यस्मिञ्छास्त्रे दर्शपूर्णमासप्रकरणे विहितास्तेषां प्रापणार्थेति॥ नेरमावास्यायां पौर्णमा
स्यां वा यजेत॥ नेष्टिपशुसोमैरमावास्यायां पौर्णमास्यां वा यागः कर्त्तव्य इति। इष्टिपशूनां प्रकृति
प्राप्त एवायं कालः पुनर्विधीयते। द्व्यहकालतां निवृत्त्य सद्यस्कालताप्राप्त्यर्थं। किंच दर्शप्रकृतेर
मावास्या पौर्णमासप्रकृतेः पौर्णमास्यामित्येवं नियमं निवर्त्य अनियमेनोभयकालताप्राप्त्यर्थं। किंच
प्रकृत्यविरोधात्पर्वणस्तु इत्यहोरात्रे विकृतिः कर्त्तव्या। यदाह्नः पूर्वभागे पर्व स्यात्तदा प्रकृतिं कृत्वा
विकृतिः कार्या यदापरभागे रात्रौ वा तदा विकृतिं कृत्वा प्रकृतिः कार्येति। सोमस्यायमप्राप्तः का
लो विधीयते। इत्यादिशाखसंबंधाद्देवयजेतेत्यपि सिद्धे यजेतेति वचनं सोमस्य यागएवानयोः का
लयोः संपादनीयो नान्यद्दीक्षादीनि॥ राजन्य अग्निहोत्रं जुहुयात्॥ क्षत्रियस्याग्निहोत्रहोमः
पर्वणोरेव कर्त्तव्यो नान्यस्मिन्काल इति। चकाराद्वैश्योप्यनयोरेव कालयोरग्निहोत्रं जुहुयात्तना राम
न्यस्मिन्नित्यवगम्यते। कथमनयोरन्यस्मिन्काल इत्याह॥ तपस्विने ब्राह्मणायेतरं कालं न क २५

मुपहरेत्॥ तपस्वी कर्मनिरतः तस्मै ब्राह्मणाय। अतपस्विनेपि ब्राह्मणायैव दद्यात्। न जात्यन्तरायेत
पस्विनेपीति। इतरकालमिति इतरेषु सर्वेष्वग्निहोत्रकालेष्वित्यर्थः। नक्तमुपहरेत् नक्तं पक्वौद
नं पक्वान्नमुपहरेत् दद्यात्। एतदुक्तं भवति। राजन्यवैश्ययोः पर्वण्यग्निहोत्रकालद्वयं वर्जयित्वा
इतरेषु कालेषु ब्राह्मणायौदनं दातव्यं। न होमः कर्त्तव्य इति। अग्निधारणं त्वक्रियत एव॥ अपि वा स
त्यशीलः सोमसुत्सदा जुहुयात्॥ ऋतं वाग्मनसयोः सत्यत्वं। सत्यं वाच एव ऋतं सत्यस्य भावः सोम
याजी चयस्त्रिवर्णो वैश्यो वा स सदा जुहुयादग्निहोत्रं न पर्वणोरेव। अत्र ब्राह्मो नैव सत्यशाह्योसि र्थे
द्धे सत्यग्रहणं वाक्सत्यस्वभावस्यापि सर्वदा होमसिध्यर्थं॥ बहुष्वबहूनामनुदेश आनन्तर्ययो
गः॥ समानानामिति विशेषः। अनेकेषु विहितेषु तावद्बहुत्वया अनेकेषु समानानामनुदेशो पश्चाद्विधा
नेसत्यानन्तर्ययोगः क्रमेण संबंधः स्यादित्यर्थः॥ द्वे द्वे याज्यानुवाक्ये॥ याज्यानुवाक्ययोर्देवताभि
रेवं आनन्तर्ययोगो भवति। एकस्या एकस्या देवताया द्वाभ्यां द्वाभ्यामृग्भ्यां नेकैकस्या एकैकेति॥ ये
अदृष्टादेशा नित्ये॥ यदि कश्चिदनेकादेवताविधायकस्याश्चिद्देवतायास्तल्लिंगयो याज्यानुवाक्ययो

श्रौ० सू०
३६

विधिं न कुर्यात्। तदा नित्ये गृहीतव्ये इत्येकोऽर्थः। अयमपरोऽर्थः। गृहीतव्यात्तु नस्ताभ्यां विहिता
भिश्च सह देवताभिरानंतर्ययोगइति। आदेशो विधिरित्यर्थः। नित्योऽकेत्यर्थः॥ अग्न्याधेयं॥ अ
ग्न्याधेयप्रभृतिलिंगकर्मणामनुष्ठानस्योक्तमनुष्ठानक्रमेणैव व्याख्यानमपीत्युक्तं। तत्रोपोद्घाताद्द
र्शपूर्णमासौ व्याख्यातौ। तत्प्रसंगादतिदेशात्तत्प्रसंगात्कालविधिः। तत्प्रसंगादेवाग्निहोत्रहोम
प्रकारविधिः। परिभाषाप्रसंगात्कथं विदानंतर्ययोगविधिः। सूत्रत्रयेणैवं गते सति प्रथमप्राप्तमा
धानमुच्यते। विशिष्टकाले विशिष्टदेशे विशिष्टपुरुषेण विशिष्टैर्मंत्रैर्गार्हपत्याद्यग्न्युत्पत्त्यर्थं यदं
गाराणां निधानं तदग्न्याधेयमुच्यते। अग्नीनामाधेयमग्न्याधेयं तत्कर्तव्यमित्यर्थः। कस्मिन्नक्ष
त त्रे इत्यादि॥ कृत्तिकासु रोहिण्यां मृगशिरसि फल्गुनीषु विशाखयोरुत्तरयोः प्रोष्ठपदयोः॥ फल्गु
नीष्विति पूर्वे उत्तरे च गृह्येते। अविशेषाद्बहुवचनाच्च। प्रोष्ठपदोत्तरे एव। अतः सप्तैतानि नक्ष
त्राणि तेषामेकस्मिन्नक्षत्रेऽग्न्याधेयं कर्तव्यमित्यर्थः॥ एतेषां कस्मिंश्चित्॥ एतेषां कस्मिंश्चित्पर्वणि। गम
एवमेतत्सूत्रमर्थतो द्रष्टव्यं। उत्तरं च सूत्रं वसंते [struck] ब्राह्मण आधीतेति। एवं कृते सर्वमनुगुणं ३६

दीपि २

३

भवति। एतेषां नक्षत्राणां कस्मिंश्चिन्नक्षत्रे पर्वणि चाग्न्याधेयं कर्तव्यमितीदं सूत्रं पर्वनक्षत्रस
मुच्चयमग्न्याधेयस्य काले विदधाति। पूर्वसूत्रं तु केवलं नक्षत्राणामेवाधानसंबंधं विदधाति।
अतो द्वौ पक्षावुक्तौ। तत्र समुच्चयः प्रथमः कल्पः। तदसंभवे केवलं नक्षत्रमेवेति विनिवेशो मुख्यः। इदं कल्प
द्वयं सोमाधानवर्जितेषु सर्वेष्वाधानेषु भवति॥ वसंते पर्वणि ब्राह्मण आदधीत॥ इदमपि सूत्रमर्थत
एवं भवति। अनेन वसंते ब्राह्मणगुणकमाधानं विधीयते॥ ग्रीष्मवर्षाशरत्सु क्षत्रियवैश्योपकृष्टाः॥
वैश्यस्तत्क्षकर्मोपजीवी उपकृष्ट इत्युच्यते। अस्मिन्सूत्रे त्रीण्याधानानि विधीयंते। ग्रीष्मे क्षत्रियगुण
कं। वर्षासु वैश्यगुणकं। शरदि उपकृष्टगुणकं च। एते वसंतादयः शब्दा ऋतुवाचकाः। ऋतवो नाम षड्
वसंतग्रीष्मवर्षाशरद्धेमंतशिशिराः। ते च चैत्रमासमारभ्य द्वौ द्वौ मासावृतवो। वसंतादयो मासाश्चैत्रा चांद्राः ४
दय एव॥ यस्मिन्कस्मिंश्चिदृतावादधीत॥ आदधीतेति प्रकृते पुनरादधीतेति वचनं आपत्कल्पोऽयमाधान
विधिरिति दर्शयति। अत्यापदि मुमूर्षोः सर्वेष्वृतुष्वाधानं कर्तव्यं। नैवानाहिताग्निर्म्रियेतेति। इदं चापर
माधानं पूर्वोक्तानि चत्वारि तेषु सर्वेषु पर्वनक्षत्रविधय उपसंहर्तव्याः। न पर्वसु स्वार्त्विज्येनाधानस्य का

सा६

लविधयो न वेयुः। अत एव सूत्रकारः पर्वनक्षत्रविधीनाम् ऋतुविधिभिः संबंधनामेवाधानं कालताप्र
दर्शनार्थमिव। एतेषां कस्मिंश्चिदिति पर्वनक्षत्रसमुच्चयविधिपरेऽस्मिंश्च उत्तरसूत्राय पठितवांश्च ऋतु पठितव्यपर्वशा
ग्राह्यं व्यतिषज्य पठितवान्। पर्वनक्षत्रविध्योर्ऋतुविध्युपसंहारे न्यायविरोधश्च नास्ति। तत्रैव तयो
र्नतर्नविद्दर्शनादिति॥ सोमेन यक्ष्यमाणो नर्तुं पृच्छेन्न नक्षत्रं॥ अद्यैव सोमेन यक्ष्य इति संकल्प्य आधानमिच्छे प४
त्स आधानस्य कालं नावेक्षेत सोमोपक्रमकाल एवादधीतेत्यर्थः। अयमपि मुख्य एवाधानकालः। ऋतु
नक्षत्रनिरपेक्षवचनं पर्वणोरपि प्रदर्शनार्थं। अस्य मूलं यदहरेवैनमिति। सोमाधानस्य विधायिकान् सो श्रुतिः
मस्य तेन वसंतसंबंधित्वं सोमस्य न बाध्यते ऋत्वन्तरकालतानुबाध्यते। सोमाधानयोरानंतर्यविधाना
दिति॥ अश्वत्थाच्छमीगर्भादरणी आहरेदनपेक्षमाणः॥ शम्या गर्भः शमीगर्भः शमीगर्भादश्वत्थादरण्यावाह
रणं कुर्यात्। तत्राधानार्थमाहरणे क्रियमाणेऽध्वर्युणारण्याहरणे क्रियमाणे तेन सह यजमानोऽप्यनेन मंत्रेणा
हरेत्। अनपेक्षमाणः पृष्ठतोऽनवेक्षमाणः। अयं चापरोऽर्थः। कुर्यान्न कुर्यामिति नान्यदपेक्षमाणः। अध्यव शम
सितो नान इत्यर्थः॥ यो अश्वत्थः शमीगर्भ आरुरोह त्वे सचा। तं ते हरामि ब्रह्मणा यज्ञियैः केतुभिः सह ३७

यजमानपक्षे२

वृत्तिकारेण इष्ट्यंतमग्न्याधेयं साधितं। इदमत्रात भाष्यकारेण पूर्णाहुत्यंतं साधितं१

ति॥ पूर्णाहुत्यंतमग्न्याधेयं॥ पूर्णाहुतिरंते यस्य तत्पूर्णाहुत्यंतमग्न्याधेयं कर्तव्यं। तच्चाग्न्याधेयमरण्याहर
णादि पूर्णाहुत्यंतं भवतीत्यर्थः। अस्य सूत्रस्य प्रयोजनं पूर्णाहुत्यंते आहिताग्निव्रतप्राप्तिः कथमिति चेन्न श्रुता ग्नि
वेवमाम्नातं। अग्नयः पुरुषार्थसाधा इति। प्रस्तुत्य वसंते ब्राह्मणोऽग्नीनादधीतेत्येवमादीनि वसंतादिका
लानि ब्राह्मणादिकर्तृकाणि। कर्तृगामिक्रियाफलयुक्तानि निरधिकाराणि आधानानि विधाय ततोऽर
णी आहरेत्। संभारान् संभरेत्। अग्न्यायतनानि कुर्यात्। केशश्मश्रु वपते। ब्राह्मौदनिकमौपासनिकं निद
ध्यात्। तस्मिन् ब्रह्मौदनं पचेत्। समिध आदध्यात्। आयतनेषु संभारान्निदध्यात्। ब्रह्मौदनिकमरण्योः
समारोप्य मथित्वा गार्हपत्यादीनामग्निमादध्यात्। तत्र काष्ठैः समिध आदध्यात्। अग्निहोत्रं जुहुयात्।
पूर्णाहुतिं जुहुयात्। तत आग्नेयमष्टाकपालं निर्वपेत्। तदहरेवान्यदहरादि संवत्सरांतानां कालानां
कस्मिंश्चित्काले पवमानहवींषि निर्वपेत्। ततश्चान्यानि हवींषीति। तथाहिताग्निः क्लिन्नं दारु नाभ्यादध्या
त् इत्यादि आहिताग्निव्रतानि चाम्नातानि। तथाग्निमंत्राणां सिद्धायामग्निहोत्रादीनि नित्यनैमित्तिकका
म्यानि कर्माणि तत्र तत्राम्नातानि। तत्र कस्मिन्नवसरे आहिताग्निव्रतप्राप्तिः। कस्मिन्नवसरेऽग्निहोत्रा

श्रौ० सू०
३८

दीनामारंभ इति। तद्द्विवेकार्थमिदं सूत्रद्वयं। तत्र पूर्वेण सूत्रेण पाक्षुत्यादिभिः प्रकरणरहितैः पंचभिः
प्रमाणैर्यावंतः पदार्था आधानविधिना संबध्यंते तावत्सु समाप्तेष्वाधानसमाप्तिः। आधानसमाप्तौ
चाहिताग्नित्वं तत्प्राप्तिरित्येतत्प्रतिपादयितुं पूर्णाहुत्यंतमित्युक्तवानाचार्यः। उत्तरेण चाग्निहोत्रा
द्यारंभकालं प्रतिपादितवान्॥ यदि त्विष्टय स्तनुयुः॥ अग्नीनेवेति वाक्यशेषः। यद्यनधिकारत्वा
दाधानविधेर्विनियोजकस्य प्रकरणस्याभावात्संभवादाधानांगमिष्टयो न स्युः। इष्टीनां चान
धिकारत्वादिष्ट्यंगमाधानं न स्यात्। तथापि न कश्चिद्दोषः। अग्न्यर्थत्वेनैवोभयोरप्यनुष्ठानसिद्धेः।
नन्विष्टीनामग्निसंबंधाभावादग्न्यर्थतानसंभवात्ती चेत्। न यदाहवनीये जुहोतीति एवमा
दिभिरग्निसंबंधोस्ति। नन्वेष संबंधः साधनत्वेन न दृश्यते। सत्यमेव न दृश्यते। तथाप्याहवनी
यादिष्वग्निषु साध्यत्वबुद्धेरनुवर्तमानत्वादन्यस्य च साध्यस्यानवगमाद्रात्रिसत्रन्यायेनाग्नय
एवेष्टिभिः साध्या इत्येवमाश्रयितुं युक्तं आनर्थक्याश्रयणादधिकारांतरकल्पनाश्रयणाच्चेति। तत्रा राम
धानेनेष्टिभिश्चाग्निसिद्धिर्भवति। न तयोरन्यतरेण। तेन सिद्धमग्निहोत्रादीनामग्निसाध्यानामि ३८

आनर्थक्यादर्थांतराश्रवणाच्चेति पाठांतरं २

आरामाधानात्२

ष्टिष्वप्युत्तरकालमेवारंभ इति। अस्मिन्नर्थे सूत्रयोजना। यद्यासामिष्टीनामाधानांगत्वान्स्या
त्तथाप्याहवनीयाद्यग्निसंबंधात्तानेवाग्नीनिष्टय स्तनुयुः। विस्तारयेयुः। कुर्युः साधयेयुरित्यर्थः।
तु शब्दः स्रुक्साधनादिषु विशेषं द्योतयति। आधानेग्नीनां साध्यत्वेन संबद्धानामेव साध्यत्वं इष्टि
षु साधनत्वेन संबद्धानामपि कल्पनागौरवभयात्साध्यत्वमिति विशेषं द्योतयामः। एवं चाधा
नेनेष्टिभिश्चाग्नय एवांगातः साध्या इति। अनधिकारिणां कथमनुष्ठानसिद्धिरिति न्यायविदामे
ष उपालंभो नास्माकं। अस्माकं तु साध्यसाधनसंबंधेवगते न दर्थिनां कर्तृत्वेनावगतानां ब्राह्म
णादीनां कथंचिदधिकारकल्पनयाप्यनुष्ठानसिद्धिः। अथवानधिकाराणामनन्यशेषाणामपि
तत्साधनसाध्यं रूपेणोपकारकत्वेन कामं श्रुति प्रयुक्त्यैवं विधानामनुष्ठानसिद्धिरित्यलम
तिविस्तरेण॥ प्रथमायामग्निरग्निः पवमानः॥ प्रथमायामिष्टौ द्वे देवते अग्निः प्रथमः के
वलः। द्वितीयः पवमानगुणकोग्निः केवलस्याग्नेर्निर्वाप एव॥ अग्न आयूंषि पवसेग्ने पवस्व स्व
पाः॥ एते द्वितीयस्य पवमानगुणकस्य। सद्दृश्यवालमत्योग्निर्होता पुरोहित इति स्विष्टकृतः॥ सं

॥ याज्येइत्युक्ते सौविष्टकृती प्रतीयात् ॥ सौविष्टकृत्यो यज्यानुवाक्ययोर्वचौ रनेन संयाज्ये इति सं
ज्ञा विधीयते ॥ सर्वत्र देवतागमे नित्यानामपायः ॥ सर्वत्रेति प्रकरणांतरेणांतरेपीति दर्शयति । देवता
गम इत्यत्र समासनिर्देशस्य तुल्यत्वाद्देवतायाः देवतयोर्देवतानां वागम इत्येवं भवति । नित्या
नां प्राकृतीनामित्यर्थः । अपाय उद्धार इत्यर्थः । एतदुक्तं भवति । विकृतौ देवताएकस्या आगमे पा४
द्वयोर्बह्वीनां वागमेपि प्राकृतीनां सर्वासामुद्धार इति यस्यां पुनर्विकृतौ दृष्टिचोदनां कृत्वा देव
तां न विदधाति तत्र नोद्धारः । प्राकृतीनां । तत्र ताश्च देवता भवंतीत्यर्थः । यथाग्नेदितः सोमेन पशुने
ष्या वेत्यादौ ॥ यांस्त्विष्टकृतम्न तराज्यभागौ च । तास्तत्स्थाने ॥ नित्यानामपाय उक्तः । तत्र किं सर्वा नि
त्या उद्धर्तव्या उत काश्चिद्देवेत्येतं संशयं निवर्त्तयति । या आज्यभागौ स्विष्टकृतं चांतरा देवता
यष्टव्यास्ता उद्धर्त्तव्याः । याः पुनर्विकृतौ विहिताः तास्तत्स्थाने उद्धृतानां प्राकृतीनां स्थाने भवं
तीति वचनात् । तद्धर्मिकाश्च भवंतीति गम्यते ॥ एष समानेजातिधर्मः ॥ यो यमतिदिष्टो विधिर्दे राम
वताभ्यो न्यत्रापि स समानजातीयेषु भवति । समानजातीयत्वं कार्यइत्यर्थः ॥ द्वितीयस्यां दधन्वतो । ३९

अग्निः पावकोग्निः शुचिः सनः पावक दीदिवोग्ने पावकरोचिषाग्निः शुचिव्रततमऊदग्ने शुचयस्त्व ॥ एकः पावकगुणोग्निः । अपरः शुचिगुणकः ॥ साक्षान्निधा अग्निर्यजो ग्निमीळे पुरोहितमि
ति संयाज्ये । तृतीयस्यां सामिधेन्या वावपते प्रायुपोत मायाः पृथु पाजा अमर्त्य इति द्वे ॥ आवपेतेइ
ति वचनात् अधिके एते सामिधेन्यौ भवतः । प्रथमस्यां द्वितीयस्यां तृतीयस्यामिति स्वनाद्यस्यामिष्टौ
यत्तंत्रं विहितं तस्यामेकदेवतायामपि तत्तंत्रं भवति । न यथोक्तं नानादेवतायामेवेति ॥ धाय्ये इत्युक्ते
एते प्रतीयात्पृथुपाजा अमर्त्य ... नारयि ... स्फानो अमीवहेति । अग्नीषोमाविंद्राग्नी विष्णुरि
ति वैकल्पिकानि ॥ त्रयाणामेको गृह्यते । अदितिः ॥ अदितिश्चान्या । अस्यां द्वे देवते ॥ उत त्वामदि
ते महिमही मूषु मातरं सुव्रतानामृतस्य पत्नीमवसे हुवेम । तुविक्षत्रामजरंतीमुरूचीं सुशर्माण
मदितिं सुप्रणीतिं ॥ एषा कल्पजा ॥ प्रेद्धो अग्न इमो अग्न इति संयाज्ये विराजाविति उक्ते एते प्रतीयादि
ति निस्वः ॥ इत्येतास्त्रिस्व इष्टयो नुक्रांता इत्यर्थः । उक्तानुकीर्तनमुत्तरार्थं । यदाग्नेय तमेवैवस्यात्ता
मा घावेति पशस्तदापि तिस्रणामिष्टीनां या वत्यो देवतास्ताः सर्वा यष्टव्या इत्येवमर्थं । आग्नेयोत्तमप

अग्नीषोमयोः पुरोडाशोनक याज्यानुवाक्ये प्राक्सेनोपांशुयाजो नैक । इंद्रा
ग्नि विष्णोः ... एवं ... इंद्राग्नी उद्वेः अत्र तु उपांशु तंत्र ग्रहणेन
दोषः ।

श्रौ॰ सू॰
२९

॥ याज्येइत्यक्ते सौविष्टकृती प्रतीयात्॥ सौविष्टकृत्यो यज्यानुवाक्ययोर्चोरनेन संयाज्ये इति सं
ज्ञा विधीयते॥ सर्वत्र देवतागमे निगमा नाम पायः॥ सर्वत्रेति प्रकृत्यन्तरेणान्तरेणेति दर्शयति। देवता
गम इत्यत्र समासनिर्देशस्य तुल्यत्वाद्देवतायाः देवतयोर्देवतानां चागम इत्येवं भवति। निगमा
नां प्राकृतीनामित्यर्थः। अपाय उद्धार इत्यर्थः। एतदुक्तं भवति। विकृतौ देवतायाः एकस्या आगमे पा४
द्वयोर्बह्वीनां वागमेपि प्राकृतीनां सर्वासामुद्धार इति यस्यां पुनर्विकृतौ दृष्टिचोदनां कृत्वा देव
तान्न विदधाति तत्र नोद्धारः। प्राकृतीनां। तत्र ता एव देवता भवन्तीत्यर्थः। यथा गार्दितः सोमेन पशुने
ष्ट्या वेत्यादौ॥ यास्त्विष्टकृत्तमं तराज्यभागौ च। तास्तत्स्थाने॥ निगमा नाम पाय उक्तः। तत्र किं सर्वा नि
त्या उद्धर्तव्या उत काश्चिद्देवेत्येतं संशयं निवर्तयति। या आज्यभागौ स्विष्टकृतं चान्तरा देवता
यष्टव्या स्ता उद्धर्तव्याः। याः पुनर्विकृतौ विहिताः तास्तत्स्थाने उद्दिष्टानां प्राकृतीनां स्थानेन व
र्तीति वचनात्। न हविष्कास्त्र भवन्तीति गम्यते॥ एष समाने जातिधर्मः॥ योयमतिदिष्टो विधिर्दे नाम
ताप्योन्यत्रापि स समानजातीयेषु भवति। समानजातीयत्वं कार्यइत्यर्थः॥ द्वितीयस्यांद्वधन्वं तो। २९

अ१

अग्निः पावको ग्निः शुचिः सनः पावक दीदिवो ग्नेपावकरोचिषाग्निः शुचिव्रततमं उदग्ने शुचय
स्तव॥ एकः पावकगुणो ग्निः। अपरः शुचिगुणकः॥ साक्षान्विष्या अग्निगुणो ग्निमीळे पुरोहितमि
ति संयाज्ये। तृतीयस्यां सामिधेन्या वावपते शायुपोन मायाः पृथुपाजा अमर्त्य इति द्वे॥ आवपेते इ
ति वचनात् अधिके एते सामिधेन्यौ भवतः। प्रथमस्यां द्वितीयस्यां तृतीयस्यामिति वचनाद्युस्यामिष्टौ
यत्तत्रं विहितं तस्यामेकदेवतायामपि तत्तत्रं भवति। न यथोक्तनानादेवतायामेवेति॥ धाय्य इत्युक्ते
एते प्रतीयात्सुसमिद्धं लोवग्निनार यिमश्नवत्पूय स्फानोअमीवहेति। अग्नीषोमा विंद्राग्नी विष्णुरि
ति वैकल्पिकानि॥ त्र्याणामेकोग्रह्यते। अदितिः॥ अदितिश्चान्या। अस्यां द्वे देवते॥ उत त्वामदि
ते महि महीमू षु मातरं सुव्रतानामृतस्य पत्नीमवसे हुवेम। तुविक्षत्रामजरन्तीमुरूचीं सुशर्माण
मदितिं सुप्रणीतिं॥ एषा कल्पजा॥ प्रेद्धो अग्न इमो अग्न इति संयाज्ये विराजाविति कृते एते प्रतीयात्तदि
ति निस्वः॥ इत्येतास्त्रिस्व इष्टयेनुक्रान्ता इत्यर्थः। उक्तानुकीर्तनमुत्तरार्थं। यदाग्नेत मेवैवस्या ता
मा द्यावेति पश्चस्तदापि तिस्रः पामिष्टीनां यावत्यो देवतास्ताः सर्वा यष्टव्या इत्येवमर्थं। आग्नेत मप

अग्नीषोमयोः पुरोडाशेनाकं याज्यानुवाक्ये प्राग्नेनोपांशुयाजोकं। इंद्रा
ग्नि मिश्रोः पूर्वोक्ते एवं प्रोर्द्र प्राग्नीउक्थैः अत्र तु उपांशु तत्र ग्रहणेन
दोषः इ

अजस्रपक्षे त्रयोदशेऽह्नि पौर्णमासी चेत्तदा द्वादशरात्रमजस्रा भवंति। द्वादशेऽह्नि चेत्पौर्णमासी तदानाजस्राः। शाखांतरपक्षः। अथ त्रयोदशेऽह्नि पौर्णमासी चेत्तदा भवंति। न चेत्तु तुर्थे संपद्यमेऽह्नि पौर्णमासी होमपूर्वमग्न्याधानेऽप्यर्थः ३१६

क्षे मध्यमायां देवते ते आद्यायामेव प्रक्षेप्तव्ये। यदा पुनराद्यैव तदा सर्वदेवता आद्यामेव प्रक्षेप्तव्या या
इत्येवमर्थं॥ आद्यांतमेवं वस्थानां॥ इष्टीरिति शेषः। आद्यावा॥ आद्येव वेष्टिर्भवतीत्यर्थः॥ तथा सति त
स्यामेव धाय्ये विराजौ। यदाद्यैव भवति तदा द्वितीयस्तृतीययोरपि देवतास्तत्र भवंतीत्युक्तं। अतस्त
स्यामेव धाय्ये विराजौ च भवतः। धाय्याविराजामनुप्रवेशस्य निमित्तं तृतीयस्यामिष्टेर्देवतानुप्रवेशादित्येवमर्थं तथा सतीत्युक्तं॥ इति मात्रविकारे वैराजतंत्रेति प्रतीयात्॥ पौर्णमासतंत्रायामि
ष्टौ धाय्याविराणमात्रविकारे सतीति सेष्टिर्वैराजतंत्रेति वेदितव्या॥ आधानाद्द्वादशरात्रमजस्रा इ॥ यस्मिन्नहनि पव मानेष्टिसमाप्तिस्तदारभ्य गणनाद्
अत्राधानमिष्टी चोक्ता आधानादूर्ध्वं द्वादशरात्रमजस्रा इत्युक्तं। तस्यायमभिप्रायः। यावता कर्म
समुदायेनाग्नीनां सिद्धिर्भवति तावतः कर्मसमुदायस्याधानशब्दो वाचक इति ज्ञापयितुं। तेना
ग्न्याधेयं पुनराधेयं वेत्यत्र सेष्टिकस्याधानस्य ग्रहणं भवतीति सिद्धं। आधाने नेष्टिभिश्च सिद्धा
अग्नयो द्वादशाहोरात्राणि सर्वस्व रूपेणैव धार्यं तैरेतदजस्रधारणमग्निहोत्रपूर्वमेवाधाने भव
ति। अग्निहोत्रस्यैवानंतरमुच्यमानत्वात् अनुष्ठान[illegible]व कर्मणां व्याख्यानमित्युक्तत्वात्। इष्टि राम ४०

पूर्वे चैं सोमपूर्वे च शास्त्रांतराण्यालोच्य विचारणीयं। तत्रायं विचारः। इष्टिपूर्वेऽजस्रधारणं नास्ति।
आपस्तंबवचनात्। अन्यमाहवनीयं प्रणीयाग्नीनन्वादधातीति इष्ट्यर्थं तयोन्यस्य प्रणयनस्य वि
धानात्। अपहृत्य श्वोभूते पौर्णमासेन यजेतेति अपवर्जनविधानाच्च। तथा सोमपूर्वेपि नास्ति।
तस्माद्दीक्षितो द्वादशाहं भृतिं वमन्वीतेति। प्रकृतौ द्वादशाहदीक्षानियमादुपसद्भिः सुत्यया च सह
षोडशाहानि प्रकृतेः कालः। अजस्रं धारणं तु द्वादशाहपरिछिन्नं। सोममध्ये विहरणस्य चासंभवः।
दीक्षणीया संस्कृतेष्वग्निषु सोमयागविधानात्। अत इष्टिपूर्वे सोमपूर्वे चाजस्रधारणं नास्तीति
सिद्धं। अग्निहोत्रपूर्वेपि यदा वा गिरिष्टिकाला द्वादशाहानि न पर्यंते तदा कथं। तत्रैते पक्षाः। अज
स्रे विष्टिकरणं। इष्टिलोपः। यथासंभवमजस्रधारणं। अजस्रलोप इति। तत्र यथासंभवमजस्र
धारणमिति पक्षो दुर्भणः। तथाविध्यभावात्। द्वादशाहकालविशिष्ट एवासौ विधिः श्रू
यते। नान्यकालविशिष्ट इति। तथेष्टिलोपपक्षोपि न संभवति। अग्निमन्नायां सिद्धायां पौर्णमा
सकालआगते। तदनारंभे प्रमाणाभावात्। अक्रियायां प्रायश्चित्तोपदेशाच्च। एवं चेदजस्रधर्मो

आ॰ सू॰ सत्यमविशिष्टं तथाप्याधानानंतरं धारणविधेः प्रवृत्तत्वा २

४१

र्णमासो भवतु कोदोषः। उक्तो दोषः। स्वार्थ एव प्रणीते त्वाधानदर्शनात्। अपवर्जनविधानाच्चेति।
नन्वग्निहोत्रमपि स्वार्थ एव प्रणीत आहवनीये भवति। अथ यथायथाग्निं प्रणयतीत्यस्याविशि
ष्टत्वात्। तद्वस्त्वेष्वेवाग्निहोत्राधिकारस्य प्राप्तस्य त्यागे प्रमाणाभावात्। तेष्वेवाग्निहोत्रहोमो युक्तः।
एतमेव न्यायमनुसृत्योक्तं भगवतापस्तंबेन। द्वादशाहमजस्रे अग्निं धुक्ष्यमाणः स्वयमग्नि
होत्रं जुहुयादिति। तथा प्रणीते चेदग्निहोत्रकाल एतस्मिन्नेवाग्निहोत्रं जुहुयादेवमन्यत्रापि
प्रक्रांतेतंत्र इति। अग्निहोत्रस्यान्यार्थेष्वपि प्रवृत्तिदर्शनान्नात्रायं दोष इति गम्यते। अतः अग्निहो
त्रस्यान्यार्थेष्वपि प्रवृत्तिदर्शनादाधानानंतरमग्निहोत्रस्यानन्यार्थादाहवनीयासंभवात्तदजस्रे
ष्वेवाग्निहोत्रहोमो न विरुध्यते। पौर्णमास्याः पुनर्दर्शाद्वोत्तरकालवर्तिन्याः स्वार्थाहवनीय
संभवादजस्रेषु तस्याः प्रवृत्तिर्विरुध्यते। अतोऽजस्रेष्विष्टिकरणमित्ययमपि पक्षो न संभवति।
नन्वजस्रलोपपक्षे प्याधानाद्द्वादशरात्रमजस्रा इति नित्यवदाम्नानं विरुध्यते। न विध्यंतरे। राम
अस्य नित्यत्वासंभवात्। उक्तं हि। इष्टिपूर्वं सोमपूर्वं वा प्रवृत्तिकरणमिति। तस्मादपि विध्यंत ४१

ना ना

रानुपरोधेन प्रवृत्तिदर्शनात्। प्रकरणे च प्रायश्चित्तान्याम्नानाह। अग्निमिन्धिषये अजस्रलोपे रवत्रे
यानिति स्कंधुक्तं॥ अत्यंतं नु गतश्रियः॥ अत्यंतं यावज्जीवमित्यर्थः। गतश्रियस्त्रयो वै गतश्रिय इतिश्रु
तत्वुक्ताः। गतश्रियामग्नयो यावज्जीवमजस्रा भवंति। न द्वादशरात्रवेति॥ द्वितीये प्रथमः खंडः॥१॥ उत्स मे
र्गेऽपराह्णे गार्हपत्यं प्रज्वाल्य दक्षिणाग्निमानीय विहृत्यादित्ते वतो वैकयोनयप्रद्रस्ये केधिप्रमाणं वा
प्रज्वल्याहरणीमंतं वा मथित्वा गार्हपत्यादाहवनीयं ज्वलंतमुद्धरेत्॥ उत्सर्गे अजस्रोत्सर्गे अग्निहोत्र
होमार्थं विहरेत्। नाजस्रेषु होमस्तेष्वजस्रेष्वपि नवतीत्युक्तं। एवं स्थिते विहरणासहिते मग्निहोत्रप्र
योगं वक्तुकाम उत्सर्ग इत्युक्तवान्। अत्रापराह्णग्रहणेनाह्नश्चतुर्थभागो गृह्यते। विहरणकाले गा
र्हपत्यं प्राउद्धृत्य प्रज्वाल्य दक्षिणाग्निं वैश्यकुलाद्वानयेत्। चतुर्णां वर्णानामन्यतमस्य द्रव्यवतो वागृहा
निस्य त्। गार्हपत्याद्वा धार्यश्चेत्प्रज्वलयेत्। काले काले यदि निर्मंथ्यः स्यात्तदा मंथेत्। एवं प्रकाराणामुत्पत्तिवृत्ता
ह्यवस्था। तेषामन्यतमप्रकारेण दक्षिणाग्निं साधयित्वा ततो गार्हपत्याज्ज्वलंतमग्निमाहवनीयार्थ
मुद्धरेत्। पात्रांतरेणापृथक्कुर्यादित्यर्थः। रवंतादेतेभ्यः श्रियमउद्धरामीत्युद्धरेत्॥ अनेन मंत्रेणाग्निहोत्रा

र्थमुद्धरेत्। पूर्वस्योद्धरेदिति वचनस्येदं प्रयोजनं। गार्हपत्यं प्रज्वाल्येत्यादेराहवनीयं ज्वलंतमुद्धरेदित्ये
तस्य मंत्रवर्जितोद्धरणप्रकारस्य सर्वार्थत्वज्ञापनं॥ एवं सर्वार्थमुद्धरणं विदधता तेन साधितं भवति। येनाग्निना
प्रयोजनं तत्र तस्योद्धरणं कर्तव्यमिति। शास्त्रांतरे स्पष्टवचनमस्ति। अथर्वयाज्ञा गोऽग्निं प्रणयतीति।
उद्धरणमंत्रोयमग्निहोत्र एव नान्यत्रेति सिद्धं॥ उद्ध्रियमाण उद्धर पाप्मनो मा यद्‌विद्वान्यच्चाविद्वांश्च
कार। अहा यदेनः कृतमस्ति किंचित्सर्वस्मान्मोद्धृतः पाहि तस्मादिति प्रणयेत्॥ प्रणयेत्साजुहुयात्।
अग्निमाहवनीयं प्रत्यनेन मंत्रेण॥ अमृताहुतिममृतायां जुहोम्यग्निं पृथिव्याममृतस्य योन्यै। त
यानंतं कामेमं दंजयानि प्रजापतिः प्रथमो यं जिगायाग्नावग्निस्वाहेति निदध्यादादित्यमभिमुखः॥
आदित्याभिमुखो भूत्वानेन मंत्रेणाहवनीयायतने ऽग्निं निदध्यादित्यर्थः। एवं प्रातरुद्धरणे तमेवाभिमुखः॥
एवमेवास्तं गतेर्थमप्यादित्यं आहवनीयनिधानं तं कुर्यात्। तमेवाभिमुखो निधीयमानमाहवनीयमभिमु
खः इत्यर्थः। एवं सति प्रातःकाल आहवनीयायतनात्पश्चादवस्थितेन निधानं भवति। सायं तु पुर
स्तात्स्थितेन। व्युष्टायामुषसि उदितायामादित्योदयात्प्राक्॥ गत्वा यदेनश्चेति तु प्रणायेत्॥ प्रणायनमंत्रे

अहा यदेन इत्यस्य स्थाने रात्र्या यदेन इति कर्तव्यं प्रातःकाले॥ अत ऊर्ध्वमाहिताग्निर्व्रतचर्यामाहिता॥
सत्रिधर्माश्चामुमस्य व्रतान्यत्र व्रतशब्दो नोच्यते। विहरणादूर्ध्वमग्निहोत्रहोमप्रयोगसमाप्तेर्ब्रह्मचारी भ
वत्याहिताग्निः॥ अनुदिते होमी चोदयात्॥ अनुदितहोमी चेत्समाप्तेपि प्रयोगे आ उदयाद्व्रतचारी भवेत्॥
अस्तमिते होमः॥ अस्तमिते होमः कर्तव्यः। अंगान्यपि प्रधानकाले कर्तव्यानि यत्पुनरंगं विहरणवत्स्व
कालविशिष्टं तत्स्वकाल एव कर्तव्यं॥ नित्यमाचमनं॥ उक्तं प्राङ्मुखस्याचमनं यत्पुरस्तात्तदिदानीं कर्त
व्यमस्यां वेलायां॥ ऋतं सत्येनाभ्युक्षामीति जपित्वा पर्युक्षेत्त्रिस्त्रिरेकैकं पुनः पुनरुदकमादाय॥
पर्युक्षणमंत्रोपि जपित्वा पर्युक्षेदिति पृथक्क्रियते। पर्युक्षणाति दिष्टेपि सकृदेव मंत्रो मा भूदिति। त्रि
रेकैकमित्येतावतैवैकैकस्याग्नेस्त्रिस्त्रिः पर्युक्षणे सिद्धे त्रिस्त्रिरिति वीप्सावचनं मंत्रस्यापि त्रिरावृत्ति
र्भवतीत्येवमर्थं। पुनः पुनरुदकमादायेति वचनं सकृद्गृहीतेन त्रिः पर्युक्षेदित्येवमर्थं॥ आनंतर्यं विक
ल्पः॥ अग्नीनां पर्युक्षणादिषु कर्तव्येषु केनानंतर्येण कर्तव्यमित्यानंतर्यविशेषे ज्ञातव्ये ऽनेन सूत्रेणा
 ग्नीनामुत्पत्तिक्रमस्य च विकल्पो विधीयते॥ दक्षिणांत्येव प्रथमं विज्ञायते पिता वा एषोऽग्नीनां यद्दक्षि

णः पुत्रो गार्हपत्यः पौत्र आहवनीय इत्या...वं पर्युक्षेत॥ पर्युक्षणेऽप्ययमेव क्रमः दक्षिणाग्निं गार्हपत्य
माहवनीयमिति। तत्र श्रुतिमेव हेतुमुपन्यस्यति तस्मादेवं पर्युक्षेदित्युपसंहृतं तेन पर्युक्षणातिदिष्टे परि
समूहनेऽप्ययमेव क्रमः। अन्यत्र पूर्वोक्तो विकल्पः। अन्यत्रापि विनिवेशाः प्रधानात्सर्वेषामुत्पत्तिक्रमः। परे पि
षां प्रधानक्रम इति॥ गार्हपत्यादविच्छिन्नामुदकधारां हरेत्त्वंतु तन्त्वन्तरसोऽनोनुमन्विदीत्याहवनीया
त। अयमाकाशेमयदित्यामन्युपघातविरोधात्॥ पश्चाद्गार्हपत्यस्योपविश्योदङ् गाशानपोह्लेसु
ङ्कुतह्रु तस्येसुङ्कृतं करिष्यतीति॥ पश्चाद्गार्हपत्यस्यतूष्णीमेव दक्षिणोत्तरिणोपस्थेनोपविश्य गो
र्हपत्यात्कतिपयानंगारानुदकू पृथक्कुर्यादधिश्रयणार्थं॥ तेष्वग्निहोत्रमधिश्रयेदधिश्रितमध्यधि
श्रितमधिश्रितं हिङ्कृ इति॥ तेष्विति पृथक्कृतेष्वंगारेष्वित्यर्थः। अग्निहोत्रमिति होमसाधनभूतं
द्रव्यमुच्यते॥ इडायास्पदं घृतवच्चराचरं जातवेदो हविरिदं जुषस्व। ये ग्राम्याः पशवो विश्व
रूपास्तेषां सप्तानां मयि पुष्टिरस्त्विति वा॥ अनेन वा मंत्रेणाधिश्रयेत तूष्णीं वेति विकल्पविधिः॥ न राम
दध्यधिश्रयेत। अधिश्रयेदित्येके॥ अधिश्रयेदिति वेत्येवाव तेव सिद्धे गुरुसूत्रकरणं न्यायविकल्पो य ४२

गेश माणा भावात् तदस्यागे संस्कार्यस्वरूपाविनाशात्संस्कार्यसंपादकत्वात्संस्कारस्य २

मिति प्रदर्शनार्थेनो। अत्रैके आचार्याः प्रवृत्तिपरत्वाच्छास्त्रस्य कार्यस्यावानीड्यत्वाद लोपमाहुः।
आचार्यस्तु कार्यार्थत्वात्प्रवृत्तेः। कार्यस्य बहुदृष्टस्य त्यालोप एवात्र श्रेयानित्याह॥ पयसा नित्यहो
मः॥ नित्यश्चासौ होमश्च नित्यहोमः। स पयसा कर्तव्यः। अकामस्याग्निहोत्रहोमः पयसा कर्त
व्य इत्यर्थः। कामानुपदेशादेवास्य नित्यत्वे सिद्धे नित्यग्रहणार्थं॥ यवागूरोदनो दधि सर्पिर्ग्रामि मुत्तरा ४
कामान्नाद्यकामेन्द्रियकामतेजस्कामानां। यथासंख्येन ग्रामकामादीनां यवाग्वादीन्यग्निहोत्र
होमद्रव्याणि भवंति। ग्रामकामः प्रसिद्धः। अन्नं च तदाद्यं च अन्नाद्यं खाद्यान्नकाम इत्यर्थः। इन्द्रि
यं श्रोत्रं चक्षुरादीनिवा। तेजस्तु विः। नित्यहोम इत्यत्रापि संबध्यते। तेन पुरुषार्थैरपि क्रियमा
णो होमो नित्य एव स्यान्न कामार्थः। होमाश्रितानि द्रव्याण्येव कामाश्रितानि भवंतीति॥ अ
धिश्रितमवज्वलयेत्॥ अधिश्रितग्रहणात् अधिश्रितमात्र एवावज्वलयेन्न कालविक्षेपः कर्त
व्य इत्यवगम्यते॥ अनधिश्रयं दध्यान्येन तेजोमहावमिति॥ न अधिश्रयो यस्य तत् अनधिश्र

यं।अधिश्रयरहितमपि दधि अवज्वलयेदित्यर्थः।सर्वत्रावज्वलनमंत्रोयं अग्निष्टे तेज इति।दधि
वेत्यो तावते वसिष्ठगुरुसत्रकरणं व्रीह्यादीनामपक्वानां संग्रहार्थं॥स्रुवेण प्रतिषिंच्यान्ववाचाॅतिर
स्कृतमेसीति॥पयसा होमे दोहनपात्रप्रक्षालनं स्रुवेणाहवनीयं तेन प्रतिषिंचेत्।अग्निहो
त्रद्रव्यं अन्यत्रोदकेनैव शांतिरिति मंत्रेण नवा प्रतिषेकः कर्तव्यः॥तयोर्व्यतिवारः॥तयोः प्रतिषेका
प्रतिषेकयोरित्यर्थः।व्यतिवारो संकरः एकस्मिन्ननुरूपइत्यर्थः।एकः सर्वदा प्रतिषिंचेत्।अपरः सर्व
दा न प्रतिषिंचेदित्यर्थः॥पुनर्ज्वलिता परिहरेन्निरंतरितेंतरसो नरिताअवान्तयइति॥पुनर्वच
नाद्येनोल्मुकेनावज्वलनं कृतं तेनैव परिहरणं कुर्यादिति गम्यते॥उल्मुकादानं गार्हपत्यादेवन
श्रपणात् श्रपणार्थं पृथक्कृतस्य पुनः प्रक्षेपविधानात्।अन्यत्र कार्यार्थं पृथक्कृतस्य कार्यपरिसमाप्तौ
त्यागएव कर्तव्यः।तेनावज्वलनार्थं पृथक्कृतं अवज्वलने कृते पृथगेव निधाय तेनैव परिहरणमपि कृ
त्वा त्यजेत्॥समुदंतं कर्षन्निव गादुद्वासयेदिवेलांतरिक्षायत्वा पृथिव्यै त्वेति निदधत्॥सम्यगुद्
तः अंतो यस्य द्रव्यस्य तत्समुदंतं द्रव्यं परितः स्थालीसंबंधप्रदेशांत इत्युच्यते।यदा पच्यमानं पय राम ४४

द्व्यस्य१

एवमवस्थं भवेत्।तदा कर्षन्निवोदगुद्वासयेत्।कर्षन्निवेति मंदगत्येत्यर्थः।निदधदिति त्रिभिर्मंत्रैस्त्रि
र्निधानं कुर्वन्नवतारयेत्।प्रथमद्वितीयाभ्यां भाकाशे धृत्वा तृतीयेन भूम्यां निदध्यात्॥सुकृतं कु
तस्य सुकृतमकार्ष्टत्यं गारानतिसृज्य स्रुक्स्रुवं प्रतितपेत्प्रत्युष्टं रक्षः प्रत्युष्टा अरातयो निष्ट
प्तं रक्षो निष्टप्ता अरातय इति॥अतिसर्गो अंगाराणां गार्हपत्ये प्रक्षेपः।उत्तरतः स्थाल्याः स्रुवमा
साद्योमुन्नयानीत्यतिसर्जयीत॥स्थाल्या उत्तरतः स्रुवमासाद्य स्रुवं हस्तएव संनोमुन्नयानी
त्यनेन मंत्रेणाहिताग्निमतिसर्जयेत्॥आहिताग्निराचम्यापरेणवेदिमतिव्रज्य दक्षिणत उप
विश्येत्युन्नयेत्यतिसृजेत्॥विहरणकालएवाहिताग्निरध्वर्युः पत्नीच स्नातस्वाम्यती
र्थेन प्रविशंति।तत्राध्वर्युर्विहरणं कृत्वा होमकाले प्राप्ते निष्क्रम्य प्रक्षु स्वं आचम्य तीर्थेनैव प्रविश्य
पर्युक्षणादि कुर्यात्।पत्नी तु गार्हपत्यस्य दक्षिणत आस्ते।आहोमपरिसमाप्तेः।आहिताग्नि
स्त्वाहवनीयविहरणकाले दक्षिणत उपविश्य उद्धराहवनीयमित्यध्वर्युं संप्रेष्य निष्क्रान्त।ततो होमका
ले प्राप्ते निष्क्रम्य प्राङ्मुख उदङ्मुखो वाचाम्य तीर्थेनैव प्रपद्यापरेण वेदिदेशं पूर्वेण गार्हपत्यं दक्षि

४५ यान्निं च गत्वा वेदेर्दक्षिणत उपविशेत्। उपविष्टः सन् तदनि सर्जनवाक्यं अनुलोमुन्नयेत्यति स्रजेत॥ अतिसृष्टोन्तरितो जुवइत्यास्व रिलाद्यथइल्लेति स्रुवमग्रमुन्नयेत॥ अतिसृष्टइति वचनं प्रवसति य जमानेस्वेनैवातिसृष्टउन्नयेत। नानतिसृष्टइत्येवमर्थं। चत्वारएते मंत्राः समस्ताः संसर्गिणां अत उक्तं अनु क्र लाउन्नयेत। स्रुवमग्रमितिया सुनल्प्रत्यययोगाद्॥ अग्रमग्रमिति उन्नयनं भेददर्शनस्य। स्रुवमग्रमिति स्रु वमग्रथित्वा प्रथयित्वेत्यर्थः। अत्र पंचमं मंत्रस्याभावात्संवावचितानां तस्मीमेव पंचममुन्नीयते। उद्धृत विनियोग ध र्मत्वाद्वेदान विनियोगसंबंधस्य॥ अग्नामग्र्यं मर्णति मंयोनुज्येष्ठमृद्धिमिच्छेत् पुत्राणां॥ यो यजमानः स्व वंशानुसारेण मनः पुत्राणामृद्धितारतम्यमिच्छेत्। तस्य सर्वः सर्वः पूर्णतमोन्नयेत। अनेक पुत्रस्यायं का म्यः कल्पः। न त्वेक पुत्रस्यैव॥ योस्य पुत्रः प्रियस्यान्तं प्रतिसर्णमुन्नयेत॥ प्राकृतानामेव पंचानां स्रु र्वावाएकं स्रुवं प्रियपुत्रं ध्यात्वा पूर्णमुन्नयेत। अयमपि काम्यः। अयमेक पुत्रस्याभिन्नवति॥ स्थालीम भिन्नत्वय समिधं स्रुवं वाध्यधिगार्हपत्यं हृत्वा प्राप्य समितामाहवनीयसमीपे कुशेषूपसाद्य जा वाम
न्वाच्य समिधमादध्यादुज्जतां त्वाग्निज्योतिषां राचिमिष्टकामुपदधस्वाहेति॥ स्थाल्यां स्रुवेण स्रु ४५

स्रुं नयनं कृत्वा स्थालीमभिमृश्य स्रुवा स [ink blot] मिधं च गृहीत्वाध्यधिगार्हपत्यं गार्हपत्योपरि समीपं हृत्वा आहवनीयस्य वेदीय सिनाग्निकासं निधायाहरेत। हृत्वा तस्य पश्चाद्दूरे कुशेषूपसाद्य दक्षिणं जानु निपात्यैतां २
समिधमादध्यात् उज्जतामिति मंत्रेण। समिधमाधाय विकृदसि विद्यमे पाप्मानमस्मोरिहृतस्य पञ्च प स्टस्य प्रदीप्तांर्ध अंगुलमात्रे भिजुहुयाद्भूर्भुवस्स्वरोमग्निर्ज्योतिर्ज्योतिरग्निः स्वाहेति॥ समिधमाधा येत्युच्यते समिदाधानधर्मस्य जानुनिपातनस्यानुवृत्त्यर्थं। समिधमाधायेत्यनेनैव समिदुद्रहणेन सर्वस्त्रे आदध्यादित्येवोक्तोपि समिध एवाधाने सिद्धेयत्सर्वसत्रे समिदुद्रहणं करोति। न ज्ञापयति यत्र यत्र समिधमा दध्यात्तत्र तत्र जान्वाच्यादध्यादिति। विकृदसीत्यपउपस्टस्य प्रदीप्तां समिधं मूलतो द्व्यंगुलमात्रे जुहु यात् भूर्भुवः स्वरोमिति मंत्रेण॥ सर्वामाहुतिं हुत्वा कुशेषु सादयित्वा गार्हपत्यमवेक्षेत पश्चान्मय ले ति॥ हुत्वेति वचनं निपातितजान्वुरेवोत्तरमपि कुर्यादित्येवमर्थं। सर्वमिति वचनं पूर्वाहुत्युत्तरकालीनं स्रुवं सादयित्वेव कुर्यात। उत्तराहुत्युत्तरकालीनं स्रुगधस्त एव कुर्यादित्येवमर्थं। अथोत्तरां तूष्णीं नूयसीमसंसृष्टां प्रत्युदगुत्तरतो वा॥ अथेत्यानंतर्यस्वनेन सर्वाहुत्योत्तराहुतेः संबंधः क्रियते। तेन जा

धा० वृ०
४६

न्वाख्येत्यस्यानुवृत्तिर्लभ्यते। प्राधान्यं चोत्तराहुतेः अतः पूर्वाहुतौ हुतायां द्रव्यदोषे सति उत्तराहुत्यर्थं द्र
व्यमुत्पादयितव्यमेव। भूयसी पूर्वाहुतेः भूयो द्रव्यां असंसृष्टां पूर्वयाहुत्या प्रागुदक् पूर्वाहुतेरुत्तरतो वा
तस्याः एव॥ प्रजापतिं मनसा ध्यायन् तूष्णीं होमेषु सर्वत्र। यत्र तूष्णींशब्देन विशिष्टो होमश्चोद्यते त
त्र प्रजापतिं देवतां ध्यायेत्। देवतासाध्यत्वाद्धोमस्य। ध्यानत्वादेव मानसत्वे सिद्धे मनोग्रहणं चारुध्या
नार्थं। तेन चतुर्थ्यन्तं प्रजापतिशब्दं ध्यात्वा तदनन्तरं स्वाहेत्येकपदं हित्वा जुहुयात्। होमेष्विति बहुवच
नादेव प्रकरणादुत्कर्षेऽसिद्धे सर्वत्रग्रहणं गार्ह्येष्वपि प्रापणार्थं॥ भूयिष्ठं स्रुक् विशोष्याविरूपक्र
प्यावमृज्य कुशमूलेऽधुनि मार्ष्टि पशुभ्यस्त्वेति॥ उत्तराहुतेर्भूयिष्ठं भूयो द्रव्यं पूर्वाहुतेर्भूयिष्ठं
यथा भवति तथा भक्षार्थं स्रुक् विशोषयेत्। पूर्वाहुत्यर्थं प्रक्षिप्ताद् द्रव्यादुत्तराहुत्यर्थं भूयो भवति। तस्मा
दपि भूयो भक्षार्थं भवति। तत्पूर्वाहुत्यपेक्षया भूयिष्ठमित्युच्यते। भूयिष्ठं द्रव्यं स्रुचि शोषयित्वा स्रुक्त
मेवाहुतिदेशात्स्थानं प्रकम्पयेत्। ततः स्रुगतलेपं पाणिनाधोमुखेनावमृज्य पाणिगतं लेपं कुश याम
मूलेष्वुनि मार्ष्टि निमृजेत्। पशुभ्यस्त्वेति॥ तेषां दक्षिणत उत्तानाभ्यामङ्गुलीः करोति प्राचीनावीती ४६

तूष्णीं स्वधा पितृभ्य इति वा॥ तेषां कुशमूलानां दक्षिणत उत्तानामङ्गुलीर्निदध्यात्। प्राचीनावीती भू
तूष्णीं त्वा स्वधा पितृभ्य इति मंत्रेण वा॥ अपो विनिनीय॥ एतावदेव सूत्रं। अपश्च कुशमूलानां दक्षिणतो
निनयेत्। अवाचीनेन पाणिना। एतावत्स्रुग्घस्त एव करोति। एवं वा। तेषां करोति। प्राचीनावीती॰
निनीय॥ वृष्टिरसि वृश्च मे पाप्मानं नमस्तु ऋग्द्धात्य पशुपस्तथ्य॥ इदमपि सूत्रमेतावदेव। निधाय
स्रुवं पशुपस्थानोत्॥ आदितामग्निमनुमंत्रयेत॥ अधिकारोयं॥ आधानमुक्तं तेन रूपिणा तेन ब्रह्म-
णा तया देवतया गिरस्वदग्र्वासीदेति समिधं॥ समिदाधानमंत्रेण तेन च क्षिप्त्वा नेन मंत्रेणाव समिध
मधीयमानामनुमंत्रयते॥ ता अस्य सूददोहस इति सर्वामाहुतिं॥ एतयर्चा सर्वामाहुतिमनुमंत्रयते॥
उपोत्थाय नरांकांसे तेक्षमाणो भूर्भुवः स्वः सुप्रजाः प्रजाभिः स्यां सुवीरो वीरैः सुपोषः पोषैः॥ इ या३
तिकाराध्याहारेणास्य सूत्रच्छेदः। उत्तराहुते हूयमानायां दीपातः कांतमसमीपे स्थिला कराशेणेक्षमाणस्तामे
वाहुतिमनुमंत्रयते। कांसेन चाद्वः कृताक्षलवनश्च। केचित्तूत्तराहुतिमीक्षमाणोनुमंत्रयते॥ तन्मंत्राभिहिता
कामान्कांक्षेत चेति वर्णयंति॥ आग्नेयीभिश्च॥ याभिः काभिश्च यत्राभिराग्नेयीभिरुत्तरामेवाहुतिम

८३

श्रौ० सू०
४७

नुमंत्रयते॥ अग्न आयूंषि पवस इति तिसृभिः॥२॥ संवत्सरे संवत्सरे॥ पूर्णे पूर्णे संवत्सरे एताभिर
धिकाभिः सकृदनुमंत्रयेत॥ यद्यग्न्याधेयं सा वा स्वयं पर्वणि जुहुयात्॥ यद्यग्न्याधेयं साध्वौ स्वयं पर्वणि
यां· पौर्णमास्याममावास्यायां च सायंप्रातर्यजमानः स्वयमेवाग्निहोत्रं जुहुयात्। अस्मिन्सूत्रे पर्वणि द्रव्यनियमः
स्वयं कर्तृनियमश्च विधीयते। स्वयं होमे समिधमनुमंत्रयति इदं कृदसीति पूर्वामाहुतिमनुमंत्र्य पश्चान्नेय
छेत्तरामाहुतिमनुमंत्र्य वृष्टिरसीत्येवं क्रमो भवति। यत्किंचिदग्निहोत्रद्रव्यं काम्यं वैकल्पिकं वा प्रयुज्य
ते सायमुपक्रम्य प्रातरपवर्गं प्रयुज्यते। नान्यथेति। प्रतिनिधिस्त्वेकप्रयोगपर्यवसाय्येव॥ ऋत्विजामेकः
तरं कालं॥ ऋत्विजामेकः कश्चिदृत्विगितरस्मिन्काले अग्निहोत्रं जुहुयात्॥ अंतेवासी वा॥ इतरस्मिन्का वा ५
लेग्निहोत्रं जुहुयादिति शेषः। अंते समीपे वसतीत्यंतेवासी स पुनः पुत्रः शिष्यो वा। अत्र किंचि
दुच्यते। ऋत्विजस्त्रिविधाः। देवभृताः पितृभृता मनुष्यभृता इति। ये कर्माणि कर्मणि क्रीयंते ते देवभृ
अ तान्वे यायताः ऋत्विजास्ते पितृभृताः ये लोकस्य पुरुषस्य सर्वाणि कर्माणि कुर्वंति क्रीयंते ते मनुष्यभृताः। राम ४७
तत्र यस्याहिताग्नेः पितृभृता मनुष्यभृता वा ऋत्विजः संति तेषामृत्विजामेकः कश्चिदपर्ववर्जितेषु

कालेषु जुहुयात्। यस्य देवभृतास्तस्यांतेवास्येवेति विनिवेशः॥ स्व प्रोदकमुदङ्ङावृत्य भक्षयेत॥ उक्त
मेवोदकोपस्पर्शनं कुलादुदगावृत्य स्रुग्यातं शेषं भक्षयेत। उक्तसंकीर्तनमाहिताग्न्यधिकारेस्त्वपि
क होमेर्त्वप्रापणार्थं। अपरेयो वा जुहुतो॥ भक्षयेदिति शेषः॥ आयुषे त्वा प्राश्नामीति प्रथमं। अन्नाद्या
यत्वेत्युत्तरं॥ प्रथमं उत्तरमिति भक्षयोः संबंधकरणार्थं। तेनोत्तरस्यापि मंत्रस्य प्राशनार्थता भवति॥
तूष्णीं समिधमाधायाग्नये गृहपतये स्वाहेति गार्हपत्ये जुहुयादित्यध्याहारः। तूष्णीं ग्रहणमाहवनी
ये समिदाधाने होमे स्वयं येध मंजानुनिपातनं प्रदीप्ताभिहोमो द्व्यंगुल्याभिहोमश्च तेषां प्राप्तिस्त्वनार्थं।
नित्योत्तरः॥ उत्तराहुतिं तूष्णीं भूयसीमित्येवमुक्तेत्यर्थः॥ तूष्णीं समिधमाधायाग्नये संवेशपतये
स्वाहेति दक्षिणे। अग्नये अन्नादायान्नपतये स्वाहेति वा॥ मंत्रविकल्पोयं॥ नित्योत्तरा॥ गतार्थमेत
त्॥ भक्षयित्वाऽन्यात्मपः स्रुचा निनयति त्रिः सर्पदेवजनेभ्यः स्वाहेति॥ भक्षयित्वेति वचन
भक्षणानंतरमेव निनयनमपि स्यादित्येवमर्थं। अन्यात्मपः स्रुचा निनयते इति। अतः संस्का
रकर्मत्वान्मंत्रोपि त्रिरावर्त्तते॥ अथैनां कुशैः प्रक्षाल्य चतस्रः पूर्णाः प्रागुदीच्योर्निनयेद्द्भ्यः

स्वाहादिभ्यः स्वाहा सप्तऋषिभ्यः स्वाहा हेतरजनेभ्यः स्वाहेति॥ अक्षय्यिलेतिवचनं लक्षणानीत्र
एमेवनिनयनमपि स्यादित्येवमर्थं। अन्यात्ममपः स्रुचा निनयतु इति अत्र संस्कारकर्मत्वात् मंत्रोपि विवक्षित
तनि। अथेनां कुशेः प्रक्षाल्य प्रागुदीच्योर्दिशोर्दर्भेषु स्वाहादिभ्यः स्वाहा सप्त
ऋषिभ्यः स्वाहा हेतरजनेभ्यः स्वाहेति॥ अथेतस्यात्मनिनयनानंतरमेवइदमपि कर्तव्यमिति दर्शयति।
एनां स्रुचमित्यर्थः। विहारस्य प्रागुदग्देशे ओषधीः शनश्चितस्त्र स्रुचो निनयेत्। एकैकेन मंत्रेणैकैकामि
ति॥ पंचमं कुशादि शेषं पृथिव्याममृतं जुहोम्यग्नये वैश्वानराय स्वाहेति। षष्ठीं पश्चाद्गार्हपत्यस्य
प्राणममृतं जुहोम्यमृतं प्राणे जुहोमि स्वाहेति। अथेतस्यात्मनिनयनानंतरमेवेदमपि कर्त
व्यमिति दर्शयति। एनां स्रुचमित्यर्थः। विहारस्य प्रागुदग्देशे ओषधीषु तत्र स्रुचो निनयेत्। एकैके
न मंत्रेणैकैकामिति॥ पंचमीं कुशादि शेषं पृथिव्याममृतं जुहोम्यग्नये वैश्वानराय स्वाहेति॥ पंचमीं ष
ष्ठीमिति एनां स्रुक् स्रुचं प्रत्युपार्थं। प्रताप्यांतर्वेदि निदध्यात्। प्रतपनमाहवनीये अंतर्वेदिशब्दसमन्व राम
यात्। प्रताप्य स्रुचमेंतर्वेदि दर्भेषु निदध्यादित्यर्थः॥ परिकर्मिणे वा प्रयच्छेत्॥ परिचारकः परिकर्मीत्यु ४८

च्यते॥ अग्रेणाहवनीयं परीत्य समिधमादध्यात् स्वस्ति स्वस्त्यु दश्रवस्ति स्वस्ति॥ पूर्वेणाहवनीयं विहा
रस्य दक्षिणदेशं गत्वा तस्य तस्याग्नेर्दक्षिणतः उदञ्चुखस्तिष्ठन्निति स्वस्ति स्वस्त्यादध्यात्। पुनः प्रत्येत्य
पर्युक्षणादि कुर्यात्। प्रथमां समंत्रां॥ सह मंत्रेणेति परिभाषा प्रधानकर्मसु न प्रवर्तत इति कृत्वा प्रथमां
समंत्रामित्युक्तवानाचार्यः॥ आहवनीये दीदिहीति गार्हपत्ये दीदायेति दक्षिणे दीदिदायेति। सर्वे स्वाहा
कारांताः कर्तव्याः। उक्तं पर्युक्षणं॥ यदुक्तं पर्युक्षणं तदिहापि कर्तव्यं॥ ताभ्यां परिसमूहने॥ पूर्वोक्तमि
दं च द्वे पर्युक्षणे ताभ्यां परिसमूहने व्याख्याते इति॥ धर्मातिदेशाद् एकोर्थः। परिसमूहने इति योगविभा
गात् स्वरूपसिद्धश्च भवति। धर्मातिदेशाद् एकोर्थः। परिसमूहने इति योगविभागात् स्वरूपसिद्धश्च भव
ति। मंत्रस्तु अपि लेलेति पृथक्करणान्न भवति लिंगाभावाच्च॥ पूर्वे तु पर्युक्षणात्॥ ये द्वे परिसमूहने पर्यु
क्षणधर्मके विहिते तयोरनेन क्रमो विधीयते। पर्युक्षणाभ्यां पूर्वे परिसमूहने भवत इति॥ एवं प्रातः॥
सायंकालेग्निहोत्रविधिरुक्तः। एवं प्रातःकालेपि होमः कर्तव्य इत्यर्थः। तत्र विशेषमाह॥ उपोदयं व्यु
षिते उदिते वा। उपोदयमादित्योदयसमीप इत्यर्थः। व्युषिते उषस्युदित इत्यर्थः। उदित आदित्ये

उले कृत्स्न उदित इत्यर्थः॥ एते त्रयः प्रातर्होमप्रधानकालाः। तत्र यथापोदयमुदित इत्युच्यते। नुदित
आदित्ये सति उदयसमीपवर्तिभ्यां पदाभ्यामेक एव कालो विहितः स्यात्। तद्भ्रांतिनिवृत्त्यर्थं व्युषि
तवाक्यान्तरं व्युपोदयवाक्यं पठितवानाचार्यः। एतेषु त्रिषु कालेषु प्रधानं यथा संपद्यते तथांगानामे
वोत्कर्षापकर्षौ इत्यर्थः॥ सत्यऋताभ्यां त्वेति पर्युक्षणीमेषमुन्नेष्यामीत्यतिसर्जनं हरिणीला सूर्योज्यो
तिषमद्दृरिष्टकासु पदधस्याहेति समिदाधानं भूर्भुवः स्वरों सूर्यो ज्योतिर्ज्योतिः सूर्यः स्वाहेति
होममंत्रो मार्जनं च। एते प्रातर्होमविशेषाः॥२॥ प्रवत्स्यन्नग्नीन्प्रज्वाल्यावक्ष्यातिक्रम्योपतिष्ठते॥ य
स्मिन्ग्रामेऽग्नय आसते तस्मात्प्रदेशाद्ग्रामांतरे एकरात्रावमोवासः प्रवासः। तं करिष्यन्प्रवत्
स्यन्भवति। अग्नीनिति बहुवचनात्सर्वान्विहृत्य प्रज्वलयेत्। प्रज्वाल्यावक्ष्यतीर्थदेशेन प्रप
द्यातिक्रम्याग्नीनुपतिष्ठते। अतिक्रम्येति अध्वर्योपस्थानदेशमतिक्रम्य समीपं गत्वावंतम
ग्निमुपतिष्ठत इत्यर्थः। इदं कर्माहिताग्निः स्वयमेव कुर्यात्। इमंमनेनेत्याह। आहवनीयं दाम ४९
व्रांस्य पशून्मे पाहीति। गार्हपत्यं नर्य प्रजां मे पाहीति दक्षिणमथर्य पितुं मे पाहीति गार्हप

त्याहवनीयावीक्षेते मान्मे मित्रावरुणौ गृहान्गोपायतं युवं॥ अविनष्टान्विहृतान्पूषेनान्नि
रक्ताऽस्माकं पुनरायतनादिति॥ दक्षिणाग्निमुपस्थाय तत्रैव तिष्ठन्गार्हपत्याहवनीयावीक्षेत।
ति इमान्मे मित्रावरुणाविति। उत्तरत्र यथेतं प्रत्येतिवचनात्तत्रैव तिष्ठन्निति लभ्यते। द्विवचनलिंगाद्द्वग
पदे वीक्षेत। यथेतं प्रत्येत्य प्रदक्षिणं पर्येत्याहवनीयमुपतिष्ठते। मम नाम प्रथमं जातवेदः पिता मा
ता च दधतुर्यदग्रे। तत्त्वं बिभृहि पुनरा मदैतोस्तवाहं नाम बिभराण्यग्ने इति॥ आहवनीयमु
पस्थायोत्तरेण विहारं गत्वा गार्हपत्यस्य प्रत्यक्प्रदेशोत्थं तत्समीपं गत्वा तमुपस्थाय तद्देवक्लि —
ष्टाद्दक्षिणाग्निमुपस्थाय तत्रैव तिष्ठन्गार्हपत्याहवनीयेक्षणं कृत्वा पुनस्तेनैव मार्गेणाहवनीय
समीपं गत्वा ततो मम नामेत्यप्रदक्षिणमावर्त्तमानः आहवनीयमुपतिष्ठते मम नाम प्रथमित्यने
नमंत्रेण॥ प्रव्रजेदनपेक्षमाणो मा प्रगामेति सूक्तं जपन्॥ दृष्टो ग्नीनपेक्षमाणो मा प्रगामेतिसू
क्तं जपन्यथेष्टं गच्छेत्। सूक्तग्रहणमनभ्यासार्थं॥ आरादग्निभ्यो वाचं विसृजेत्॥ अग्निभ्यो दू
राद्गत्वा वाचं विसृजेत्। यावद्गृहेऽग्न्यागारछदिर्न दृश्यते तावदाराद्देशोऽच्यते। अत्र वाग्विसर्गवि

धानादितः प्राक् यतवागेव सर्वं कुर्यात् ॥ सदा सुगः पितुमां अस्तु पंथा इति पंथानमवरुध्य ॥
ब्रूयादिति शेषः । योग्निर्वितदेशगामी पंथास्तं प्राप्येत्यर्थः ॥ अनुपस्थिताग्निश्चेत्प्रवासमा
पद्येत देवसं तत्र संतत्याग्ने हृदा वाचा मनसा वा बिभर्ति । तिरोमा संतं मा प्र हासीर्ज्योति
षा त्वा वैश्वानरेणोपतिष्ठत इति प्रतिदिशमग्नीनुपस्थाय ॥ यदि कदाचिद्यथोक्तोपस्थान
मकृत्वैव गंतव्यं स्याद्दैवान्मानुषाद्वा निमित्तात्तदा तत्रैव स्थित्वा तद्देवसं नियमेन नमंत्रेणोत्स
त्तिक्रमेति शेषः । प्रवासं कृत्वा प्रत्येत्य स्वग्रामस्समीपं प्राप्यापि पंथामगन्म हीति ब्रूयात् ॥ स
मित्पाणिर्वाग्यतो [illegible] उच्छन्तं नु अभिक्रम्याहवनीयमीक्षेत ॥ विश्वदानीमाभरंतो नातु
रेण मनसा । अग्ने मा ते प्रतिवेशा रि[illegible]षाम । नमस्ते अस्तु मीढुषे नमस्त उपसद्वने । अ
ग्ने अंजनस्व तन्वः संभारस्यास्वजेति ॥ यतवाक् समिधो गृहीत्वा पुत्रैः शिष्यैर्वा सह प्रस्थापि
तेनाग्नीन्विहृतांश्चलंतश्च ज्वालास्वयमादिताग्नि रायम[illegible] चिरूढाती थेन प्रपद्यत ततः कदे
शादेत्यं समीपदेशमभिक्रम्याहवनीयमीक्षेत विश्वदानीमिति द्वाभ्यां मंत्राभ्यां । अग्निमु ग्राम ५०

ण तं तमग्निं ध्यात्वा तां तां दिशमग्नीनुपस्थाय गच्छेत् ॥ [illegible] प्रत्येत्य । ब्रूयादिद्

समिध उपनिधायाहवनीयमुपतिष्ठते । मम नाम तव च जातवेदो वाससी इव विवसानौ ये
चराव । तावि आयुषे वर्चसे जीवसे च यथायथं नौ तन्वौ जातवेदा इति ॥ इदानीमानीताः समि
धो विभज्य तस्य तस्याग्नेः समीपे निधाय तत आहवनीयमुपतिष्ठते । मम नाम तव चेत्यनेन मं
त्रेण ॥ ततः समिधोभ्यादध्यात् ॥ उपनिहिता एवास्मिन्नादध्यात् ॥ आहवनीये गन्म विश्वावेदस ने
मस्मभ्यं वसुवित्तमं । अग्ने सम्राळभि द्युम्नमभि सह आयच्छस्वेति गार्हपत्ये यमग्नि
र्गृहपतिर्गार्हपत्यः प्रजाया वसुवित्तमः । अग्ने गृहपतेभि द्युम्नमभि सह आयच्छस्वेति
ति । दक्षिणे यमग्निः पुरीष्यो रयिमान्पुष्टिवर्धनः । अग्ने पुरीष्याभि द्युम्नमभि सह आय
च्छस्वेति । गार्हपत्यादाहवनीयादीक्षेत मान्मभित्रावरुणौ गृहान् जुगुपतं युवं । अविन
ष्टान्विहुतान्पूषैनानभ्येहरादाक्षीदास्माकं पुनरायतनादिति ॥ दक्षिणाग्निसमीपे स्थित इदमुक्त
कं । यथेतं प्रत्येत्य ॥ परिसमुह्योदग्विहारादुपविश्य भूर्भुवस्स्वरिति वाचं विसृजेत । पूर्वो विभिस्सु
[illegible]नेर्भे । यथेतं प्रत्येत्य सर्वस्य विहारस्य परिसमूहनं कृत्वा तस्योत्तरतः उपविश्य वाचं विसृजेत भूर्भुवः स्वरित्य
नेन ॥

असत्यपि प्रवासनिमित्ते एवं प्रयोगक्रमः। सति तु निमित्ते यथेतं प्रत्येत्य नैमित्तिकं कृत्वा परि
समूहनवर्ज्यं विसर्गं कुर्यात्। एवमेवसूत्रस्वरूपं विविच्यं। प्रोष्य न यो दशरात्रात् चतुर्गृहीतमाज्यं
मे॰ जुहुयान्मनो ज्योतिर्जुषतामाज्यं विच्छिन्नं यज्ञं समिमं दधातु। या इष्टा उषसो याश्च निम्रुचस्ताः
संदधामि हविषा घृतेन स्वाहेति॥ दशरात्रादूर्ध्वं प्रवासं कृत्वा जुहुयात् चतुर्गृहीतं गृहीत्वा तया जुहु
यात्। मनो ज्योतिरित्येतयर्चा। चतुर्गृहीतग्रहणादेवाज्यद्रव्यसिद्धौ सत्यामाज्यग्रहणं तूष्णीमुत्प
होत्र वनार्थं॥ अग्निहोत्रहोमे च॥ अग्निहोत्रहोमे विच्छेदे चैतामाहुतिं जुहुयात्। विशेषाभावात् एक
स्य द्वयोर्बहूनामपि विच्छेदे एषैव प्रायश्चित्तिः कार्या। अतिहोमे च॥ चशब्दो ध्याहार्यः। एता
च माहुतिं हुत्वा प्रतिहोमं कुर्यादित्यर्थः। प्रतिहोमो नाम यावतः कालाद्धोमेन विच्छिन्नस्तावतामे
कैककालं प्रत्येकैको होमः कर्तव्य इति। एवं परिसमूह्येत्यादि पूर्वमेव व्याख्यातं॥ गृहानीक्षे
ताप्यनाहिताग्निर्गृहामाबिभीतोपवः स्वस्त्यं वोस्मासु च प्रजायध्वं मा च वो गोपतीरिषदिति। ग्राम
प्रपद्येत गृहानहं सुमनसः प्रपद्ये वीरघ्नो वीरवतः सुवीरान्। इरां वहतो घृतमुक्षमाणास्ते ५१

ष्वहं सुमनाः संविशानीति शिवं शग्मं शंयोः शंयोरिति त्रिरनुवीक्षमाणः॥ ईक्षणं प्रपदनं चानाहि
ताग्निरपि कुर्यात्। गृहामाबिभीतेतीक्षेत। गृहानहमिति प्रपद्येत। प्रतिपद्यमानः एवं प्र
पद्येत शिवं शग्मं शंयोः शंयोरिति त्रिरनुवीक्षमाणः अनुवीक्षणमनुमंत्रणं। मंत्रेणाप्र
काशानं। तत्तु न मंत्रेण विना कर्तुं शक्यत इति। मंत्रोपि चिरावर्तनं॥ विदितमप्यलीकं नत
प द्दर्शयेयुः॥ अलीकमप्रियमवगतमप्रियं प्रवासादागतस्य तस्मिन्नहनि न निवेदये
युः॥ विज्ञायते नयं वो नयं योस्त्वित्येवा पतिष्ठेत प्रवसन्प्रत्येत्य याहवेति॥ वागत्यश्च वा बुस्या
र्थे। अनयं वः त्सनेन प्रवत्स्यन्प्रवासादागतश्चाहरहरग्निहोत्रहोमेउपतिष्ठेतेति श्रुतिरेषो
पन्यस्ता विज्ञायत इति। अस्मिन्पक्षे प्रयोगक्रमः। विहृत्य प्रज्वल्याचम्य तीर्थेन प्रपद्य तत्रैवस्थि
त्वा सर्वानग्नीन्सकृदेवोपस्थाय प्रदक्षिणमावृत्य तीर्थेनैव निष्क्रम्य ग्रामं ग्राममेति जपन्प्र
कज्य सदा सुग इति पंथानं प्राप्य ब्रूयात्। प्रत्येत्यापि पंथामिन्द्र क्रा विहृत्य ज्वलितान्तीर्थेनैव प्र म
पद्य तत्रैव स्थित्वा अनयं वः इत्युपस्थाय परिसमूहनादि प्राग्वत्। अतिप्रवासोक्तिचेतन स्यने

व्यतिक्रममपि कुर्यात्। अग्निहोत्रहोमेव दक्षिणाग्निहोमानंतरं अनयैव ऋचोपतिष्ठेत। एतोकस्यानुमं
५२ त्रणास्या याजमानत्वादस्य चोपस्थानत्वान्न विकल्पः। तेन समुच्चय एव। अनुपस्थिताग्नेः प्रवासः इ
हैवसं नित्यवद्देव नन्यो किंचित्॥४॥ अमावास्यायामपराह्णे पिंडपितृयज्ञः॥ अमावास्याशब्दः प्रतिप
त्संधिवचनोऽपेत्रापराह्णशब्दसमन्वयात् तद्युक्ताहोरात्रे वर्त्तते। तस्यापराह्णो अहश्चतुर्थ
भागे पिंडपितृयज्ञः कर्त्तव्यः। औपवसथ्ये ह्नि यजनीये वाह्नि। यजनीये चेत्तदर्थं दक्षिणाग्निः प्रणी
यते। यदा पुनरहोरात्रसंधौ तिथिसंधिः स्यात्तदौपवसथ्य एवाह्नि क्रियते॥ दक्षिणाग्नेरेकोल्मुकं
प्राग्दक्षिणा प्रणये ये रूपाणि प्रतिमुंचमाना असुराः सन्तः स्वधया चरन्ति। परापुरो निपुरो ये
भरंत्यग्निष्टाँल्लोकात्प्रणुदात्यस्मादिति॥ एकोल्मुकं एकतः प्रदीप्तमुल्मुकं प्राग्दक्षिणा प्राग्दक्षि
णस्यां दिशीत्यर्थः। दक्षिणाग्नेः सकाशादेकोल्मुकं गृहीत्वा तस्मादेव प्राग्दक्षिणस्यां दिशि प्रणये
त्। ये रूपाणीत्यनेन मंत्रेण॥ सर्वकर्माणि तां दिशं॥ अतऊर्ध्वं दीक्षादिकानि सर्वाणि कर्माणि तामेव प्राग्द रा.म
क्षिणां दिशमभिमुखत्वानि कर्त्तव्यानि॥ तमुपसमाधायोद्धो परिस्तीर्य दक्षिणाग्नेः प्रागुदक्प्रत्यगु ५२

उ५२ दर्भैरेकैकशः पात्राणि सादयेच्चरुस्थालीं शूर्पस्फ्योलूखलमुसले स्रुवं स्रुचं कृष्णाजिनं सकृदाच्छि
न्नेध्ममेक्षणं कमंडलुं॥ उभयोरपि समाधानं परिस्तरणं च कर्त्तव्यं मध्यगतस्योभाविति शब्दस्य वि
शेषसंबंधे कारणाभावात्। पात्राणीति चरुस्थाल्यादीन्युच्यंते। तेन शब्देन संशयवदानार्थं चरुश्रपणा
र्थं स्थाली चरुस्थाली। चरुस्थालीश्रूपादयो शब्दाः प्रसिद्धाः। एकेन प्रयत्नेन छिन्नाः कुशाः सकृ
दाच्छिन्नाः॥ दक्षिणतोऽग्नेः समारुह्य चरुस्थाल्यां व्रीहीणां पूर्णां निर्मृज्येत्॥ निर्मृज्यादिति प्राप्ते निर्मृज्येदि
ति छांदसः। अग्निसमीपेति ऋतीत्यग्निसंज्ञाकृतं। प्रयाणकाले वाग्नयो यत्र तिष्ठंतीति। तदग्निष्ठं दक्षि
णात आरुह्य तत्रैव शूर्पे स्थालीं निधाय व्रीहिभिरापूरयेत्। तां पूर्णां निर्मृज्यात्। यथोपरितना व्रीहि ल
देवाच्छूर्पोपरि पतंति॥ परिवीनां निदध्यात्॥ स्थाल्यस्य देशाच्छूर्पोपरि पतंति तान्यस्मिन्नां कटे सं४
निदध्यात्। कृष्णाजिनं उलूखलं कृत्वा तेनान्यत्र वहन्या दवि वेधं॥ कृत्वा निधायेत्यर्थः। इतरा स्थाल्यां
त्यंतगंतानित्यर्थः। अविक्लं। अविविच्येत्यर्थः॥ अवहतान्सकृत्प्रक्षाल्य दक्षिणाग्नौ श्रपयेत्॥ अव
हतेष्वअवहतवचनं फलीकरणनिवृत्त्यर्थं दक्षिणाग्नौ श्रपयेदिति श्रपणवचनं वचनाद्धतेगा

५३ ईपत्य एवश्रपणामितिज्ञापनार्थं॥ अर्थामिति प्रणीतास्प्येन लेखामुल्लिखेद पहता असुरा रक्षां
सि वेदिषद इति॥ दक्षिणाग्नयति प्रणीतयो रंतराळ उल्लिखेदित्यर्थः॥ तामभ्युक्ष्य सकृदाछिन्नेन ब
र्हीषा सादयेत्। निधाय स्थालीपाकमाज्यं सर्पिस्तुत्सनेन नवनीतं वोत्तरतं ऽऽ कवायामाज्यं कुलाद्दक्षि
णतः॥ आज्यं सर्पिरित्यादि कवायामाज्यं कुलाद्दक्षिणत इत्येवमंतः प्रदसमूहः। आसादयेदभिघार्येत्य
तो स्मात्पुरस्तादर्थद्वित्वं तेनायमर्थः। तां लेखामभ्युक्ष्य सकृदाछिन्नैर्बर्हिः यद्यपि सर्पिर्गृहीत्वा कवायां
कुलाद्दक्षिणतो दक्षिणाग्नेर्निधाय तेनाज्येन स्थालीपाकमभिघार्य दक्षिणाग्नेः पश्चादासादयेत्।
यदि नवनीतमाज्यकार्यार्थं स्यात्तदास्य विलीयनमात्रं कृत्वान्यस्मिन्पात्र आनीय पवित्राभ्यां हस्तीकुल
यततो कवायां कुलाद्दक्षिणतो दक्षिणाग्नेर्निधाय तेनाभिघार्येत्यादि समानं द्वितीयाज्यग्रहण
स्येदं प्रयोजनं। पात्रांतरस्थमुत्पूय पश्चात्कवायां ग्रहणमित्येवमर्थं। सर्वमाज्यग्रहणं कार्यलक्षणा
र्थं। सर्पिः पक्वं नवनीतमपक्वं॥ दक्षिणत आंजनाभ्यंजनकशिपूपबर्हणानि॥ दक्षिणत इत्यत्रापि सं राम
बध्यते। विशेषाग्रहणादपेक्षितत्वाच्च। आंजनादीनि वं दक्षिणतो दक्षिणाग्नेर्निदध्यात्। सर्वसत्रे ५२

अथ यथाक्रमेणास्त्रप्रणयनं। दक्षिणत इत्यस्योभयार्थत्वाच्च। प्राचीनावीती ध्ममुपसमाधाय मे
क्षणेनावदायावदानसंपदा जुहुयात्सोमाय पितृमते स्वधा नमो ग्नये कव्यवाहनाय स्वधा नम इ
ति॥ इध्मः पंचदशासंस्कृतः। मेक्षणेनादाय तेनैव जुहुयात्। अवदानसंपदा अवदानसंपन्नामत्र प
स्तरणां द्विरवदानं प्रत्यभिघारणं च। सकृदभूतं जुहुयात्। नात्र स्वाहाकारः स्वधा नम इत्यस्य प्रदा
नार्थत्वात्॥ स्वाहाकारेण वाग्निं प्रथमं यज्ञोपवीती॥ स्वधा नमः शब्दस्य स्थाने स्वाहाकारं कृत्वा जुहुयात्। ५ हुत्वा
अस्मिन्पक्षे मंत्रविपर्ययः व्यत्यासः। यज्ञोपवीतत्वं च भवति। अग्निं प्रथममिति। अग्नये कव्यवाहनायेत्ये
तं मंत्रं पूर्वं कुर्यादित्यर्थः॥ मेक्षणमनुप्रहृत्य प्राचीनावीती लेखां त्रिरुदकेनोपनयेत् शुंधंतां पितरः
शुंधंतां पितामहाः शुंधंतां प्रपितामहा इति॥ प्राचीनावीती ग्रहणं स्वाहाकारपक्षेपि मेक्षणा
नुप्रहरणोत्तरकालं प्राचीनावीतित्वप्रापणार्थं। अन्यस्मिन्पक्षेपि मेक्षणमग्नावनुप्रहृत्य एव
व॥ त्रिभिर्मंत्रैस्त्रिर्निनयेत्। पिंडस्थानेषु॥ तस्यां पिंडान्निपृणीयात् सव्यावीनपाणिः पित्रे पितामहा
य प्रपितामहायेति ते तेसौ ये च त्वामत्रान्विति॥ अधि कृतायां लेखायां लेखासंप्रत्ययार्थं तस्यां ग्रह

५४ णं क्रियते। नाधिकाराल्लुप्तः संबंधोऽस्तीति ज्ञापनार्थं। तेन द्विरासादनमग्नेः पश्चादिति साधितं
भवति। तथैवोक्तं च निपृणीयाद्दद्यादित्यर्थः। निपरणीपित्र्ये पैतृतीर्थेन प्राणेरुत्तानलमज दद्दे वृपि
त्र्येणातीर्थेन यदा कुर्यात्तदा प्राचीनपाणिर्भवति। असावित्यस्य स्थाने संबुध्यंतानि पित्रादीनां ना
मानि गृह्णीयात्॥ तस्मै तस्मै य एषां प्रेताः स्युरिति गाणगारिः प्रत्यक्षमितरानर्चयेत्तदर्थत्वात्॥ त्र
याणां मध्ये प्रेतानां पिंडदानं जीवानां प्रत्यक्षार्चनमिति गाणगारेर्मतं। पितृप्रीत्यर्थत्वात्कर्मण इ
ति। सर्वेभ्य एव निपृणीयादिति तौल्वलिः क्रियागुणत्वात्॥ पित्रादिभ्यस्त्रिभ्यः प्रेतेभ्यो जीव
द्भ्यश्च सर्वेभ्यो निपरणं तौल्वलिर्मन्यते। क्रियायामुद्देश्यकारकत्वेनत्वगुणभूताः पितरस्तेते
षां प्रीतिः शास्त्रतो लोकतोऽवगम्यत इति॥ अपि जीवांतेऽत्रिभ्यः प्रेतेभ्य एव निपृणीयादिति
गौतमः क्रियाया ह्यर्थकारिता॥ आदिमध्यांतशब्दैः पितृपितामहप्रपितामहा उच्यंते। जीवः अं
तो यस्य सः जीवांतः अपिशब्देन जीवादिर्जीवमध्य इति लभ्यते। जीवसर्व इति चैत्रयाणामे राम
कस्मिन्द्वयोः सर्वेषु वा जीवत्सु यावदर्थं परानपि हुत्वा गृहीत्वा प्रेतेभ्यस्त्रिभ्यो दद्यादिति ५४

न३
गौतमो मन्यते क्रियाया ह्यर्थकारिता। मरणपदार्थप्रवृत्तत्वाद्यस्मात्क्रियेत्यर्थः॥ उपायविशेषो जीव
मृतानां॥ पित्रादीनां जीवतां मृतानां च पिंडदाने उपायविशेषो वक्ष्यत इत्यर्थः। उपन्यस्तान्पक्षान्दूष
यितुमाह॥ न परेभ्योऽधिकारात्। न प्रत्यक्षं न जीवेभ्यो निपृणीयात्॥ गौतमगाणगारितौल्वलीनां
क्रमेण दूषणानि॥ न जीवांतादिनेभ्यः॥ जीवव्यवहितेभ्यो न दद्यादित्यर्थः। ~~कचिद्विध्यभावात्~~ सर्व नि४
पक्षव्यापी दूषणं। सर्वत्रानधिकारादित्ययमेव हेतुः। अनधिकारादयोग्यत्वादित्यर्थः। क
चिद्विध्यभावात्क्वचिन्निषेधादयोग्यत्वमवगम्यते। अथ मृपायविशेष उच्यते॥ हुत्वा जीवेभ्यः॥
जीवेभ्यो हुत्वा ये तेभ्यो निपृणीयादित्यर्थः। न जीवंतमतिदद्यादित्यत्रापि निषेधोक्तिः।
तेन जीवत्पितुर्जीवत्पितामहस्य जीवोऽन्यस्य वायमपि पक्षो नास्ति तत्र होमांतमन्वारंभोक्त।
अथ सर्वेषु जीवत्सु कथमित्याह॥ सर्वहुतं सर्वजीविनः॥ सर्वहुतमिति सर्वैः पिंडा होतव्या इ
त्यर्थः। पिंडहोमो निपरणमंत्रेण। स्वाहाकारांतेन कर्त्तव्यः। अत्र दूषणीयपक्षाणामुपन्यासे प्र
योजनं। सपिंडीकरणे पितामहे जीवद्देऽपि पितरि संवत्सरादिषु कालेषु तस्यावश्यकर्त्तव्यत्वात्
मृते

तेषां पक्षाणां मुपप्रयोग इत्येवमर्थः। एवमग्न्याद्यादीन्यन्यान्यपि प्रयोजनानि विचिंत्यानि॥ नामान्यवि
द्वांस्तत पितामह प्रपितामहेति॥ पित्रादीनां नामाज्ञाने तत्वादयः शाख्यानामस्थाने प्रयोक्तव्याः॥
निपृतानानुमंत्रयेतात्र पितरो मादयध्वं यथाभागमावृषायध्वमिति॥ निपृत्तानिति प्राप्ते निपृता
निति छांदसो निर्देशः। निपृत्तान् पिंडाननुमंत्रयते न हुतानित्येवमर्थं निपृतानित्युच्यते तेन
सर्वहोमद्रव्यमनुमंत्रणं न भवति। अस्मिन्प्रकरणे यद्यपि पिंडानामेवानुमंत्रणं मुपस्थानं प्रमादत्वा
च विधीयते। तथापि मंत्राणां पितृलिंगत्वात्पिंडाएव पितर इति कृत्वा पितॄनेव तैर्मंत्रैरभिधात
व्याः॥ सव्यावृदुदङ्ङावृत्य यथाशक्त्यप्राणं नाभितानिष्ठ्य पर्यावृत्यामीमदंत पितरो यथाभाग
मावृषायीषतेति॥ अनुमंत्रयेतेति शेषः। सव्यावृदुदङिति सव्येनावर्तेन सव्यावृदुदङ्मुखत्वयोः
सिद्धयोरावृत्येति वचनं मावृत्ये वोच्छ्वासो न पूर्वमिति। एतदर्थं यथाशक्त्यप्रभुत्वं नाभितानुनरभि
पर्यावृत्यामीमदंतेत्यनुमंत्रयते। आवृषायीषतेति। यकारः पवितव्यः। यात्किंचिद्युक्तिः प्रमाद राम
जा॥ चरोः प्राणभक्षं भक्षयेत॥ तूष्णीमेवात्र भक्षणं कार्यं॥ नित्यं निनयनं॥ उदुदको पनय ५५

नस्तुक मुंधंतां पितर इत्यादिमंत्रकं। तदत्र निनयनमित्युच्यते तदत्र कर्तव्यमित्यर्थः। अवनावभ्यं
ज्यासावंजस्वेति पिंडेष्वभ्यंजनांजने॥ दद्यादिति शेषः॥ वासो दद्याद्दशामूर्णास्तुकांवा पंचाशद्व
र्षतायाः॥ ऊर्ध्वं स्वलोमेयद्वः पितरो मानो तोन्यत्पितरो युंक्ष्वमिति॥ एतेषामन्यतमं द्रव्यं वासो
र्थे पिंडेषु दद्यादित्यर्थः। दशा वस्त्रस्यांतप्रदेशाः। ऊर्णास्तुकां वा अवि लोमानि। पंचाशद्वर्ष
तायाः पंचाशद्वर्षेभ्यो तीतेषु ऊर्ध्वं जीवन्स्वीयमेव लोम वासोर्थे दद्यात्। मंत्रस्त्वयमेव सर्वेषु
द्रव्येषु सकृदेव भवति॥ अथैनानुपतिष्ठेत नमो वः पितर इषे नमो वः पितर ऊर्जे नमो वः
पितरः शुष्माय नमो वः पितरो घोराय नमो वः पितरो जीवाय नमो वः पितरो रसाय स्व
धा वः पितरो नमो वः पितरो नमस्तानुष्माकं पितर इमा अस्माकं जीवा वो जीवंत इह सं
तः स्याम इति॥ इतिकाराद्याध्याहारेणास्त्रच्छेदः। संतः स्यामेति मंत्रः पवितव्यो वकारं वर्जयित्वा॥
मनो न्वाहुवामह इति तिसृभिः॥ उपतिष्ठेतेति शेषः॥ अथैनान्प्रवाहयत्यपरेतन पितरः
सोम्यासो गंभीरेभिः पथिभिः पूर्विणेभिः। दत्तायास्मभ्यं द्रविणेह भद्रं रयिं च नः सर्ववी

रं नियच्छतेति॥ अत्रापि पिंडस्थान्यित्व प्रवाहयेत्॥ अग्निं प्रत्येयादग्ने तमद्याश्वं न स्तोमैरिति॥
प्रत्येयादितिवचनसामर्थ्याद्दक्षिणामुखेनात्र किंचिदनुव्रजनं कर्त्तव्यं। अग्निं प्रत्ये॰ मैरिति। अवि
शेषेणैव वचनाद्दक्षिणाग्निमेव। इतरयोर्विशेषाभिधानात्॥ गार्हपत्यं यदंतरिक्षं पृथिवीमुत द्यां यन्मा
तरं पितरं वा जिहिंसिम। अग्निर्मा तस्मादेनसो गार्हपत्यः प्रमुंचतु॰ करोतु मामनेनसं॥ इति प्रत्ये
यादिति शेषः॥ वीरं मे दत्त पितर इति पिंडानां मध्यमं॥ आददीतेति शेषः॥ पत्नी प्राश्नीयादाधत्त पि
तरो गर्भं कुमारं पुष्करस्रजं। यथायमरपा असदिति॥ तमेव मध्यममिति शेषः। मध्यमेव मंत्रं ब्रू
यादाधत्तेति॥ अप्स्वितरौ॥ प्रक्षिपेदित्यर्थः॥ अतिप्रणीते वा॥ प्रक्षिप्य दाहयेत्॥ यस्य वागंतुरन्न
काम्याभावः स प्राश्नीयात्॥ आगंतुरग्निर्न वा निर्निमित्त एवान्नेच्छाभावो यस्य स वैतरौ प्राश्नीया
त्॥ महारोगेणाभिभूतः प्राश्नीयादन्यतरां गतिं गच्छति॥ क्षयकुष्ठादिना रोगस्य परिहारेणाति
पीडितः प्राश्नीयादिति पुनर्वचनं पूर्वेणास्य संबंधनिवृत्त्यर्थं। तेनान्यतरामित्यत्रैव न भवति। अ
न्यतरां गतिं गच्छतीत्ययमर्थः। सद्य एवारोगो जीवेत म्रियेत वेति॥ एवमनाहिताग्निर्नित्ये। अ

नाहिताग्निरप्येवं पिंडपितृयज्ञं कुर्यात् नित्ये औपासने इत्यर्थः॥ श्रपयित्वाति प्रणीय जुहुयात्॥
तस्यायं विशेषः। हविः श्रपणं कृत्वाति प्रणयनं कर्त्तव्यं। तस्यैवाति प्रणीतस्योपसमाधानं परि
स्तरणं च कृत्वा ततो वर्गमिति प्रणीतादित्यादि समानं। जुहुयादित्ययमनुवादः। अयं चात्र विशेषः य
दंतरिक्षमित्यस्मिन्मंत्रे गार्हपत्यशब्द ऊहुर्नयः। तच्छब्दप्रवृत्तिनिमित्तस्य संस्कारस्यात्राभावा
दिति॥ द्विवत्पात्राणामुत्सर्गः॥ द्विशब्द इत्यर्थः॥ ल्वणां द्वितीयमुद्दिक्ष्य॥ एकस्यातिरिक्तस्य हपोन
द्वित्वसंपाद्योत्सर्गः कर्त्तव्य इत्यर्थः॥ ५॥ दर्शपौर्णमासावारप्स्यमानोन्वारंभणीयां॥ पूर्वं दर्शपूर्णमा
सयोः स्वरूपमात्रमुक्तं। इदानीं तयोरनुष्ठानारंभ उच्यते। इदानीं तावदारप्स्यमानस्यान्वारंभणी
याविधानात्॥ यस्मादाधानानंतरमग्निहोत्रं पिंडपितृयज्ञानुष्ठानयोरारंभ उच्यते। तस्मा
देतत्साधितं भवति। पौर्णमास्यामाधानमिष्टिं च कृत्वा ततोऽग्निधारणमग्निहोत्रहोमं च कृत्वामावा
स्यायां पिंडपितृयज्ञं च कृत्वा पौर्णमास्यां तयोरारंभ इति। तत्र यदा पर्वत्वेन वचनं पौर्णमास्यां तु पूर्व
स्मिन्पर्वणि सेष्टिमान्वारंभणीयमपहृत्य श्वोभूते पौर्णमासेन यजत इति। अस्यायमर्थः। पौर्णमा

५७ स्यामादध्यात्तक्रादहरेव पौर्णमासीमारभेतेति। तस्यायं विषयः। यस्यां पौर्णमास्यामन्वारंभणीया
पर्यंतं सर्वं प्रतिपद्यते। संधिक्षणात्प्रागेव कर्तुं शक्यते सास्य विषयः। संध्यनपगमात् पौर्णमा
स्यधिकारप्राप्तिरिति। एकस्मिन्नहनि यत्र उत्तरस्मिन्क्षणे दर्शपूर्णमासावारभते स तस्मात्पूर्वस्मि
न्क्षणे तावारप्स्यमानूद्रक्ष्यते। तस्यामन्वारंभणीया कर्तव्या। सेयं पुरुषार्था न कर्मार्था। क्रत्वादी
नामभावात्। दर्शपूर्णमासावारप्स्यमान इत्यनेन न च कर्मसंबंधो वक्तुं शक्यते निमित्ततयाधिका
रिविशेषणत्वेन तु पक्षयाल्लउद्देशकं न भवितुमर्हतीति। तस्मादनंगं तयोरन्वारंभणीया। तथा
पि तस्याः पुरुषसंबंधात् तयोरेवाधिकारित्वेन पुरुषं संपादयतीति युक्तमुक्तं। अतो दर्शपू
र्णमासावृत्तौ विकृतिषु च न पुनः पुनः कार्येति देशाभावात्। कार्यसंबंध्यतिदिश्यते। न पुरुषा
र्थसंबंधमपीति॥ अग्नाविष्णू सरस्वती सरस्वो नग्निनंगी॥ भगीत्यग्नेर्गुणः॥ अग्नाविष्णू
सजोषसेमा वर्धंतु वां गिरः। द्युम्नैर्वाजेभिरागतं। अग्नाविष्णू महि धाम प्रियं वां वीथो घृत राम
स्य गुह्या जुषाणा। दमेदमे सुष्टुती वावृधाना प्रति वां जिह्वा घृतमुच्चरण्यात्। पावकानः स ५७

अ४

रस्वती। पावीरवी कन्या चित्रायुः पीपिवांसं सरस्वतो दिव्यं सुपर्णं वायसं बृहंतं मा सर्वं सवितुर्य
धासनो सधांस्यान्यरेति॥ इष्टेर्याज्यानुवाक्याः। आधानाद्यद्याम्न्यावी यदि वार्थवि थेरत्पुनरा
धेयः इष्टिः॥ आमयावी उदरवाधिमान्। अर्थयशा अर्थहानिः। अथ र्त्तिः पुत्रपश्वादयः। आधानानंतरं
तस्मिन्नेव संवत्सरे यद्येतानि निमित्तानि स्युः। तदा पुनराधेयं कर्तव्यमिति। अयमर्थोऽस्मिन्सूत्रे शब्दा
ल्लभ्यते। तास्मिन्पुनराधेयवस्यमाणलक्षणेष्टिः कार्येत्यर्थः॥ तस्यां प्रयाजानुयाजान्विभक्तीन्निर्य
जेत्॥ तस्यामिति वचनं तस्यामेवेष्टौ नान्यस्यां वक्ष्यमाणो विधिः स्यादित्येवमर्थमिति न ज्ञायते
नैकेष्टिकं पुनराधेयमिति। विभक्तिभिः साहेतान्प्रयाजान्कुर्यात्। का विभक्तिः क वा प्रदेशः प्र
योक्तव्या किं सर्वेषूत कतिपयेष्विति एतेषां संज्ञायानां निवृत्तये। चतुरः प्रयाजान्सविभक्तिकानेव विभक्तिसहितो
प्रयाजांश्चतुरो विभक्तिभिः सहितान्पविर्शाद्धावनूयाजौ वर्ज्ञवित तयोरधिकृततत्ससिध्यर्थं॥ समि पठिष्यति॥३
धः समिधोऽग्नेऽग्न आज्यस्य व्यंतु तनूनपादग्निमग्न आज्यस्य वेतु। इडो अग्निनाग्न
आज्यस्य व्यंतु बर्हिरग्निरग्न आज्यस्य वेत्विति॥ नराशंसिनां नराशंसोऽग्निमग्न इति भवति

विभक्तिकविधानस्याविशेषात्। प्रातस्य चोत्तमप्रयाजानुयाजयोरित्यर्थत्वात्॥ समिधाग्निं दु
वस्यतेह्य शुत्रवाणि त इत्याग्नेय्यावाज्यभागौ॥ सोमस्थानेप्यग्निरेव। तयोरेते अनुवाक्ये॥
बुद्धिमद्दिदुमं तावित्यावक्ष्यते॥ आज्यभागयोरेतौ गुणौ॥ नत्वानुवृत्तिः॥ निगमेषु सगुणयो
रेवानुवृत्तिरित्यर्थः। इज्या च॥ इज्याशब्देन याज्यायां देवतादेश उच्यते॥ स च सगुणयोरेव कर्त
व्यः। केचिदिहानुवृत्तिशब्देनैव देवतादेशस्यापि ग्रहणमभ्युपगम्य इज्या च इत्यनेन याज्यामध्य
गतस्याग्निशब्दस्य सगुणोच्चारणमिच्छंति॥ नित्यं सर्वमनुब्राह्मणिनः॥ नित्यः केवलोग्निः। अ
नुवाक्यायामग्निर्वृत्राणीत्यनुब्राह्मणिन आचार्याः॥ अग्न आयूंषि पवस इत्युत्तरं॥ उत्त
रापि केवलाग्निरियं चानुवाक्या अनुब्राह्मणिनामेवाभिप्रायेण॥ नित्यमुत्तरे द्रविःशब्दः॥
उत्तरे याज्यामंत्रे द्रविःशब्दस्य सोमधर्मत्वात्तं निवृत्तौ तस्य निवृत्तिप्रसंगात्तत्स्थानापन्नत्वा
द्वेनरपि तद्धर्मसंबंध इति मत्वा नित्यत्वविकल्पं कृतवान्॥ आग्नेयं द्वविः। अधाह्यग्ने क्रतोर्भद्रस्य — राम
भिरेष अद्य गीर्भिर्गृणांत इत्यग्निर्नो अर्कैरग्ने तमद्याश्वं न स्तोमैरिति संयाज्ये देवं बर्हिरवने ५८

वसुवने वसुधेयस्य वेतु देवो नराशंसो अग्नौ वसुवने वसुधेयस्य वेत्विति॥ शतायमिदं॥ ६॥
आग्रयणं व्रीहिश्यामाकयवानां॥ अग्रेऽयने भक्षणं येन कर्मणा तदाग्रयणं। प्रथमद्वितीययोर्ह्रस्व
दीर्घत्वव्यत्ययः। एषां त्रयाणां द्रव्याणां संवत्सरे प्रथमनिष्पन्नानामाग्रयणं नाम कर्म कर्तव्यमित्यर्थः। व्रीहि
शब्दस्य प्रथमनिपातो व्रीहीणां प्राधान्यस्थापनार्थस्तेन कालचोदना व्रीह्याग्रयणस्यैव भवति॥ श्यामा
कशब्दस्य मध्यनिपातो व्रीहिकालाद्यवकालो भिन्न इति ज्ञापयति॥ सस्यं नाश्नीयादग्निहोत्रमहु
त्वा॥ सस्यं नवनिष्पन्नं। तन्नाश्नीयादाग्रयणे नानिष्ट्वा। यद्याग्रयणेनानिष्ट्वा नवनिष्पन्नान्नाशनेन
विना निर्वाहो न स्यात्। तदा तेषां द्रव्याणां तत्कालनिष्पन्नेन सायं प्रातरग्निहोत्रं हुत्वाश्नीयात्। ततः
कालमागते आग्रयणं कुर्यात्। अग्निहोत्रमहुत्वा नाश्नीयादिति वचनादाग्रयणेनानिष्ट्वाप्यग्नि
होत्रं हुत्वाश्नतो न दोष इति गम्यते। सस्यग्रहणं व्रीह्याद्यन्यदपि यन्नवनिष्पन्नं तस्य सर्वस्य प्रतिषे वनि
धार्थं॥ यदा वर्षस्य तृप्तः स्यादथाग्रयणेन यजेत॥ यदा वर्षेण तृप्तिर्लोकस्य भवति तदाग्रयणेन यजेत।
अनेन प्रकारेण व्रीह्याग्रयणस्यात्र शरत्काल उक्तो भवति। एतमेव कालं श्रुत्या समर्थयति॥ अपि

श्रौ० सू०
५९

द्विदेवा आङ्गस्य होमनं वर्षस्याग्रयणेन द्विपत्त इति । अग्निहोत्रं वैनानादयिलात्तस्याः पयसा
जुहुयात् ॥ अथाग्रयणेन यजेतेति इष्टिरेवाग्रयणशब्देनोक्ता । इदानीमिदमप्युच्यते । अग्निहोत्रार्थां
धेनुरग्निहोत्री कथ्यते । तां व्रीहिश्यामाकयवानामन्यतमं प्राशयित्वा तस्याः पयसा यं प्रातरग्निहो
प्रथम ४ त्रं जुहुयात् । इष्टिः कल्पस्तदसंभवे अयमनुकल्पः । इतीद्वे वाग्रयणकल्पौ अभोच्येते ॥ अपि वा क्रिया
यवेषु ॥ यवैराग्रयणस्य क्रियापक्षे वा अक्रियावेति विकल्पः ॥ इष्टिरूकरार्थः ॥ श्यामाकानां वर्णानां मुवित्रोषुपा
कल्पद्वये प्राप्ते । राज्ञो विशेष उच्यते । इष्टिरेवैन्यकृति ॥ सर्वेषां वैके ॥ सर्वेषामपि वर्णानामिष्टिरेवेत्येके म
न्यंते ॥ श्यामाकेष्वां सौम्यश्चरुः । श्यामाकाग्रयणेष्यां सोमदेवत्यश्चरुर्भवति । कात्यायनानां त्रिशुचः श्यामा
तरेदर्शनात् । सोमयास्ते मयोभुवो या ते धामानि दिवि या पृथिव्यामिति । अवान्तरेलायां नित्यं ज
पमुक्त्वा सवपाणौ कृत्वेतरेण निमृज्योपजापतयेलाग्रं हं गृह्णामि महौ श्रिये महं यथा सं
महं मंनाथाय ॥ इति कारावाहो ध्यारेयामन्त्रच्छेदः । नित्यं जपशब्देन लेनागमितिमंत्रउच्यते । तस्य राम
नित्यत्वे सत्यपि नित्य वचनं एतेन भास्त्रिणा इति विध्यति देह्रोतद्दर्शितस्य प्रापणार्थं । भद्रान्नः श्रे ५९

यः समनैष्टदेवास्त्वया वत्सेन समवीमहि त्वा । स नो मयोभूः पितवाविशेह शं नो न वदि पद्देवी
चतुष्पदे इति प्राश्य यो चम्यनाभिमालभ्य नेत्रीमोसि प्राणत् ह ते अवीमयमासि सर्वानसि प्रविष्टः ।
सम जरां रोगमपनुद शरीरादमामएधि मामृथाम इन्द्रेति ॥ स्मृति प्राप्तस्याचमनस्य विधानं
यस्मिं देशे आचमनं कृतं तस्मिंने व देशे स्थितस्य नाभ्यालंभनसिध्यर्थं ॥ एतेन नक्षिणा भक्षा
सर्वत्र नवभोजने ॥ एतेनु विधानेन सर्वनक्षेषु सर्वे नक्षिणः सर्वान्भक्षान्भक्षयेयुः । सर्वत्र वचनं
प्रकरणादुत्कर्षार्थं । नवभोजन वचनं लौकिके पि नवभोजने प्रापणार्थं । सर्वत्र वचनात्प्रकरणा
दुत्कृष्टमपि नवभोजनवचनाल्लौकिक एव व्यवतिष्ठते । वैदिके ग्निहोत्रहोमे नवानां सम्मिश्री
२४ नाभीयानित्यत्रैन प्राप्नुयात् । तत्रापि प्रापणार्थं नक्षणावचनं ॥ अथ व्रीहियवानां धाय्यो विराजौ ॥
अथानन्तरं व्रीहीणां यवानां चाग्रयणेष्टिरुच्यते । तत्र व्रीह्याग्रयणस्य कालः उक्तः । वसंतो यवाग्र
यणस्य । तत्र हि तेषां प्रथमः पाक इति तंत्रविशेषाभावात् । उभयोः सहवचनं तयोर्धाय्ये विराजौ भव
तः । इतरत्पौर्णमासं तंत्रं । वैराजमित्येनावतैवो केपिना वचनमात्र विकारसिद्धो सत्यां धाय्या विराड्

श्रौ॰सू॰
६०

ग्रहणं विकल्पेन वृधन्वतोरपि प्रापणार्थं॥ अग्नें द्राविं द्युम्नी वा विश्वेदेवाः सोमो यदित्र त्रया मा
कोद्यावापृथिवी॥ आद्ययोर्विकल्पेनैताद्देवता गृह्यंते। यदि त्रयामाकाग्रयणमस्यामेवेष्टौ समान
तंत्रेण क्रियते तदा सोमस्तन्वी यो नवतीति॥ आघायेअग्निमिंधते सुकर्माणः सुरुचो देवयंतो नावि
श्वेदेवास आगत ये के च ज्मा महिनो अहिमा मदी द्यौः पृथिवी वनः प्रप्र वर्जोपित रानव्यसी या॰४
भिरिति॥ इंद्राग्न्योः सोमस्य वोक्तायाज्यानुवाक्याः॥७॥ अथ काम्याः। अथानंतरं काम्या इष्ट
यो वक्ष्यंते। प्राक्तातुर्मास्येभ्यः इत्यर्थः। काम्या इति वचनमनिर्दिष्टकामा अपि न नित्याः शास्त्रां
तरादपि तासां कामोन्वेष्टव्य इत्येवमर्थं॥ आयुष्कामेष्ट्याजी वानुमंतो॥ आयुष्कामस्येष्टिः आयु
ष्कामेष्टिः। अस्मिन्प्रकरणे कामग्रहणानामेतत्प्रयोजनं यद्देवता संयुक्तायामिष्टौ यत्तंत्रं विहितं
तद्देवतासंयुक्तायामप्यन्यकामसंयुक्तायां तंत्रं भवतीति ज्ञापनार्थं॥ आनो अग्ने सुचेतुना रयिं
सोमम देनमग्निरिति। अग्निरायुष्मानिंद्रस्त्राता॥ द्विदेवते आयुष्मानित्यग्नेर्गुणः। त्राता इंद्रस्य
गुणः॥ आयुष्टे विश्वतो दधदयमग्निर्वरेण्यः। पुनस्ते प्राण आयाति परा यक्ष्मं सुवामि ते। आयु राम
६०

२ म

र्दा अग्ने हविषो जुषाणो घृतप्रतीको घृतयोनिरेधि। घृतं पीत्वा मधु चारु गव्यं पितेव पुत्रमभिर
क्षतादिमं। त्रातारमिंद्रं वितारमिंद्रं मा ते अस्यां सहसावन्परिष्टौ। पाहि नो अग्ने पायुभिरजस्रैर
ग्ने त्वं पारया नव्यो अस्मानिति संयाज्ये। स्वस्त्ययन्यां रक्षितवंतो॥ स्वस्तिगमनसाधनीभू
ता स्वस्त्ययनीष्टिः। अग्ने रक्षाणो अंहसः त्वं नः सोम विश्वत इति॥ त्वं नः सोम विश्वत इति रक्षा
लिंगाद्द्वौ तत्रैव॥ अग्निः स्वस्तिमान् स्वस्तिनो दिवो अग्ने पृथिव्या आरे अस्मद मतिमारे अंह
इति। पूर्वयोः केसं याज्ये॥ यादिनइत्येते॥ पुत्रकामेष्ट्यामग्निः पुत्री॥ पुत्रकामेष्टौ अग्निः पुत्री
देवता। पुत्रीत्यग्नेर्गुणः॥ यस्मै त्वं सुकृते जातवेदो यस्त्वा हृदा कीरिणा मन्यमानः अग्निस्तुवि
श्रवस्तमं तिति द्वे संयाज्ये। आग्नेय्यामुत्तरे॥ येउत्तरे इष्टी वक्ष्येते मूर्धन्वतः कामायेति चते अग्नि
वत्येन वतः इत्यर्थः। सर्वस्यामग्नेर्मूर्धन्वान्गुणः। उत्तरस्यां कामो गुणः॥ नित्ये मूर्धन्वतः॥ अग्नि नै॰२
र्मूर्धा भुवो यज्ञस्येत्यर्थः। तुभ्यं ता अंगिरस्तमा मात्याम तं काम मग्ने तवोतीति कामाय॥ कामगुणकस्या
ग्नेस्तुभ्यं ता अंगिरस्तमाश्याम तं काममिति याज्यानुवाक्ये॥ वैमृध्या उत्तरे॥ उत्तरे द्वे इष्टी वैमृध्यो

श्रौ० सू०

६१ भवतः। तयोर्वृश्च्यमाणो या ज्यानुवाक्या युगळे ते इंद्र देवते भवतः। सर्वेंद्रो विमृद्धु पाकः। वैमृधा धयु
पाको वा भवति। अत एते इष्टी वैमृधी इत्युच्येते॥ वि न इंद्र मृधो जहि मृगो न भीमः कुचरो गिरिष्ठाः
सद्युतिमिंद्र सद्युतिं प्रवृक्तिं जघनद्युतिं। प्रजा का फान भमर। प्रय पर्यंनिव स सख्यो। वि न इंद्र मृ
धो जहि। वनी लबुदेघया स पर्यभिनः सुष्टुतिं नयंति॥ एते पुष्टिकामस्य याज्यानुवाक्ये॥ इंद्राय दात्रे
पुनर्दात्रे वा॥ इंद्रो दाता स पुनर्दाता वा देवता भवति। उभयथा उभयथा ये ते एव याज्यानुवाक्ये वचन
सामर्थ्यात्॥ यानि नो धनानि क्रुद्धा जिनासि मन्युना। इंद्रानु विद्धि न स्तान्यनेन हविषा पुनः। पुनर्नरि
द्रो मघवा ददर्धन्तु धनानि नो क्रोधन्यः सुराधाः। अस्मद्र्यक् कृणुतां याचितो मनः श्रुष्टी न इंद्रो
हविषा मृधातीति। आशा नामाशापालेभ्यो वा। आशा आशापाला वा देवता। अशापिका
ज्यानुवाक्ययोरैक्यं॥ आशा नामाशापालेभ्यश्चतुर्भ्यो अमृतेभ्यः। इदं भूतस्याध्यक्षेभ्यो विधेम हवि
षा वयं। विश्वा आशा मधुना संसृजामि अनमीवा आप ओषधयः संतु सर्वाः। अयं यजमानो मृ
धो व्यस्य लब्गृभीताः पशवः संतु सर्वे इति। लोकेष्टिः। इष्टिनामेदं॥ पृथिव्यंतरिक्षं द्यौरिति देवताः॥ नाम
देवताग्रहणं पृथिव्यादीनां पृथगेव देवतात्वसिद्ध्यर्थं। त्रिलिंगत्वाद्याज्यानुवाक्ययोस्तिस्रस्संहिता ६१

एका देवता माभूदिति॥ तेनैतत्साधितं भवति। याज्यानुवाक्यालिंगाद्देवतानिर्णयः कार्य इति॥ पृथिवी मा
तरं मही मंतरिक्षमुप ब्रुवे। बृहती मूतये दिवं विश्वं बिभर्ति पृथिव्यंतरिक्षं वि पप्रथे। उरु द्यौर्बृहती पयः।
शर्म मे पृथिवी मह्यं अंतरिक्षं स्वस्तये। द्यौर्मे शर्म महि गुर्बिं इतितिस्र स्त्रयाणां॥ एतास्तिस्र स्त्रयाणां ह
विषां याज्यानुवाक्या भवंति। उत्तरसूत्रे विनिवेशसामर्थ्यादिवास्यार्थस्य सिद्धो सत्यां वचनमिदमन्यत्रो
पिति स्त्रस्त्रयाणां विहिता एवं विनिवेशयितव्या इत्येवमर्थं। एवं भवतीत्याह॥ प्रथमे प्रथमस्यैतत्से
मध्यमस्य॥ उत्तमा प्रथमा चोत्तमस्य॥ पा मित्रविंदा महावैराजी॥ मित्राणि यथा विंदते सा मित्रविंदा।
स्था: गुणनामैतत्। महावैराजीति नामैव॥ अग्निः सोमो वरुणो मित्र इंद्रो बृहस्पतिः सविता पूषा सर
स्वती त्वष्टेत्येकप्रदानाः॥ द्वौ तादेवताः। एकप्रदानाः महावैराज्यं भवंति। एकप्रदानत्राह्गत्का
र्थः॥ अग्निः सोमो वरुणो मित्र इंद्रो बृहस्पतिः सविता यः सहस्री। पूषा नो गोभिरवसा सरस्वती
त्वष्टा रूपेण समनक्तु यज्ञं॥ इयमनुवाक्या। प्रतिलोममादिश्य यजेद्यं यजामहे त्वष्टारं सरस्वतीं पू
षणं सवितारं बृहस्पतिमिंद्रं मित्रं वरुणं सोममग्निं त्वष्टा रूपाणि दधती सरस्वती भगं पूषा सवि

वानो ददातु। बृहस्पतिर्ददद् इन्द्रः सहस्रं मित्रो दाता वरुणः सोमो अग्निरिति॥ एता देवताः प्रतिलो
ममादित्ययजेद्यथेयजाम् इत्यनुषङ्ग इति वचनं याज्यायामेव प्रतिलोमत्वं नान्येषु निगमेष्विति एवमर्थं। प्रतिलो
मविधानादेव प्रतिलोमत्वे सिद्धे प्रतिलोमग्रहणस्येदं प्रयोजनं। उत्पत्तियागक्रमयोर्विरोधे पूर्वमुत्पत्ति
क्रमः उत्तरेषु यागक्रम इत्यस्य न्यायस्यैन्द्रामारुत्या मु[illegible]उत्तरेषु निगमेषु प्रतिलोमत्वं स्यादिति
तन्निवृत्त्यर्थं। इदं चापवादप्रयोजनं। वरुणस्याप्सु पर्यग्नित्वं भवतीति। त्वष्टा रूपाणीति याज्या। अष्टौ
वैराजतन्त्राः॥ आग्नेय्या उत्तरे इत्येवमाद्या महावैराज्यं नाम इष्टयो वैराजतन्त्राः॥ ता सामाद्याः ष
ळेकहविषः॥ अनुवादोऽयं प्राप्तत्वात्। प्राप्तानुवादे प्रयोजनं हविःशब्देन प्रधानहविषामेव ग्रहण
मिति ज्ञापनार्थं॥ स्नुषाश्वशुरीयया निवरं न्यजेत॥ स्नुषाश्वशुरीया नामेष्टिः। तया निवरं न्व
नुं मारयामीति संकल्पयन्यजेत। इन्द्रः सूनो अतनुद ओजसि स्नुषास पत्नी श्वशुरो समस्मि। अद
राजं जयामि अहं षा मो स्वं वा अजं जयामि वाजसातौ॥ इन्द्रः सूरः प्रथमो विश्वकर्मा मरुत्वां अस्तु राम
गणवान्सुजातैः। मम स्नुषा श्वशुरस्य प्रशिष्टौ सपत्ना वाचं मनसा उपासतां॥ याज्यानुवा ६२

क्ययोर्लिङ्गाद्देवतास्यादेवताकल्प्या॥ सा चेन्द्रः इन्द्रः सूर शृणोतु॥ जुष्टो दमूना अग्ने त्वाद्य मह्नेसो
नगायेति संयाज्ये। विमनानां सममत्यर्थे संज्ञानी॥ विमतानां विमनस्कानां संमतिप्रयोजनार्थं सं
ज्ञानी नामेष्टिः कार्या॥ अग्निर्वसुमान्सोमो रुद्रवानिन्द्रो मरुत्वान्वरुण आदित्यवानिति एकप्रदा
नाः॥ चतस्रः स्वगुणदेवता एकप्रदाना वेदितव्याः॥ अग्निः प्रथमो वसुभिर्नो अव्यात्सोमो रुद्रेभि
णो रभि रक्षतु त्मना। इन्द्रो मरुद्भिरृतुथा कृणोत्वादित्यैर्नो वरुणः संशिशातु॥ समग्निर्वसुभिर्नो अव्या
त्सं सोमो रुद्रियाभिस्तनूभिः। समिन्द्रो रातहव्यो मरुद्भिः समादित्यैर्वरुणो विश्ववेदा इति॥
एषा संज्ञानी नामेष्टिः। स्वामिभृत्ययोः संमत्यर्थं। यः समानेभिः शोचि प्रियः स्यात्। तमेतया याजये स्वामिना
येदिति श्रुतेः। ऐन्द्रामारुती भेदकामः॥ इन्द्रश्च मरुतश्च देवते यस्याः सा ऐन्द्रामारुती सेयमत्र वि
ग्रहः। केवलानां मरुतां याज्यानुवाक्यादर्शनादिन्द्रस्य च पूर्वयोः क्रियोः ग्रहणेन द्विदेवत्येयं
मिति निश्चीयते। भेदकामाः राज्ञां च विज्ञां च। लोके आहिताग्नयो यदिप्सवः। तेषामस्यामधिका
रः एकैकस्यैव॥ मरुतो यस्य हि क्षये प्र शर्धाय मारुताय स्वभानव इति॥ इन्द्रस्य नित्ये एव॥ ऐन्द्री

श्रौ० सू०
६३

मनुष्यमारुत्याय जेन्मारु नीमनूच्यैंद्राय जेदिदं सर्वनिगमेषु मरुतो वा। प्रधानक्रम एवांगानां
क्रम इति प्रसिद्धो न्यायः। अत्र तु प्रधानयोः परस्परव्यतिषिक्तसिद्धयोः क्रमो नास्ति। याज्यानुवा
क्याभ्यां तु भाभ्यां यागक्रियावयव भूतस्य उद्देश भागस्य सिद्धेरिति मन्यमानो विकल्पमुक्तवान्।
व्युदस्यत्येनं॥ इंद्रं वा। प्रधानार्द्धं भरुतः॥ सत्यसुत्पत्तिक्रमाभावे प्रधानक्रम एवांगानां भवति। उत्प
त्तिक्रमे तु सति स एवानुपजातविरोधित्वात् प्रधानाद्बलीयान् भवति पश्चात्तु प्रधानक्रम एवेति न्यायः। अ
त्र तु प्रधानयोः क्रमोऽस्त्येव। याज्याया एवोद्देश्यदेवताप्रतिपादकत्वात्। आवाहनादिवदनुवाक्यायां देव
ताद्वयस्वरूपप्रतिपादकत्वात् मारुत एवाद्ययागः सर्वं क्रियते। पश्चादैंद्र इति विनिवेशमुक्तवानाचार्यः
वा शब्दो न पक्षव्यावृत्त्यर्थः। प्रलंत्यासंपत्तिकामाः संज्ञानीं च॥ बह्वादितामग्नेराजविन्नां संपत्तिकामये यो
रन्। तदा ते एतदेव वैशेषिकेष्टिवयजेरन्। सर्ववेदैकैक एव ते न तः शौसेनी च कुर्युरेव मे वा। ऐन्द्राबार्हस्पत्या
प्रत्यष्य मापाना॥ शत्रुभिरभिभूयमानाः॥ आनुईंद्राबृहस्पती अस्मे इंद्राबृहस्पती इति यथ पीडायै राम
वेदयेयुः॥ यद्येंद्राबार्हस्पत्येनिरूप्यइंद्राय वोदयेयुः अधर्यवः यद्बाबार्हस्पत्यनिरूप्य इंद्राय वो ६३

दयेयुः। उभयोरपि पक्षयोरेते एव याज्यानुवाक्ये भवत इत्यर्थः॥ थापविशेषां॥ एतत्सर्वं मात्रं न दृष्टं
॥१०॥ वर्षकामेष्टिः कारीरी॥ वर्षकामस्य कारीरी नामेष्टिः कार्या॥ तस्याः प्रतीत्यं वारुमधरमीळे
अग्निं स्ववसं नमोभिरिति धाय्ये। तस्यामिति कारीर्यामित्यर्थः। अत्र बहु देवत्यायां याज्यानान्तरमन्य
दाज्यमेव कारीनी एकदेवत्या भवति तस्यामपि प्राप्त्यर्थं तस्यां तद्रूपं॥ याः काश्च वर्षकामेष्टयोऽसुमतो॥
एतौ वर्षकामेष्टिमात्रे भवतः॥ अग्ने त्वं साधिष्ठवासु मे सोमो अब्रवीदिति॥ अत्र सर्वस्या गायत्रीत्वा
त्सर्हवर्या उत्तरापि गायत्र्येव ग्रहीतव्येति। वयस्योत्तर अवक्ष्यति। असुमतौ गायत्र्याविति॥ इदमेव वा
क्याम्नायमनुसरन्॥ अग्निर्धाम्न छन्मरुतः सूर्यः॥ धामच्छदित्यग्नेर्युपाः तिस्रश्च पिंड्यस्तत्तराः॥ उ
त्तरास्तिस्रः पिंड्यश्च भवंति पिंड्य इति। इदमेव वाक्याम्नायमनुसरन्। पिंडीद्व्या मरुद्देवत्यास्त्रयो या
गा इत्यर्थः॥ हिरण्यकेशो रजसो विसार इति॥ हेत्वस्याविदच्युता धामते भुवनमधिश्रितमिति वा
वाश्वेव विद्युन्मिमाति पर्वतश्चिन्महि वृद्धो बिभाय स्टजेतिर त्रिभिमोजसाव दिव्याभिर्विर्हि स्न्यासिं
नं तु मुदीरयथा मरुतः समुद्रतः प्रवो मरुतस्तविषा उदन्यवं आयंनरः सुदानवो ददा अथवि

कन्महसो न नो अस्मद्दिवः हव्यानि यानं हरयः सुपर्णा नियुत्वंतो ग्रामजितो यथा नरः ॥ धामच्छदोय
ज्ञानुवाक्यायुगलद्वयं वा वस्तुया योजनीयं । यदा केवलोऽग्निस्तदाद्यं यदाग्निर्धामच्छत्तदोत्तरमिति ॥
अग्ने बाधस्व विमृधो वि दुर्गहापामीवामप रक्षांसि सेध । [illegible] संयाज्ये । [illegible] यजुर्भिरेके
यजंति । त्रियीयागानिति विशेषः । एके त्वारिविनक्ष्व एवानुवाक्याः उक्ता यजुर्भिरेव पिंडीयागं कुर्वंती
त्यर्थः । अत्र विशेषस्तेभ्य एवाधिगंतव्यः ॥ संस्थितायां सर्वादिशः [illegible] प्रतिष्ठिता [illegible] दत्तवसं गी
र्जिराभिरिति त्वत स्तुतिः प्रत्यृचं सम्केन सम्केन वा ॥ एकैकां दिशां सवदिशाः इत्येकपकस्य च तस्य भिः २०
प्रत्यृचमित्येकसंहारादन्यत्रापि दिशां सर्वत्वं च तस्य वेवपर्यवस्यतीति गम्यते । सम्केन सम्केन वा एके
कां दिशां सवदिशाः इत्येकस्य च तु स्तुतिः प्रत्यृचमित्येकसंहारादन्यत्रापि दिशां सर्वत्वं च तस्य वेव प
र्यवस्तुतीति गम्यते । सम्केन सम्केन वा । एकैकां दिशां [illegible] न सम्केनोपतिष्ठेतेत्येवं वा ॥ ११ ॥ अत
ऊर्ध्वमिष्ट्ययनानि ॥ अत ऊर्ध्वं यानि वक्ष्यंते तेष्विमन्त्र्यायेतानीष्ट्ययनसंज्ञानीति विद्यात् । इष्टिभिर
यनं गमनं येषु कर्मसु तानीष्ट्ययनानि ॥ सांवत्सरिकाणि ॥ संवत्सरेण क्रियंते संवत्सरे वा क्रियंते तद्   गम
६४

ल१

स्कंधयथाविग्रहः कर्त्तव्यः । दाक्षायणयज्ञचातुर्मास्यानामनेकसांवत्सरिकं सिध्यर्थं ॥ तेषां फाल्गु
न्यां चैत्र्यां वा प्रयोगः । फल्गुनीनिर्युक्ता पौर्णमासी फाल्गुनी चित्रयायुक्ता चैत्री तेषां सांवत्सरि
काणामागंतुकानामस्मिन्काले प्रारंभः कार्यः । दर्शपूर्णमासगुणविकाररूपाणां दाक्षायण
यज्ञादीनामारंभे कालनियमो नास्तीति तेषामित्युच्यते । तुरायणं । तुरायणं नामेष्ट्ययनमुच्य
ते ॥ अग्निरिंद्रो विश्वेदेवा इति पृथगिष्टयोनुसवनं मदरहः ॥ अग्निदेवत्या इंद्रदेवत्या विश्वेदेवदे
वत्याश्चेति तिस्र इष्टयः त्रिषु सवनेषु यथासंख्येनैकैकेष्टिः कार्या इत्यहनि । हे और हर इति क्व
न पौर्णमास्यमावास्ययोर्बाधनार्थं ॥ एकावात्रिहविः ॥ एता अग्निरेवदेवताभिर्युक्ता एकैकेष्टिस्त्रिह
विष्का इत्यहनि प्रातःसवन एव कर्त्तव्या वेत्यर्थः ॥ दाक्षायणयज्ञे द्वे पूर्णमास्यौ द्वे अमावास्ये
जेत ॥ दाक्षायणयज्ञः कर्त्तव्य इत्ययमर्थोर्थाल्लभ्यते । तस्मिं दाक्षायणयज्ञे द्वे पौर्णमास्यौ द्वे अमावास्ये
यजेत द्वितीयानिर्देशात्प्रतिपन्नयोर्द्वित्वं गुणो विधीयते नाप्रतिपन्नयोर्द्वित्वविशिष्टयोर्विधानम
त्रेति गम्यते । एतदुक्तं भवति । या पौर्णमासी यामावास्या ते एव स्वस्वकाले द्विरावर्त्तयितव्येति ।

वि

नियेष्व्वेव यथा संनयतो मावास्यायां ॥ आवृत्तयोः पूर्वयोरित्युक्ते एव वृत्ते कृते । तत्रामावास्याद्विले
असंनयतो यासैव नियम्यते । उत्तरयोरैंद्रं पौर्णमास्यां द्वितीयं ॥ उत्तरयोर्विकारत्वात् तत्पौ
र्णमास्यां यद्द्वितीयं हविस्तदैंद्रं भवति । मैत्रावरुणममावास्यायां ॥ अमावास्यायां यद्द्वितीयं त
न्मैत्रावरुणं भवति ॥ आनो मित्रावरुणा यद्वां दिक्षु नातिविधेसुदानू इति । प्राजापत्य इळादधः ।
इळादधो नाम यज्ञायनं तत्प्रजापतिदेवत्यं । तत्र पर्वणि पर्वणि कर्तव्यं विशेषविध्यभावात् ॥ प्रजापते
न त्वदेतान्यन्यस्त्वमे लोकाः प्रदिशो दिशाश्च परावतो निवत उद्वतश्च । प्रजापते विश्वसृज्जी
वधन्यं इदं नो देव प्रतिहर्य हव्यमिति । घाबाष्टाथि योरयनं । तस्य स्वरूपमुच्यते । पौर्णमासेनामा इदमपीष्ट्ययनं नाम ७
मावा ४ वास्येनापौर्णमासात् । स्वकाले पौर्णमासं कृत्वा तेनैवाहरहर्यजेत । आ अमावास्यायाः कालात् तत
तोमावास्यां स्वकाले कृत्वा तयैवाहरहरापौर्णमासात् । एवं संवत्सरं समापयेत । अत्राप्यदर्श
पूर्णमासयोः पुनः क्रिया नास्ति । असमाम्नातास्वर्थात्तंत्रं विकारः ॥ अस्मिञ्छास्त्रे या असमा राम
म्नाता इष्टयः तासु अर्थात्तंत्रविकारो भवति इष्टिप्रकरणास्तु जीलिंगाद्[illegible]सगम्यते । अर्था ६५

द

त्सामर्थ्याद्वा यद्देवतादेश्चोदनासामान्यात्स्वरूपसामान्याच्चेत्यर्थः । तदुक्तं प्रकृतिविकारभावस्य
लक्षणं । निर्वपेत्तद्धितं चाज्यमित्यादिनां तंत्रं विकारः तंत्रान्यत्वं पौर्णमासादित्यर्थः । उपदिष्टाना
मिष्टिपशूनां तंत्रमुक्तं । अनुपदिष्टानां कथमित्यपेक्षायां तं निश्चयार्थमिदं सूत्रचतुष्टयमारब्धं । अ
स्यार्थस्य न्यायलभ्यत्वात्सूत्रनामध्ये तत्प्रदर्शनार्थत्वेन व्याख्येयं ॥ अध्वर्युर्वा यथा स्मरेत ॥ अध्वर्यु
शब्देन यजुर्वेद उच्यते । तत्प्रदर्शनार्थं । तेनैव भवति यत्र क्वापि तंत्रेऽस्यैतत्तंत्रमित्याम्नातं स्यात्तस्य
तदेव तंत्रं भवेत । न न्यायतस्तंत्रकल्पनेति । वाशब्दोवधारणार्थः ॥ वैराजं वाग्नि मंथने ॥ अग्निमं
थनसंयुक्तायामिष्टौ वैराजमेव तंत्रं भवति । वाशब्दोवधारणार्थ एव ॥ धाय्ये च वैके ॥ अग्निमंथने
राज्ञं संपिधाय्ये एव केवले निगम्ये तेन वैधाय्याभ्यामन्यत् न्यायकल्प्यमेव तंत्रमिति । असमाम्नाता
सु तंत्रलक्षणमुक्तं इदानीं याज्यानुवाक्यालक्षणमुच्यते ॥ देवतालक्षणा याज्यानुवाक्याः ॥ देवता
लक्षणेति छांदसो ह्रस्वः । लक्ष्यतेऽभिधीयते विहिता देवता येन पदेन तल्लक्षणं देवताया लक्षणं यास्
स्ताया याज्यानुवाक्या भवंति । विहित देवतावाचकपदवत्य इत्यर्थः । व्यधिकरणोयं बहुव्रीहिः । गाय

त्य

श्रौ०टी०
६६

आवतीहूतवत्युपोकृवती पुरस्ताल्लक्षणानुवाक्या ।। इदमनुवाक्यालक्षणं । गायत्रीछंदः ।। आ
इत्येतस्य देवता आवती हूतवती ।। निर्घांतग्रहणो धातुमात्रग्रहणं भवतीति सार्वत्रिकमेतत् हूत
इति ह्वेञो रूपं । उपोकृवती उपपूर्वस्य वचेरिदं रूपं । उपोवतीति प्रमादपाठः ।। पुरस्ताल्लक्षणा देव
पूर्वभागे देवतापदं यस्याः सा पुरस्ताल्लक्षणा ।। त्रिष्टुब्वानीवीतवती ... परिष्टाल्लक्षणा याज्या त्र ४
ज्या । अपि वान्यस्य छंदसः ।। असंभवे विहित छंदसोन्यस्य वा याज्यानुवाक्याः कर्तव्याः ।। न तु याज्या
ह्रसीयसी ।। सर्वथा तावदनुवाक्याया याज्या ह्रसीयसी न भवति । नो ह्लिङ्कृ हृती ।। नो हिङ्कृ हृद
तीयाज्येत्यर्थः । सामदेते नेष्टे द्रवधवतीस्तु वर्जयेत् ।। एकवचनाधिकारे बहुवचनं याज्यानुवाक्या परि
ग्रहणार्थं । व्यक्ते तु देवते तथैव । सर्वलक्षणसंपादनासंभवे स्वपदार्थपर्यवसिते कार्ये देवतापदे सति
तथैवाश्रयणीयं न लक्षणान्तरमन्वेषणीयमित्यर्थः ।। लक्षणमपि वाव्यक्ते ।। अथवाप्येवं भवति । अ
व्यक्ते देवतापदे सति । लक्षणं गायत्र्यादाश्रयणीयमित्यर्थः । अव्यक्त इति चोदितानामधेयस्य नाम ६६
पर्याये वाक्यैरुक्तस्तद्विमकेत्वादिपदेनोदितनामधेये वा परार्थे सतीत्यर्थः । अनधिगच्छन्सर्वशः उ

भयथाप्यभावे सर्वशोधिगंतव्याः । शाखांतरादादर्तव्या इत्यर्थः ।। अनधिगम आग्नेयीभ्यां । ए
वमप्यसंभवे याभ्यां काभ्यांचिदाग्नेयीभ्यां यजेतानुब्रूयाच्चेत्यर्थः ।। व्याहृतिभिर्वा ।। तत्रानुब्रूयाद्य
जेच्चेत्यर्थः । एवं व्याहृतिभिरित्यादिदेवतामादिश्य प्रणवाद्यं जेच्च ।। पुरस्ताल्लक्षणालायवानुवा
क्यायां देवतां द्वितीययाविभक्त्यादिश्य ततो भूर्भुवस्वरोमिति ब्रूयात् । याज्यायामास्तु स्वुत्का ततो
देवतां ततो व्याहृतीः पुनरुक्तां देवतामुपरिष्टाल्लक्षणालायततो वषट्कार इति ।। नम्रान्यां वा ।। न
म्रेइतिनामधेयमृचोर्वक्ष्यमाणयोः ।। इममाश्टृणुधीहवं यस्ता गीर्भिर्हवामहे । एवं बर्हिर्निष ।
दनः । स्तीर्णं बर्हिरानुष गामसदेत चुपेलानाह्न नो अद्य गच्छ । अहेलतामनसेदंजुषस्व वीहि
हव्यं प्रयतमाकुलमह्यतिनम्रे ।। येए तेनम्रसंज्ञे । पुनर्नम्रेइति वचनमेतयोर्निमनप्राप्त्यर्थं । नम्रेन
मनशीलेऽ ऋचे इत्यर्थः । आग्नेय्यावनिरुक्ते ।। देवतापरंरहितेइत्यर्थः । तथाप्यग्निदेवत्ये एतोऋ ८३
चौ भवत इत्यर्थः ।। १२ ।। चातुर्मास्यानि प्रयोक्ष्यमाणः प्रवेदुवैश्वानरपार्जन्यां ।। चातुर्मास्या
नीति स्थयननाम । तानि च वैश्वदेवादीनि चत्वारि पर्वाणि । तानि फाल्गुन्यां चैत्र्यां वा रप्स्यमा

श्रौ०वृ०
६७

नक्तास्याः पूर्वस्मिन्नहनि वैश्वानरपर्जन्यदेवत्यामिष्टिं चातुर्मास्यानामारंभार्थं कुर्यात्। द्वे एव
ते देवते याज्यानुवाक्यायुगलद्वयेनारं। वैश्वानरो अग्नेर्गुणः याज्यानुवाक्ययोरग्निलिंग
लात्। यद्यध्वर्यवः केवलं वैश्वानरं कुर्युः स्तदाऽस्तावानुं वैश्वानरं नाभिं यज्ञानां सदन
मिति याज्यानुवाक्ये भवतः। वैश्वानरो अजीजनद्‌ग्निर्नो नव्यसी मतिः। इमयाद्‌धा व ऊर्ज
सा। पृष्टो दिवि पृष्टो अग्निः पृथिव्यां अर्जन्या यः प्रगायत प्रवाता वाति पर्जन्यो विद्युतः
अग्न्याधेयप्रभृत्यान्तउपांशुहविषः। अग्न्याधेयप्रभृतिं कृत्वा। वैश्वानरपार्जन्यौ ताइत्ययो
यास्तातउपांशुहविषः उपांशुप्रधानाइत्यर्थः॥ सौमिकाः॥ सोमो ये मंत्राः॥ प्रायश्चित्तिकाः। प्राय
श्चित्तप्रकरणोक्ता मंत्राः। अन्वायात्ये ककृपालाः॥ अन्वायात्ये ककपाल्वा नामिष्टिलासंनवाद्यागावि
चोर्ष्यते। अन्वायात्याः एककपालाः श्वेयेयागाः स्तेउपांशुप्रयोक्तव्याइत्यर्थः। सवत्रवारेणवर्जं। स
र्वत्रविषयेवारुणं वर्जयित्वाउपांशुत्वं भवति। न कचिदपि विषये वारुणाउपांशुर्भवतीत्यर्थः। सा
वित्रश्चातुर्मास्येषु॥ चातुर्मास्येषु सावित्रउपांशुर्भवति॥ प्रधानहवींषि चैके॥ हवींषीयेतावता

श्रीराम
६७

उपांशुत्वे तत्र पक्षे आवहस्वाहादीनां अंगप्रधानसंबंधिनां मंद्रेणोच्चारणं। तथाप्यावहदेवान्यजमानाय। आवहजातवेदः सत्राहवह
इत्युपांशुत्वमेव। कदाचिदपि देवता संबंधाभावात् इति भाष्ये। सुमंद्रनत्रतत्र ×हे× प्रधानदेवतापरानामुपांशुत्वं। अंगदेवता
वाचिनां तु मंद्रत्वं। उभयसंबंधिनामावहादीनां तु मंद्रत्वमिति न मंत्रे स्वराः स्वरकः प्राकृतास्ताः आवययवसंबंधि स्वरः इति कृता हत
देवत्राता। अ

प्रधानप्रत्ययेसिद्धे प्रधानवचनं प्रधानानां तस्य संप्रत्ययार्थं। अतोयेऽनुर्णां पर्वणां व्यपदेशाद्दे
तवो वैश्वदेववारुणप्रघासमादं दुद्धनासीरीयाः स्तेप्रधानशाहुवाच्यास्तेषामुपांशुत्वं भवती
त्यर्थः। पित्र्योपसदः सतंत्राः॥ तंत्रेणसहैताउपांशवो भवंति॥ पौनराधेयिकी च प्रायुत्तमादनु
याजात्॥ यास्माभिराम्नाता पुनराधेयेष्टिः सा चोत्तमादनुयाजात्प्राक्तत्रोपांशुर्भवति। अ
पि वा सुमंद्रतंत्राः॥ यास्तु सतंत्रमुपांशुत्वं विहितं ताः सर्वाः सुमंद्रतंत्रा वा भवेयुः सुमंद्रतंत्रा
इति मंद्रेपि येषु वर्तता वमात्तेः प्रयोक्तव्या ता सोतंत्रं प्रधानं तूपांशवेवेत्यर्थः। आगूः प्रणवव षट्का
राञ्जैः सर्वत्र॥ प्रणवशब्देनात्रानुवाक्याप्रणवएव गृह्यते आगूर्वषट्कारसाहचर्यात्। आगु
रादयः सर्वविषयेउच्चैर्भवंति न कचिदपि विषये तेषामुपांशुत्वं स्यात्॥ तथाग्रयणेग्निर्॥ आग्रे
भवंमग्न्यां। आग्रयणेयत्प्रथमं हविः आग्नेंद्रैं द्राग्नं वा तदुच्चैर्भवति॥ आहार्यस्त प्राणसंततः
प्रणवः पुरोनुवाक्यायाः॥ पुरोनुवाक्यायाः प्रणवस्योच्चैस्त्वं विहितं। स प्रणवः पुरोनुवाक्यायाः प्रा
णसंततः कार्यः॥ तथा गूर्वषट्कारौ याज्यायाः॥ तथैतौ याज्यायाः प्राणसंततौ कार्यावित्यर्थः। आगुरादि

श्रौ॰ सू॰
६७

नि:प्रसिद्धो ऽत्र स्वरैर्याज्यानुवाक्ययो: प्राणसंतानविधिसामर्थ्यादेवोपांशुत्वं सिद्धं भवति। प्राणसंतत:
प्रणव: तथा गूर्वषट्कारौ इत्येतावत्तेव याज्यानुवाक्ययोरुपांशुत्वस्य प्राणसंतेनस्य च सिद्धो ऽस्यामपि व
याज्यानुवाक्यायदूणं करोतीति ज्ञापयति अनुवाक्याया याज्यायाश्च पृथक्कृत्य प्राणसंतानेन आगूप्र या
णववषट्कारावकर्त्तव्या:। ऋगंते श्वस गाथेश्च प्लुतेरन्य: सांहितो विकारो माभूदिति॥ तंत्रस्वराण्य
पांशूत्तमानि॥ तंत्रस्वराआनेतो मंद्रेणेत्येवमादिभिर्विहिता:। ते तंत्रावयवसंबद्धत्वात्तंत्रस्वराइत्युच्यंते।
ते येषां तानि तंत्रस्वराणि उपांशुयाजसंबंधीनि यानुत्तमानि आवहादीन्याग्नुयादीनि वतानि तंत्रस्व
राणि भवंति न तंत्रस्वराणि भ
राणि भवंति॥ मंद्राणयुपांशु तंत्राणां॥ उपांशुतंत्राणां तान्युत्तमानि मंद्रस्वराणि भवंति न तंत्रस्वराणि भ
वंतीत्यर्थ:॥१२॥ प्रातर्वैश्वदेव्यां प्रेषितोग्निमंथनायाअन्वाह पश्चात्सामिधेनीस्थानस्य पदमा
त्रे वस्थाय निर्दिश्य॥ प्रातरित्यनूच्यते प्रयोक्ष्यमाणा: पूर्वेद्यु: रित्यनेन च तर्न पूर्वेन विभक्तिदर्शनात
पूर्वेद्युरेव वैश्वदेव्या अपि याग: प्राप्नोतीति तन्निवृत्त्यर्थ। अत: पूर्वेद्युरुपक्रम्या परेद्यु: प्रातर्वैश्वदे राम
व्या यष्टव्यमित्यर्थ:। अग्निमंथनार्थास्त्वग्निमंथनीयास्ता: प्रेषितोनुब्रूयात्। प्रेषितवचनंम ६८

नुवचनस्य प्रैषपूर्वत्वनिमित्तं। नाम्नानं। अनाम्नानेपि प्रेषितोनुब्रूयादेवेति। सामिधेनीस्थानस्य प
श्चादवस्थायेत्येतावत्तेव पदमात्रेवस्थानस्य सिद्धो ऽसत्यां पदमात्र इति वचनं पदमात्रे नीत इति ज्ञा
पनार्थं॥ अनिर्दिश्येति वचनं मस्या अनुवाचस्यानिर्दिश्य कारप्रतिषेधे सत्यपि अनिर्दिश्येति सिध्यर्थं त
थाच वक्ष्यति। प्रातरनन्यासमनिर्दिष्टतानीति॥ अभित्वादेव सवितर्मह्यीयो: पृथिवीवनस्त्वाम
ग्ने पुष्कराद धीति तिस्र णामर्धर्चे त्रिष्टुब्रमेदासंप्रेषात्॥ त्वामग्न इति तिस्त्र ऋच: तासामुत्तमम र्ध
र्चे त्रिष्टुब्रा यदवसानं तत्रावसायामेरत। आसंप्रैषात्। आसंप्रैषश्रवणात्। नोत्तरामाददीतेत्यर्थ:॥
अन्यत्रापि तर्ह्यर्चोवसाने जायमाने त्वेतस्मिन्नेवावसाने॥ अन्यत्रापि विषये ऋचोमध्ये वसाने यत्रा
रमेदिति विधिरस्ति तत्राप्यासंप्रैषान्नोत्तरामारभेत॥ अग्ने हंसि न्यत्रिणमिति तिस्र ऋ मावपेत पुन:
पुना राजन्मन:॥ मथ्यमानोग्निर्यदि न जायते तदा तत्रैवावसाने स्थित्वा अग्ने हंसीत्यावपेत। पुन:पु
नरसकृदप्यावपेत। अग्ने राजन्मन: आजन्मन इति वचनाज्जाते सति संप्रैषात्प्रागपि सरक्त
स्य कांचिदप्यृचं नारभेत। एतस्मिन्नेवावसान इति वचनादेतस्मिन्नेवार्धर्चावसाने ऋगंतरमाव

शिष्टेनोत्तरां। अनावापपक्षे जातश्रवणानंतरमेवशिष्टेनार्धर्चेनउत्तरामर्धर्चमुपसंतनुयात्॥ ६

श्रौ० सू०
६९

पेनान्यत्र। अन्यत्र आगंतस्यवक्ष्यमाणस्यतंत्रमध्ये आवापो नेति गम्यते। तेन यथायूपसंस्कारे अंजनोच्छ्रयण परि
व्ययणेषु पदार्थानुसमयं कुर्वीत। क्वचिद्यूपे कर्मणि तदा आगंतोर्न आगतस्यावापः सिद्धो भवति। पाद
ग्रहणसूक्तग्रहणयोः प्रयोजनं आवापे पूर्वोविधिरेकाहे क्वचित्। पशावधिः सूक्ते तंत्रे कस्याश्चिदृचोर्वद्धू
नां वा आवापः स्यात्। सूक्तस्य वा वापः सिद्धो भवति। आवृत्तौ च सूक्ते समाप्ये वा वृत्तिरित्येवमादि॥ जाते उ
त्तानंतरेण प्रणवेन त्रिष्टुभमुपसंतनुयात्॥ जातश्रवणानंतरमग्ने दक्षीयस्य सूक्तस्य यः प्रणवः आ
गच्छति तेन त्रिष्टुभामर्धर्चमुपसंतनुयात्॥ उत नुदं तु ज्ञं तव आयंहस्ते नरवो दिन मित्यर्धर्चे आरभे
त्यदेवंदेववीतयइति द्वे अग्निनाग्निः समिध्यते त्वं ह्यग्ने अग्निना तं मर्जयंत सुक्रतुं यज्ञेन यज्ञ
मयजंत देवाइति परिदध्यात्॥ यज्ञेनेत्येनयर्चा परिदध्यात्। समापयेदित्यर्थः॥ सर्वत्रोत्तमां परिधा
नीयेति विद्यात्॥ सर्वत्र शास्त्रादिषु या उत्तमा उत्तमा ऋक् तां परिधानीयेति विद्यात्॥ धाय्ये विराजो नव
प्रयाजाः प्र[illegible]माज्वनुरआवपेत ईडितो अग्न आज्यस्य वेतु या सान कोऽग्न आज्यस्य वीतां दे राम
व्याहोतारा अग्न आज्यस्य वीतां तिस्रो देवीरग्न आज्यस्य व्यंत्विति॥ बर्हिरग्न इति प्रयाजानंतरमेतावा ६९

वपेत॥ अग्निः सोमः सविता सरस्वती पूषा मरुतः स्वतवसो विश्वेदेवा द्यावापृथिवी॥ अष्टौ देवताः। स्व
तवस इति मरुतां गुणः॥ आविश्वदेवं सत्पतिं वामम्द्य सवितर्वामस्तु श्वः प्रश्नं नव्रतेवयं अर्कं ते अन्य
यजतं ते अन्यदिहेह वः स्वतवसः प्र चित्रमर्कं गृणते तुरायेति॥ अस्मिन्पर्वणि निर्गुणां मरुतामेनेए नाममपि
भवतः। प्रकरणपठितत्वात् गुणशब्दस्य च स्वकार्यार्थतया प्यन्वयसंभवात्। नवानुयाजाः षड्ध्वंस्र्य मा
देवी द्वारौ वसुवने वसुधेयस्य व्यंतु देवी उषासानक्ता वसुवने वसुधेयस्य वीतां देवी जोष्ट्री वसुवने
वसुधेयस्य वीतां देवी ऊर्जाहुती वसुवने वसुधेयस्य वीतां देवा दैव्या होतारा वसुवने वसुधेयस्य वी
तां देवीस्तिस्रस्तिस्रो देवीर्वसुवने वसुधेयस्य व्यंत्विति॥ अनूयाजानामेष देशः कृतः। अनुयाजानां
सूक्तवाकस्य च शंयुवाकस्य चोपरिष्टात्॥ जिह्याः वाजिनमनावाह्या देवाः॥ त्रयाणामन्यतमस्मिन्काले वा
जिह्यो यागः कर्त्तव्यः। वाजिनं च तस्य द्रव्यं। द्रव्यशब्देन कर्मणः संबंधहेत्वर्थं तद्वचनमनावाह्या वा
हनप्रतिषेधो यमनुवादः। अपूर्वत्वादस्य कर्मणः। अपूर्वत्वं च पूर्वत्वे कारणाज्ञानात्। द्रव्यदेवतासं
बंधमात्रमत्र चोद्यते। नैतावता प्राकृतधर्मसंबंधोस्ति। उक्तं च प्राकृतधर्मसंबंधे कारणं। निर्वपत्या

दि।तस्यवाशाभावः तेनाप्रवर्त्तनं निश्चीयते।इष्टिशाब्दं वाच्यतावास्यनास्ति।तेनचाप्रवर्त्तते।तस्मादप्र
वर्त्तादुत्तरेष्वपि निगमेषु निगमनं नास्ति।आद्रेशावचं वाजिनामन्वायात्यत्वसंशयनिवृत्त्यर्थं।तत्रायं नं
संशयः।किंयस्य कस्यचित्प्रधानस्यानुपश्चादापात्यते क्रियते तत्सर्वमन्वायात्यमुतान्वायात्यशब्द
चोदितमेवेति।तत्र तच्छब्दचोदितेषु नैवान्वायात्यशब्दप्रवृत्तिनिमित्तस्यविशेषाभावाद्यत्किंचिदन्या तच्छब्दचोदिते चो ४
नुप्रवेशि तत्सर्वमन्वायात्यमितिकृत्वा वाजिनामप्यन्वायात्यत्वादनादेशः प्राप्नोति।एवंप्राप्तेनुप्रवे
शिनामादेशं विदधन्ननुप्रवेशित्वमन्वायात्यत्वेनिमित्तमितिदर्शितवानाचार्यः।अतस्तच्छब्दचोदि
तमेवान्वायात्यमितिसिद्धं।एतदेवादेशवचनस्य प्रयोजनं।नान्यदितिमंतव्यं॥शांनानवेनुवाजिनोहवे
षु वाजेवाजेवते वाजिनोनइत्यूर्ध्वज्ञुरनवानं याज्या॥ऊर्ध्वज्ञुः ऊर्ध्वजानुः।याज्याग्रहणस्य प्रयोजनं
मनुवषट्कारेऊर्ध्वज्ञुनामाभूदिति॥अग्नेवीहीत्यनुवषट्कारोवाजिनस्याग्नेवीहीति वा।यत्रक्वचैकं
संप्रैषद्वौवषट्कारौ समस्तावेव तत्र द्विरनुमंत्रयेत।संव्यवहारार्थमिदं।यत्रक्वचविषये एकस्मिन्नेवाध राम
र्युस्संप्रैषेतुल्यरूपौ चातुल्यरूपौ वा द्वौवषट्कारौ भवतः तत्रतौ वषट्कारौ समस्तावेव वा गोजइत्यादि ७०

नादि[illegible]त्रयेत।नवागरूत्तरमस्मिन्।याज्यादावागूर्भवतीत्युक्तत्वादनुवषट्कारेप्यागूः प्राप्नो।
निषेधः आगुरः प्रतिषेधो याज्याधर्माणामितरेषां प्रापणार्थं॥वाजिनभक्षमिळामिव प्रतिगृह्णो
पहूवमिच्छेत॥इष्टशिष्टं वाजिनं भक्षार्थं पात्रेणानीतं इळामिवांजलिना प्रतिगृह्यांजलौ निधायो
पहवमिच्छेत।भक्षणानुज्ञापनार्थं वाजिनभक्षसंबंधिनः सर्वान्यावेतेत्यर्थः।सर्वेषु भक्षसंबंधि
षु उपहवयाचनं कर्त्तव्यमित्युक्तं।तदनेनक्रमेणैवं प्रकारेण वाक्येन साहू।अध्वर्यउपह्वयस्वब्र
ह्मन्नुपह्वयस्वाग्नीदुपह्वयस्वेति।वचनसामर्थ्यादिवैषामयंक्रमः।एतेषामादितोंततोन्ये नुक्षिणः वाक्यं
चएवं प्रकारं कर्मनामधेयं युक्तमित्येतत्सर्वमवगम्यते।अतोंततो यजमानोपह्वयस्वेति एतदपि
लब्धं भवति।प्रतिवचनशब्दस्यास्मिंछास्त्रेनुक्तत्वात्तस्यचापेक्षितत्वाच्छास्त्रांतरोक्तस्योपहूतइति
शब्दस्यग्रहणं भवति॥यन्मेरेतः प्रसिच्यते यद्वामेअपिगच्छति यद्वाजायते पुनर्मावि[illegible]माविद्वानाते आ
नमावाजिनं कुरु।तस्य ते वाजिपीतस्योपहूतस्योपहूतो भक्षयामीति प्राणभक्षं भक्षयेत॥तस्य वाजि
नस्य किंचिदुदायानेन मंत्रेण वाजिप्रेत॥एवमध्वर्युर्ब्रह्माग्नीध्रः॥एते च प्राणभक्षं भक्षयेयुः।अध्वर्यु

सेन२

ग्रहणंनक्षणेपिक्रमोस्तीतिज्ञापनार्थं।नतस्यापिप्राणभक्षणनियमार्थं।अतोहोतुर्भक्षणानंतरं
अध्वर्युरिदिःक्रमेणभक्षणंसिद्धंभवति॥यजमानःप्रत्यंमितरस्वदीक्षिताः॥यजमानादितरेचयत्रदीक्षि
ताभवंति तत्रसर्वेप्रत्यक्षमेवभक्षयेयुः।तत्रसत्रेसंभवति।तत्रगृहपतेश्चान्येषांचप्रत्यक्षमेवेत्य
र्थः।तत्रचक्रमोमुख्यादिगृहपत्यंतः॥पौर्णमासेनेष्ट्वाचातुर्मास्यव्रतान्युपेयात्॥यस्मिन्नहनिवै
श्वदेवीक्रियतेतस्मादपरस्मिन्नहनिपौर्णमासेनेष्ट्वातदानीमेववक्ष्यमाणानिव्रतानिकर्तुमार
भेत।पौर्णमासीयागवचनंव्रतारंभकालविधानार्थंनित्यानामनिवर्तकत्वात्विकृतीनामिति।
व्रतग्रहणेनमानसोनियमउच्यते।अतःकेशानिवर्तनादीनिकरिष्ये।मध्वादीनिवर्जयिष्येइतिइ
दसंकल्पोभवेत्।एतद्व्रतरूपंनिवर्तनादीन्विकुर्यान्मध्वादीनिवर्जयेच्च।नकेवलंसंकल्पमा
त्रमेव॥केशान्निवर्तयीत॥निवर्तनंकर्तव्यं॥श्मश्रूणिवापयीत।अधःशयीत।मधुमांसलवणस्त्र्य
वलेखनानिवर्जयेत॥केशप्रसाधनादीनिस्वैरिकर्माणि।अवलेखनशब्देनोच्यते।पर्वाणित्रीणिका राम
र्याणि।पराणिपंचवर्जनीयानि।एतानिचातुर्मास्यव्रतानिचातुर्मास्यव्रतवचनंसर्वेषांपर्वणां ७१

नामेतानिव्रतानिनैकस्यैवसंनिहितस्यपर्वणइत्येवमर्थं॥अनृतोनार्यामुपेयात्॥स्त्रीशब्देनप्र
तिषिद्धस्यकालविशेषेप्राप्तिःसेयंप्रवीर्यं॥वापनंसर्वेषुपर्वसु॥उत्तरविवक्षार्थोयमनुवादः॥आद्यो
त्तमयोर्वा॥आद्योत्तमयोर्वापर्वणोर्वापनंनमध्यमयोरित्यर्थः।अनुवादेनावेआद्यंतयोरेववापनं
स्यात्तत्रविकल्पेनमध्यमयोर्वापनप्रसंगएवनास्तीतिगम्यते।तेनाद्यंतयोर्नित्यंवापनंमध्यमयो
रनित्यमितिसिद्धंभवति॥१४॥पंचम्यांपौर्णमास्यांवरुणप्रघासैः।यस्यांपौर्णमास्यांवैश्वदेवीकृ
तातामारभ्ययापंचमीपौर्णमासीतस्यांवरुणप्रघासैर्यष्टव्यमित्यर्थः॥पश्चाद्दार्शपौर्णमा नाम
सिकायावेदेरुपविश्यप्रेषितोग्निप्रणयनीयाःप्रतिपद्यते॥वेदेःपश्चादितिप्रदेशनार्थं।प्रणीयमानस्या
ग्नेःपश्चादित्यर्थः।प्रेषितवचनमुक्तप्रयोजनं।अग्निप्रणयनीयाःअग्निप्रणयनार्थाः॥प्रदेवंदे
व्याधियेतितिस्रःस्वाध्यायात्स्वरपदेवयंभमंत्रेविशेषेनिःस्वनीकदेवैरित्यर्द्धर्चआरभेत॥आसीनःप्रथमाम
न्वाहोपांशुसप्रणवां॥उपविष्टस्यैवासीनइतिवचनं।व्रजत्स्वपिप्रथमामसमाप्यनानुव्रजनायो
निष्ठेदित्येवमर्थं।सप्रणवांसमानप्रणवामित्यर्थः।प्रथमायास्तृतीयप्रणवेऽवसानेपित्रिमात्रए

वेत्यर्थः॥तत्र स्थानात्स्थानसंक्रमणे प्रणवेनावसायानुद्रुत्स्योत्तरां प्रतिपद्यते॥तत्र प्रणवेनावसायैव
तावतैव सिद्धे स्थानात्स्थानसंक्रमणादितिवचनमस्य विधेः सर्वार्थत्वाय तत्रोदात्तस्वरस्थानात्स्वरांतर
स्थानसंक्रमणे प्रणवेनावसायानुद्रुत्यैवोत्तरामृचमारभेत।कं गं तेश्वासस्य प्राप्तानावेसत्युप
नुद्रुत्य सवचनमवसानविधिबलादुच्छ्वासोपि प्राप्नोतीति।तं निवृत्यर्थमनुच्छ्वासविधानं तेना
वसानविधानमनुच्छ्वासार्थं साधितं भवति।अतो यत्रोच्छ्वासप्रतिषेधः तत्रावसानमपि न कर्त्तव्यं न
ना६ वेदिगोनादौ।अग्निमंथनाग्निप्रणयनादयो मंद्रस्वरेण प्रयोक्तव्याः।प्राथम्यात्तस्य स्वरस्य तदति
क्रमणे कारणाभावात्।अतो मंद्रेणैव तत्र सर्वविधेरनावालौ प्राणसंततं भवतीति विज्ञायते॥यदि वै
दमवसायानुद्रुत्य उत्तरामारभेत इति लक्षणासंततं भवतीति विज्ञायते।अथ तदर्थः॥उ
त्तरमग्निमनुब्रूर्जनुत्तरां॥अनुब्रूयादिति शेषः॥द्वयोः प्रणीयमानत्वादुत्तरमिति विशेष्यते।अग्नि
द्वित्वेप्याहवनीयद्वित्वाभावान्मंत्राणामूहो नास्ति॥इमं महे विदथ्याय शूषमयमिह प्रथमो धायि राम
धातृभिरिति राजन्यवैश्ययोराद्ये॥समानजातीयत्वादेवान्योर्बाधः प्रदेवमित्यस्याः।अयं राजन्य ७२
तु

वैश्ययोर्विशेषः।अन्यत्समानं॥पश्चादुत्तरस्यावेदेरवसाय॥शेषं समापयेदिति शेषः।वेदिद्वित्वा
दुत्तरस्या इत्युच्यते।उत्तरवेदेरुत्तरसोमेषु॥पश्चादवस्थाय समापयेदिति शेषः॥निहितेग्नावासीद
त होतृकउल्लोके विकित्वा॥निहोतां होतृषदने विदान इति द्वे परिधाय तस्मिन्नेवासने उपविश्य भूर्भुव
स्वरिति वाचं विसृजेत॥अत्र निहितेग्नावित्युत्तरादानस्य निमित्तं नाध्वर्युसंप्रैषः।तस्मिन्नेवेति यस्मिं
निदमनुवचनमारब्धं तस्मिन्नेवेत्यर्थः॥अन्यत्रापि यत्रानुब्रुवंननुव्रजेत्॥तत्राप्येवं कर्त्तव्यमिति
शेषः।अनुब्रुवन्निति वचनमनुवचन एवैतत्स्यान्नाभिष्टवनादिष्वित्येवमर्थं॥तिष्ठंत्संप्रैषे तु
तथैव वाग्विसर्गः॥तिष्ठतः संप्रैषेषु तिष्ठत एव वाग्विसर्गो भवति॥अग्निमंथनादि समानं वैश्वदेव्या॥
इत्यस्मिन्वैश्वदेव्या समानं भवति।द्वयोरपि मथ्यमानयोरग्निद्वित्वं नास्ति।एकस्यैवायम
ग्नेर्विभाग इति कृत्वा मूहेनाहवनीयाभिधायिनां प्रयोगसिध्यर्थं मग्निमंथनादि समानाख्या
नं।हविषां तु स्थाने षण्णां प्रभृतीनामैंद्राग्नी मारुतो वारुणः कः।अयमत्र विशेषः।षष्ठ्याः स्थाने
ह्रत्यैंद्राग्न्यादयः श्चतस्रः कर्त्तव्या इति॥ऐंद्राग्नी अवसाय तं श्रथ हृत्रमुत्तसनोति वाले मरुतोय

स्यादिक्षये शार्ङ्गदेवरमाअदे वेमैमे वरुणस्य घितलायामि अस्लणावंदमानः कृयानश्चित्रआस्तु
वाङ्हिरण्यगर्भः समवर्त्तताग्र इति। प्रतिप्रस्थाता वाजिनेत्हतीयः॥ उपहवेयावनेयंहती योनवति।
भक्षणे चतुर्थः॥ उपहवयावनं होत्रादियजमानानां तं होतुरधय्यादि। यजमानस्याग्नीध्रं दत्तं।
भक्षणं तु होत्रादियजमानो तमेव वैश्वदेवामथ्ये वमेव। संस्थितायामवभृथं व्रजंति॥ सं
स्थितायामिष्टौ अवभृथकर्मार्थमुदकं गच्छंति धर्यवदित्यर्थः। तत्रावभृथे स्थितःकृताकृता॥ कृतिरे
व कृतां कृतं वा कृतं वयस्याः साकृता कृता अनित्ये त्यर्थः। इष्टयनावेयदन्यदप्यवधानादिन
न तस्य वै नभवति। तामुपरिष्टाद्व्याख्यास्यामो द्वयोर्मासयोरैंद्राग्नः पशुः॥ वरुणप्रघासपौर्णमासी
मारभ्यहती यस्यां पौर्णमास्यामित्यर्थः॥ अनेनचातुर्मास्यांगत्वेन पश्वंतरं विधीयते। नाने
स्य ननिरूढकालो विधीयते। अतो निरूढोपि स्वकाले कर्तव्य एव॥१५॥ नथाततः साकमेधाः॥ यथा
वरुणप्रघासेभ्यः ऐंद्राग्नः तथैंद्राग्नात्साकमेधाः। द्वयोर्मासयोरित्यर्थः॥ अनीकवदादीनामा राम
दित्यांतानां साकमेधा इति नाम॥ एवं द्वि स्त्रित्व इष्टयोनु सवनं॥ यस्यां पौर्णमास्यां साकमेधा ७२

यष्ट्यास्तस्यां सर्वेषु सवनेसवने एकैकेष्टिः कार्या॥ प्रथमायाग्निरनीकवान्॥ अनीकवंतमूत
येग्निं गीर्भिर्हवामहे। स नः पर्षदति द्विषः। स नू ना नीकेन सुविदत्रो अस्मे इति॥ उत्तरस्यां हविर्मन्तौ
मरुतः सांतपनाः सौति मन्ते। सांतपना इदं हविर्यो नो मरुतो अभि दुर्हणायुरति। मरुद्भ्यो गृहमेधेभ्य
उत्तराज्यभागप्रभृती लीता॥ मरुतो गृहमेधा देवताः। आज्यभागप्रभृति इस इलांतावेति। आज्य
भागप्रभृतीळान्ता॥ गृहमेधासआगत प्रबुध्मावईरते महांसीति॥ आम्नातत्वादेत एव गृहमेधिन्यौभ पि५
वतः॥ पुरुत्रिमं तौ विराजौ संयाज्ये अनिगदे॥ इह विराजौ संयाज्ये ईतेते संयाज्ये अनिगदे निगदरहिते भ स्तु
वत इत्यर्थः। निगद इति अया ळग्निरित्यादिजुषतां हविरेन इत्येवमंत उच्यते। अन्यत्राप्यनावाहने॥ गृह
मेधीयादन्यत्रापि यत्रावाहनं नास्ति तत्राप्यनिगदे संयाज्ये भवतः। अन्यत्रापीति योगविभागार्थमुच्य
ते। तस्यप्रयोजनं। अन्यत्रानावाहने निगदे भवतः। इह त्वावाहनेनावाहने वा अनिगदे एवेत्येवम
र्थं। अत एवात्र पक्षे आवाहनमप्यस्तीति ज्ञापितं भवतीति गम्यते। एवं सत्ये संयाज्याग्रहणस्ये
दं प्रयोजनमिदं मनिगदत्वविधानं संयाज्यामात्रस्य न विराज एवेति ज्ञापनार्थं॥ आवाहनेपि

श्रौ० वृ०
७४

पित्र्यायां पशौ च। अनयोरावाहने सत्यापि निगदे एव भवतः। बहुवैव स्यां राज्ञा मन्नं प्रसुवीरन्।
प्रसुवीरं निति बहुवचनं लोके यष्टारो बहव इति प्रसुवीरन् द्युरित्यर्थः। एतस्यां राज्यामिति वचना
द्रात्रावेवेष्टिः परिसमाप्यत इति गम्यते इति। तस्या विवासे प्रणादि [illegible]। विवासो राज्याः पश्चाद्भा
गः। पौर्णदर्वमिति कर्मनाम। तत्तस्मिन्काले कर्त्तव्यं। रक्षणे रवाणो॥ रक्षणे रुवति। स्नान इलोवा॥
मे धेवारुणावति। आग्नीध्रं हैके रावयंति ब्रह्मपुत्रं वदंतः। तस्याप्यभावे ब्रह्मपुत्रत्वे नाग्नीध्रं संबो ध्रं
ध्य रावयेति ब्रह्मपुत्रो रुहीत्येवं। यदि होतारं चोदयेत्तस्य याज्यानुवाक्ये प्रणादि दर्वि परापत सु मु
पूर्णा पुनरापत। वस्नेव विक्रीणावहा इषमूर्जं शतक्रतो। देहि मे ददामि ते नि मे धेहि नि ते दधे। अपा
मित्य मिव संभर क्रीबीद दत्ते ददादिति। एतावत्कुर्वंतो धर्यतां यदि होतारमपि चोदयेयुः। अनुब्रूहि
यजेति तदेते याज्यानुवाक्ये भवतः। शतक्रतु लिंगात् [illegible] पौर्णदर्वेष्टत्वामानाच्च इंद्रोस्य देवता भव ऐंद्रं
ति। मरुद्भ्यः क्रीडिभ्य उत्तरा। इष्टिरित्यर्थः। [illegible] परोक्षवार्त्रघ्नो॥ नाम ७४
आज्यभागो परोक्षवार्त्रघ्नो भवतः। क्रीडं वः शर्द्धो मारुतमनर्वाणं रथेशुभं। क्रीडिनामेते
मरुतां

आम्नाते। क्रीडिनामप्येते याज्यानुवाक्ये भवतः। [illegible] संयाज्ये।
वाजिनावत्थवतं [illegible] माहेंद्रीतीष्टिनाम। आमिक्षाभावादेव वाजिनाभावे
सिद्धे वाजिन प्रतिषेधं कुर्वन्वाजिनस्य प्रधानसंबंधं दर्शयति। तेन वाजिनस्य मध्यमः स्वरः साधि
तो भवति॥ [illegible] विश्वकर्मा॥ [illegible] स्य गुणः।
आद्यात्तिस्रो विकल्प्यं ते विश्वकर्मांत्याः। अतोष्टावत्र देवताः॥ [illegible]
याय विश्वकर्मन्हविषा वावृधानो या ते धामानि परमाणि यावमेति॥ १६॥ दक्षिणाग्नेरग्निमतिप्र
णीय पित्र्या। दक्षिणाग्नेरग्निमानीयातीत्य तं देशमन्यत्र निधाय तस्मिन्नग्नौ पित्र्या नाम कर्म कर्त्त
व्यं। अतिप्रणीय पित्र्येति वचनात्तस्मिन्नेव पित्र्या भवेत्। नैमित्तिकं त्वाहवनीयादिष्वेव। आहवनी
योप्यत्र विहरणीयः। उत्तरत्रोपस्थानदर्शनात्॥ [illegible] योगविभाग
प्रयोजनं मनति प्रणीतवर्यायामपि [illegible] धर्मप्रापणार्थं। [illegible]
[illegible] न केवलो [illegible] गृह्यते॥ किंतु अनुमंत्रणालोप प्रतिषेधा[illegible]

पादीनां प्रमाणमुपलक्षणार्थमिति गम्यते। नान्यस्योपांशुप्रयोज्यस्यापि। तेनेळा निगदस्य लोपः सि
द्धो भवति। लुप्ताञ्जपाय स्यात्सा लुप्तजपा। होतारमद्य वृथा इत्यस्य निगदे देवेद्धास्योपांशुत्वसिद्ध्य
र्थे नञ्पदिति वचने नञ्पर्युदासाल्लोपत्रात्कर्मनिवृत्त्यर्थं। तद्वर्जनवचनं इतरयोः प्राप्तस्य प्रतिप्रसव प्रतिषेधस्य
एव। तस्यां प्राचि कर्मणि दक्षिणा। तस्यामिति वचनं कृत्स्नप्राप्त्यर्थं। प्रकृत्यात्तद्धर्मित्वात्रापि प्रापणा ३
र्थं। यानि प्रकृतौ प्राचि कर्माणि प्राङ्मुखानीत्यर्थः। नान्यस्यां दक्षिणामुखानि कर्तव्यानीत्यर्थः। इ
तराणि तथान्वयं। यानीतरदिङ्मुखानि प्रकृतौ तान्यस्यां निर्दिष्टदिक्कानि अनिर्दिष्टदिक्कानि च तथा
न्वयं कर्तव्यानि दक्षिणां दिशां प्राचीं कृत्वा तदनुसारेणान्यदिङ्मुखानि कर्तव्यानीत्यर्थः॥ उशन्तस्त्वा नि
धीमहीत्येतां त्रिरनवानं ताः सामिधेन्यः॥ एतामृचं त्रिरनुब्रूयात्। ता इति वचनात्ता एव सा
मिधेन्यो न पुनरभ्यसितव्या इत्यवगम्यते। तासामुत्तमेन प्रणवेनावह देवान्पितॄन्यजमानायेति प्रति
पत्तिः। तासां सामिधेनीनां उत्तमेन प्रणवेनावह देवान्यजमानायेति प्रतिपत्तिरेव संधेया। नाग्ने महानि राम
 त्यादि परिभरसीत्यं तं लुप्यतो। प्रतिपत्तिश्चैवरूपा भवति। पित्र्यायां। प्रकृतौ देवा इज्यं तद्वतितेषां संकीर्त्त ७५

नं कृतं। इह च देवाश्च पितरश्च इज्यंत इति पितृशब्दोपि प्रयोक्तव्य इति। सर्वत्र देवशब्दो वर्तिमंत्रे पितृशब्दप्रयो
ज्यत्वेन प्राप्ते स्वार्थ एव देवशब्दः प्रयोज्यो न परार्थ इति कृत्वाचार्येण्यत्र परार्थत्वादप्रयोगं मन्यमानस्तत्सहि
तं प्रतिपत्तिवाक्यं पठितवान्। तेनान्यत्र पितृशब्दो न प्रयोक्तव्य इति सिद्धं। प्रतिपत्तिवाक्यमुक्त्वा नवोव
क्ष्यमाणदेवता आवाहयेत्। अग्निर्होता याव इहस्वं महिमानमावहेत्येतस्य स्थाने ग्निं कव्यवाहनमा
वाहयेत्। आज्यपां तदेवता आवाहय प्रकृतस्य स्विष्टकृदावाहनस्योद्धारं कृत्वा तत्स्थाने ग्निं कव्यवाहन
मावाहयेत्। उत्तमे वेन प्रयाजे प्राणाज्यपेभ्यो निगमयेत। उत्तमेव प्रयाजे प्राणाज्यपेभ्यः अग्निं कव्यवाह
नं निगमयेत्। स्वक्त्वा केवाग्निहोत्रेणेत्येतस्य स्थाने निगमयेदिति वर्तते॥ नेद प्रादेशाः। कार्यार्थत्वान्मंत्रा
णां मंत्रलोपेपि कार्यस्यालोप इति कृत्वा कार्यस्यापि प्रतिषेधः क्रियते॥ न बर्हिष्मंतो प्रयाजोनुया
जो॥ नेळायां न सभक्षणं। भक्षेषु प्राणभक्षमिति प्राप्ते इळायां भक्षणमेव नास्ति कुः प्रसंगः प्राण
भक्षस्येत्यर्थः। भक्षवचनं प्रकृतावर्वान्तरेळाभक्षादन्य इळाभक्षोस्तीति ज्ञापनार्थं। इळायामिति
 सप्तमीनिर्देशादिळाविषयं यद्भक्षमिति गम्यते। नेळाया एव न भक्ष इति। तेनावान्तरेळाभक्षणं र

श्रौ॰वृ॰
७९

ष्ठानक्षणं चात्र नास्तीति गम्यते। न मार्जनं॥ इष्टानक्षणां गत्वा देवमार्जनाभावे सिद्धे तदभाववचनं
तदंगत्वज्ञापनार्थं। न सूक्तवाकेनामादेशः॥ सूक्तवाके यजमाननामतं नादेष्टव्यं। सूक्तवाकवचनं
स्रुक्गादापनादिप्रश्नधर्मादिशाद्यप्रसंगनिवृत्त्यर्थं। इरिति तःसीद होतरिति वोक्त उपविशेत्। उत्तरस्यो
पवेशनस्येदं निमित्तं द्वयं विधीयते। प्रादेशाकरणाद्यर्थत्वात्सर्वस्य तदभावे भावः। प्रादेशास्याभाव
उक्तः। अनुमंत्रणमप्यत्र नास्ति। अनुमंत्रणाम्नायनोपस्थानानां मंत्राः दरूपत्वात् क्रियायां मंत्रा
भावे क्रियायाअप्यभावइति। तस्मादत्र स्रुगुपवेशनं नास्ति। मानुषत्रा इत्यतः प्राम्नायइस्तवादि
तद्गत्वोपविशेदिति स्कत्वादभिक्रमणादि सर्वं न भवति। निरसनोपवेशनबर्हिरुपस्पर्शनानि मं
त्ररहितानि कुर्यादेव॥ जीवा तु मंतोसव्यातत्सुपरस्थाः प्राचीनावीतिनो दक्षिणोग्निरिति। उपस्थविधानं
येषां तदंगतेषामेव। हविर्ग्रहणं प्रधानेष्वेवायं धर्मइति ज्ञापनार्थं। तेन प्रधानमध्येपि यत्प्रायश्चित्तार्थे
न प्राप्तं तस्यायं धर्मोस्ति वलीति गम्यते॥ दक्षिणाग्नी धः उत्तरोध्वर्युः॥ इदं अनुवाक्ये। अध्यर्धाभि राम
नवानं। अत्रानुवाक्याकार्यस्यैकत्वान्मध्ये प्रणवो नास्ति॥ ओं स्वधेत्याश्रावणं॥ अस्तु स्वधेति प्रत्या ७९

श्रावणं। अनुस्वधास्वधेति संप्रैषः॥ अनुस्वधा इत्येकः स्वधेत्यपरः। एकवचनं जात्यभिप्रायं अनुस्व २
धास्वधेति दीर्घः पठितव्यः। यस्य धेत्याग स्वधामहइतिवा। स्वधानमइतिवषट्कारः। अत्र ॐ नस्वधे
त्यादयः स्वधाशब्दादीर्घांताएव प्रयोक्तव्याः। अध्वर्युसंप्रैषपाठप्रयोजनं। तदेवकत्वस्य कार्यकरणा ८३
बा र्थं। नित्याः प्लुतयः॥ उक्ताः प्लुतयः। प्रकृताद्वितीये उपात्त्ये वाय दक्षरस्थाः प्लुतिः। एते चापि तदक्षरस्थैव
कार्यत्यर्थः। पितरः सोमवंतः सोमो वा पितृमान्पितरो बर्हिषदः पितरोग्निष्वात्ता यमः॥ पितॄणां सो
मवत्ता गुणः। सोमस्य पितृमत्ता गुणः। बर्हिषदोग्निष्वात्ताइतित्वि पितॄणामेव गुणः। आद्ये वैकल्पिके।
उदीरतामवर उत्परासः रत्वयाह्निनः पितरः सोमपूर्वे उपह्वताः पितरः सोम्यासस्त्वं सोमप्रचिकितो म
नीषा सोमो धेनुं सोमो अर्वंतमाअर्व सोमपितृभिः संविदानो बर्हिषदः पितरऊत्यर्वागादपितृंत्सुवि
दत्राँ अविसीदं पितृभ्यो नमो अस्त्वग्निष्वात्ताः पितर एहगच्छत ये चेह पितरो ये च नेह यं अग्निदग्धाये
अनग्निदग्धाइमं यम प्रस्तरमाहिसीदेति द्वे परेयिवांसं प्रवतो महीरनु॥ पंचानां तिस्रस्तिस्रऋचः। वैव
स्वतायस्वे मध्यमायाज्या॥ यदि सोमो वैवस्वतो देवतांतत उत्तमे त्रिके मध्यमा याज्या भवति। प्रथमो

चमेअनुवाक्ये इति॥ येताहृपुर्दैवत्राजेदमानास्त्वदग्नेकाव्यात्वन्मनीषाः स प्रत्नथा सहसाजायमानः
इति॥ स्विष्टकृतइ विशेषः। अग्निः स्विष्टकृत्कव्यवाहनः॥ प्रकृतौ योग्निः स्विष्टकृदिद तत्कार्यं करोग्निः कव्य
वाहन इत्यर्थः। तेनात्र स्विष्टकृच्छब्देन प्रयोक्तव्यः। प्रकृत्या तदूर्ध्वं॥ स्विष्टकृत ऊर्ध्वं प्रकृत्या भवति। सर्वोत्तु
पस्थतादयो भवतीत्यर्थः। वचनमिदं स्विष्टकृत्यपि प्रापणार्थं। अंगत्वादेवतुत्तरत्र प्राप्य नाधाद्। वषट्कार
क्रियायां चोर्ध्वमाज्यभागाभ्यामन्यमंत्रलोपात्। मंत्रलोपप्रभृतेन पूर्वोक्ताः सर्वे विकारा लक्ष्यन्ते। तेभ्योन्येषामस
योत्तरयुगपस्थतादीनामभावाय प्रकृतिभावो विधीयते। प्रधानेषु स्विष्टकृति च स्वधाकारवर्जं इति वा व पि
षट्कारेणाक्रियावेत ऊर्ध्वमाज्यभागाभ्यामिति वषट्कारक्रियास्थानलक्षणार्थं। तेनाज्यभागाभ्यामूर्ध्वं स्वि
ष्टकृत्स्यं तेस्थानेव वषट्कारक्रियायां प्रकृत्या भवतीति गम्यते। तत्र मंत्रलोपादिः पूर्वो विकारः सर्वप्रकाला
यांपि व्याप्याया मासमाप्तेर्भवत्येवारके कानोनुवाक्या॥ प्रकृतिभावादेव एकत्वे सिद्धे एकवचनमिदं तयोरेकैक
स्या ग्रहणार्थं। योग्निः कव्यवाहनस्त्वमग्न ईळितो जातवेद इति संयाज्ये। वषट्कारक्रियायामेव। नक्षे राम
षु प्राणभक्षान्भयित्वा बर्हिष्यनु प्रहरेयुः। संस्थितायां पात्नानुयाजायां दक्षिणावृतो दक्षिणाग्निमुप ७७

कान्व्रजंति। यदानूयाजाभ्यां प्राक्तदा समाप्येष्टिं त्र्यंबकार्थं व्रजेयुः। त्र्यंबका नाम कर्मविशेषाः। तत्रा
ध्वर्यवः कर्माधीयंते॥ तत्र यदध्वर्युणोक्तं तद स्मदीयैरपि कर्तव्यमित्यर्थः। प्रत्येत्यादित्यया चरेति। अदि
तिरग्रू देववानादित्यः। आदित्यानामाज्यानुवाक्यानाम्नात्। पुष्टिमंतौ धाय्ये विराजौ॥ ५॥ पंचम्यां ना
पौर्णमास्यां शुनासीरीययो॥ साकमेधकालमारभ्य यो पंचमी पौर्णमासी तस्यां शुनासीरीया कर्त
व्या। शुनासीरीयेति कर्मनाम। अवर्गयथोपपत्तिवा॥ पंचम्याः पौर्णमास्या अर्वाग्विय यत्र काले कर्तुं
संभवति तत्र वेत्यर्थः। ततोद्य हेऽत्य हद्र इति वा। त्वाऽंतगोक इत्यर्थः। वाजिनवजौसि मानावैश्वदेव्या। हविर्षा
दुस्थाने पशु प्रभृती नां वायु र्नियुत्वान्वायुर्वा शुनासीरौ वि इंद्रो वा शुनासीर इंद्रो वा शुनः सर्य इ
नामः। नियुत्वानिति वायोर्गुणः। शुनासीरः शुनश्च इंद्रस्य गुणौ॥ प्रथमद्वितीयौ वैकल्पिकौ पुनस्त्वि
याऽपि विकल्प्यं तेसूर्यस्योत्तमवचनं देवतांतरप्रवेशोपि सूर्यं उत्तम एव अन्यत्र क्रमांतरं भवतीत्येव
मर्थं॥ आवायो भूषशुचिपा उपनः प्र याभिर्यासि दाश्वांसमच्छ सत्वन्नोदेवमनसे वायप्रकुर्तीयत्त राम
आनइ शुनासीराविमां वाचं जुषेथां शुनं नः फाला विकृषंतु भूमिमिंद्रं वयं शुनासीरमस्मिन्य ७८

निष्ठते ॥ उन्नयतो विहाराद् अनियमे प्राप्ते नियमार्थं दक्षिणावृद्वचनं । अनावृत्यानतिप्रणीतचर्यायां । अनति
प्रणीतचर्याया पश्चाद्यामावर्तनिमेकस्यैव चोपतिष्ठते । तथैवाभिमुखत्वं संगवात् ॥ अयाविभज्य जानयन्कृता
पिसद्विघृणिरुरुवीराय गातुः । सप्रत्यक् देहरूपां मन्धो अग्नं स्वाय तनूं तन्वाभेरयतेति । अयं दक्षिणाग्नेरुप
स्थानमन्त्रः । आवृत्यत्वेवेतरौ ॥ अतिप्रणीतचर्यायां दक्षिणावृद् दक्षिणाग्नेरुपस्थानमुक्तं । अनतिप्रणीतच
र्यायामनावृत्यतस्यैवोपस्थानमुक्तं । इदानीं गार्हपत्याहवनीययोरुपस्थानमुच्यते । तुशब्दो विशेषविध्यर्थः ।
एवशब्दोऽवधारणार्थः । अतिप्रणीतचर्यायामनतिप्रणीतचर्यायां च गार्हपत्याहवनीययोरावृत्यैवो
पस्थानमिति ॥ आहवनीयं सुसंदृशं त्वेति पंक्त्या ॥ पंक्तिवचनं प्रतीकसंदेहनिवृत्त्यर्थं । गार्हपत्यमग्निं
तमन्यहूति ॥ एकयर्चानिरुक्तेन । उत्तरत्रसूक्तवचनात् ॥ अथैनमभिसमायंति मा प्रगाम मार्गनेत्वं नद्ग्रति
जपंतः । एते सूक्ते जपंतः एनं गार्हपत्यमभितः समापयंति । प्रादक्षिण्येन । पूर्वेण गार्हपत्यं सूक्ते स
माप्य सव्यावृत स्वं स्वं वक्कान्व्रजंति । गार्हपत्यस्य पुरस्ताद्यो देशस्तस्मिन्देशे यथा सूक्ते समाप्येते त
था समापयंति । सूक्तग्रहणमग्निं तमन्य इत्यत्र ग्रहणार्थं । यदीष्टिं समाप्योपतिष्ठेते तत्र स्वं स्वं व

सं कु १

तदात १

वेदोऽसि वेदो विदेय । वेदोऽसि वित्तिरसि विदेय कर्मणीस्थः करणीस्थः क्रियास्थ सनीस्थः सनितारोस्थः सनेयं घृतवं
तं कुलायिनं वेदो दत्तो वाजिनं । यं बहव उपतो विदेय प्रजां विदेय कामाय वो ॥

शे हवामहे । स वाजेषु प्रनोविषत । अश्वायंतो गव्यंतो वाजयंतः अनेकोवेम मघवानमिंद्र मश्वायं
तो गव्यंतो वाजयंतः स्तरणि विधिद्वातिश्चित्रं देवानामुदगादनीकमिति याज्यानुवाक्याः ॥ याज्यानुवा
क्याग्रहणं या अस्मिन्प्रकरणे आम्नाता याज्यानुवाक्यास्ता एवैतत्प्रकरणसंबंधिनीनां देवतानां ना
न्यातरादागतानामपि कथंचिदपि संबंधेऽगृहीतव्याः । नान्या इत्येवमर्थं ॥ समाप्य सोमेन यजेत तो वान्को
पशुना ॥ चातुर्मास्यानामेतावंगभूतौ पशुसोमौ विरूढ इत्योतिष्टोम प्रकृतिकौ समाप्तिनिमित्तत्वादन
योः । चातुर्मास्यानि वा पुनश्चातुर्मास्यानि वा पुनः । चातुर्मास्यैरिति वक्तव्ये अन्यथा वचनं नेमानि तदंग
भूतानीति ज्ञापयितुं । तेन पुनरपि तान्येवाभ्यसितव्यानीति गम्यते । अभ्यासपक्षे समाप्ताव पिनैव
पशुसोमौ कर्तव्यौ । तस्य पक्षस्य परत्वाभ्यां सहवैकल्पिकत्वात् । वरुणप्रघासेष्वुद्गुच्यते । अग्नि
द्विलाभावादग्निचावि नाम ऊहः । घृतवती मित्यत्रा धर्ममन्त्येषां विश्ववाराद्वियूहः । वेदो
सीत्यत्र वेदविषयाणां पदानामूहः । अन्यदप्येवं रूपमक्तिवेत्तदन्वेषणीयं ॥ १५ ॥ इत्याश्व
लायनसूत्रवृत्तौ नारायणीयायां द्वितीयोऽध्यायः ॥ छ ॥ ॥ पत्री ॥ अधिकानोयं प्राकृपायश्चित्ता

श्रौ०वृ० तो
७८ धिकारात् पशुगुणकं कर्म पशुरित्युच्यते॥ ऐकादशिनेषु नयतोऽन्यतरतो वा॥ तस्य पशोः नयतः अन्य
तरतो वा इष्टिः कर्तव्या॥ आग्नेयी वा॥ यासौ विहिता इष्टिः पशोः नयतोऽन्यतरतो वा कर्तव्यत्वेन चोदिता सा
ग्निदैवत्या वा भवेदित्येकोऽर्थः। अपरश्चार्थो वाशब्दाल्लभ्यते यथा आग्नेयी इष्टिः पशोः नयतो
ऽन्यतरतो वांगत्वेन विहिता सा न भवेदिति। तेन यमिष्टिरनित्यैवावगंतव्या। अतः सिद्धस्य
तंत्रेषु पशुषु कर्तव्या अंगमङ्गं तत्पुनः कर्तव्येति। आग्नावैष्णवी वा॥ इष्टेः करणपक्षे देवताविकल्पो
नेन विधीयते। उक्ते वा। आग्नेयी वाग्नावैष्णवी च एकस्मिन् पशुप्रयोगे द्वे वा इष्टी भवेतां॥ अ
न्यतरा वा पुरस्तात्॥ यदा उक्ते स्यातां तदैका पुरस्तादितरोपरिष्टादित्येवं न वक्तव्यं। नो नेसंदेहे तेन न
यतोऽन्यतरतो वा भवेतामिति सूत्रार्थः। उक्तमग्निप्रणयनं। उक्तग्रहणं वारुणप्रघासिकस्य स
विधिकस्य ग्रहणार्थं। पश्चात्साग्न्यबोधिकायामवेदेः प्रविश्य प्रेषितो यूपायाज्यमानायांजतीत्याम ध
रे देवस्य नरस्त्यमेन वचनेनाध्वर्युः आग्नमे त्र॥ वेद्यंतरस्यागावपि पाश्चबोधिकायाइति विशेषो न राम णं
त्वनेन बहूपचारसिध्यर्थं। प्रेषित वचनं बहुयूपके कर्मणि लांजनादिनां पदार्थानुसमयार्थं॥ ७९

तेन चात्वालोत्करान्तरेण प्रवेशः सिद्धः १

यमाणे प्रेषितः प्रेषितो नुब्रूयादित्येवमर्थं। यूपायाज्यमानायेति यूपमज्यमानमभिधानुमेताम्स्वम
नुब्रूयादित्येवमर्थं। तस्योत्तमेन वचनेनेति संबंधः। उक्तं यस्त्व वनस्पते समिद्धस्य श्रूयमाणः पुरस्ता
द्धर्मं शुणकृतयइति द्वे जातो जायते सुदिनत्वे अह्नामित्यध्वर्यु आरमेध्रु वा सुवासाः परिवीत आगा
दिति परिदध्यात्॥ परिदध्यादिति वचनं पदार्थानुसमयप्रतिपदार्थं न तु वचनस्य भेदइति ज्ञापनार्थं॥ ना
एकतंत्रे बहवः सपशवो यूपं परिधाय संस्कुर्याद् न भिद्दं कृत्य यान्वो न यो देवयंतो निमिम्युरिति वह्निः॥
यस्मिन्कर्मणि एकस्मिन्नेव पशुतंत्रे बहवो यूपाः सपशवश्च तत्रांत्यमनुवचनं परिधाय संस्कुर्याद्यू
पान्। कांडानुसमयात् पर्यायेणोदमुच्यते। अंत्यमिति तदनुवचनस्य भिन्नत्वात् पदार्थानुसमये त्वे
कमेवानुवचनं भवति। एकतंत्रवचनं एककर्ममात्र निवृत्त्यर्थं। बहव इति द्वयोर्निवृत्त्यर्थं। सपशव
इति अपशुकत्वकूप निवृत्त्यर्थं। पंचविंशीं। आनभ्यासमेके॥ प्रथमोत्तमयोरनभ्यासमित्यर्थः॥ उक्तम
ग्निमंथनं तथा धाय्ये कृतास्कृतावाज्यभागौ। आवाहने पशुदेवता भ्यो वनस्पतिमनंतरं॥ आवाहयेदि
ति शेषः। आवाहनग्रहणं आवाहनादिर्वेष्टिकेष्ववनिगमे पुनिगमनं वनस्पतेर्न पाशुके इत्येवमर्थं।

अतः सूक्तवाकप्रैषे निगमनं न कर्तव्यं भवति॥ संमार्गैः संमृज्य प्रहृताहुती र्जुहुयात्॥ संमार्गैः संमृज्य उदकं
स्पृष्ट्वा प्रहृताहुती र्जुहुयात्। प्रहृताहुती इति कर्मनामधेयं गुणविधिः॥ जुष्टो वाचे भूयासं जुष्टो वाचस्पतये दे
वि वाक्। यद्वाचो मधुमत्तमं तस्मिन्मा धाः सरस्वत्यै वाचे स्वाहा पुनः शब्दाय वंचवे प्रादः स्वाहा वाचे स्वाहा
वाचस्पतये स्वाहा सरस्वत्यै स्वाहा सरस्वते महोभ्यः संमहोभ्यः स्वाहेति॥ सकृद्गृहीतैकाहुतिः पुनः स
कृद्गृहीता पंचाहुती र्जुहुयात्। आहुतिसंख्याभेदादेव द्रव्यभेदे सिद्धे विग्रहवचनं मंत्रविग्रहणार्थं।
सोमएवैके॥ सोमग्रहणेन सौत्येमहन्युच्यते सौत्यएवाहनि अयं होमो नान्यस्मिन्नित्येके॥ प्रशास्तारं तीर्थेन
प्रपाद्य दंडमस्मै प्रयच्छेद्दक्षिणोत्तराभ्यां पाणिभ्यां मित्रावरुणयोस्त्वा बाहुभ्यां प्रशास्त्रोः प्रशिषा प्रय
च्छामीति॥ विहारप्रपदनस्य तीर्थेनैव सिद्धत्वात्तीर्थेनेति वचनं प्रशास्तस्तीर्थेन प्रपद्यस्वेति संप्रैषला
भार्थं। प्रदानमंत्रो मित्रावरुणयोरित्यादि॥ तथा युक्ताभ्यामेवेतरो मित्रावरुणयोस्त्वा बाहुभ्यां प्रशास्त्रोः
प्रशिषा प्रवक्ष्यामीति गृह्णाम्यवक्रो विधुरो भूयासमिति॥ प्रतिगृह्णीयादिति शेषः। तथा युक्ताभ्यामि राम
ति दक्षिणोत्तराभ्यां पाणिभ्यामित्यर्थः॥ प्रतिगृह्योत्तरेणा होतारमतिव्रजेद्दक्षिणेन दंडं हरेन्न चानेन ८०

संस्पृशेदात्मानं वान्यं वा प्रैषवचनात्॥ अनेन दंडेनात्मानमन्यं वा न संस्पृशेत्। आप्रैषवचनात्। याव
त्प्रैषोच्चारणं नास्ति तावदयं नियमः। आरभ्य प्रथमप्रैषेणायं नियमः॥ अन्यान्यपि यज्ञांगान्युपयु
क्तानि न विहारेण व्यवेयात्॥ अन्यान्यपीति वचनात् यत्पूर्वोक्तमुत्तरेण होतारमतिव्रजेद्दक्षिणेन दं
डं हरेदिति तदेतेपि व्यवायपरिहारार्थमेवेति गम्यते। तेनैतद्द्वैविध्यं भवति। हवींषि चाग्नयोत्तरत
मादहविष्षु च प्रधानाप्रधानविशेषोक्तिस्तत्स्रुगादीनि साधनानि तेषु च विशेषोन्वेषणीयः। ततः
कर्तारः स्तेषु च स्वामी मुख्यो द्वितीयस्तृतीयश्चतुर्थेषु विशेषश्लेवबुधाएते प्रपवारके ते यज्ञांगानि
विहारेणाव्यवेयानि भवंति। उपयुक्तवचनं प्रवृत्तकर्मणामेव ग्रहणार्थं। सर्वार्थं चेदं सत्रं व्यवायप्र
तिषेधेपरत्वात्॥ दक्षिणाहोतृषदनात्प्रक्रोवस्थाय वेद्यां दंडमवष्टभ्य ब्रूयात्प्रैषांश्चादेशं। वेदिश्रोण्यां बहि
र्वेदिहोतृसदनं तस्य दक्षिणतो बहिर्वेदि स्वयमवस्थायां तु वेदिदंडमवष्टभ्य ब्रूयात्। प्रैषानादेशं आप्रै
षणप्रैषणमित्यर्थः। यावंति प्रैषणार्थानि प्रैषणानि संति तावत्सु प्रैषणेषु प्रैषान्ब्रूयादिति तदुक्तं भ
वति। प्रैषाम्नाये परिपठितान्सर्वान्प्रैषान्मैत्रावरुण एव प्रेषितः प्रेषितो नुब्रूयादित्यर्थः। यज्ञार्थे मैत्राव

रुणोनुकर्षणार्थः। तेनञ्चायतेव्यवायप्रतिषेधसूत्रं सर्वार्थमिति। अनुवाक्यांनसप्रैषे। प्रवंप्रैषात्। अ
नुवाक्यंब्रूयादितिशेषः॥ पर्यग्निस्तोकमनोतान्नीयमानस्तकानिच। एवंभूतमैत्रावरुणानुकर्षणा
र्थश्चशब्दः। सोमआसीनोन्यत्॥ उक्तेभ्योयदन्यन्मैत्रावरुणस्यसोमेकर्मास्ति तदासीनोब्रूयात्। सोमेप्य
तानितिष्ठन्नेवब्रूयादित्यर्थः॥१॥ एकादशप्रयाजाः॥ पशावेकादशप्रयाजाइतिनियम्यतेसर्वत्रसर्वेषां।
तेषांप्रैषाः॥ तेषांप्रयाजानांप्रैषाअपिभवंतितेचैतइत्याह। प्रथमंप्रैषसूक्ते। उक्तंद्वितीये॥ यदुक्तंपञ्चमेव
सिष्ठादीनांनराशंसःइतरेषांतनूनपादिति। तदत्रापिप्रैषेष्वपिस्यादित्येवमर्थंसूत्रं॥ अध्वर्युप्रेषितो
मैत्रावरुणःप्रेष्यतिप्रैषैर्होतारं॥ एवंसतिहोत्राध्वर्योःप्रैषआकांक्षणीयइत्यर्थः॥ होतायजत्याप्री
भिःप्रैषसलिंगाभिः। होतृग्रहणंमैत्रावरुणाधिकारेपिप्रैषसलिंगाभिरित्याप्रीषुपितनूनपान्नराशंसवि
वेकःकर्तव्यइत्यर्थः॥ समिद्धोअग्निरितिशुनकानां जुषस्वनःसमिधमितिवसिष्ठानां समिद्धोअद्य
तिसर्वेषां॥ वसिष्ठशुनकानांमुक्त्वा विधीयमानत्वात्तद्वर्जानांसर्वेषामितिगम्यते। जामदग्न्यमिदंत्वा
प्रीसूक्तंनागस्त्यं। आम्नायक्रमानुगुण्याद्वासिष्ठविध्युत्तरकालिकत्वाच्चास्यविधेः। तत्राप्यादी

नांनाराशंसस्येववासिष्ठीआहर्तव्याप्रैषसलिंगाभिरित्युक्तत्वात्। एवंप्राजापत्येपिपञ्चानांवसिष्ठादीनां
नाराशंसस्येव। यथऋषिवा। योयस्यऋषिस्तदानुगुण्यंयथऋषित्वाच्छौनोच्यते। तथाचाप्रीसूक्तंगृही
तव्यं। स्वीयऋषिनामधेयस्यानुगुण्यात्आप्र्यःकर्तव्याइत्यर्थः। तत्रभगवताशौनकेनयथऋषिप्रसेधा
प्रीविवेकार्थमेवश्लोकउक्तः। कण्वांगिरोगस्त्यशुनकाविश्वामित्रोत्रिरेवच। वसिष्ठःकश्यपोवा
ध्र्यश्वोजमदग्निरथोत्तमः। तत्रदशानांमुक्तानांप्रथमंकण्वानांसुसमिद्धोनआवहेति। द्वितीयं
तद्वर्जानांमंगिरसांसमिद्धोअग्नआवहेतितृतीयमगस्त्यानांसमिद्धोअद्यराजसीति। शुनका
नांचतुर्थंसमिद्धोअग्निर्निहितःपृथिव्यामिति। विश्वामित्राणांपंचमंसमित्समित्सुमनाइति। अ
त्रीणांषष्ठंसुसमिद्धायशोचिषइति। वसिष्ठानांसप्तमंजुषस्वनःसमिधमग्नेअद्येति। अ
ष्टमंकश्यपानांसमिद्धोविश्वतस्पतिरिति। वाध्र्यश्वानांनवमंइमंमेअग्नेसमिधमिति। शुनकवा
ध्र्यश्ववर्जितानांभृगूणांदशमंसमिद्धोअद्यमनुषोदुरोणइति। यथऋषिपक्षेविवेकोयं॥ प्राजापत्ये
तुजामदग्न्यःसर्वेषां। पुनश्चेन्नात्रवसिष्ठशुनकसहितानामितिविशेषोलभ्यते॥ दशसूक्तेषुप्रेषितोमे

त्रावरुणोग्निर्होतानइतित्वं पर्यग्नयेन्वाह॥ कालोपदेशादप्रेषितोपिब्रूयादिति प्रेषितवचनं। मै
त्रावरुणग्रहणमुत्तरार्थं। पर्यग्नयइति परि परितः क्रियमाणमग्निमभिधातुमित्यर्थः। अध्रिगवे
प्रेष्योपप्रेष्य होतारिति वाक्याद्दग्निरसनद्दाजिमिति प्रैषमुक्त्वा तवेदिदं दंडोन दध्यात॥ मैत्रावरुणग्र
हणं द्वितीयेपि संप्रैषे मैत्रावरुणएव ब्रूयादित्येवमर्थं। प्रैषपाठस्तु होतृलिंगेन [illegible] तत्वात। सर्वस्य हि
तु पाठः परिसंख्यानयार्थेषवचनं प्रैषमित्येकवचनं विवक्षार्थं। न हि [illegible] वक्षयाप्रैषैक्यसिद्धि
द्वारेणानवानमस्य साधितं भवति। इदानीं दंडनिधानवचनात्प्रागेवं निधातव्य इति गम्यते॥ अध्रि
गुं होतोहनं गानिदैवत्तं पशुमितिय थार्थं। अध्रिगुरिति दैव्याः शमितार आरभध्वमित्यस्य मंत्रस्य नाम॥
मैत्रावरुणाधिकाराद्धोतृग्रहणं ऊहं नित्याभिधेयवचोनवचनानि संनमयं नियतार्थः। अंगानीति व
चनं मध्रिगोरंगादीनां ग्राह्यएवोह्यं तेनान्येषामपि मातापितृभ्रातृ आदय इति ज्ञापनार्थं। यथार्थमि
ति यो यस्य ग्राह्यस्यार्थस्तं तथोहं ब्रूयादित्यर्थः। ऊहं नित्यानेनैवास्मिन्नर्थे सिद्धे यथार्थमिति राम
स्म१ वचनं संव्यवहारार्थेयं प्रहं संज्ञेति ज्ञापनार्थं। पुंवन्मिथुने॥ मिथुनमिति स्त्रीपुंसयोः समाहार ८२

मेधपत्यैइत्यादिहि बंनमपिभवति

उच्यते। अस्मिन्समाहारे पुल्लिंगेनैवोहः कर्तव्य इति नियम्यते। मेधपतौ॥ अयं शब्दो देवतावाचीत
स्य स्त्रीप्रत्ययांतस्यायं निर्देशः कृतः। तेनायमपि पदार्थो देवतावाचिनः स्त्रीप्रत्ययसंबंधादस्मि न२
न्सूत्रे लभ्यते। स्त्रीदेवतेति स्वस्त्रीदेवतेति पदार्थोस्मिन्सूत्रे पुंवद्भावस्य विधीयमानत्वात। स्त्रीदे
वतायामभिधेयायामित्यर्थः कल्प्यते। मेधपतिशब्दः प्रातिपदिकं च पुंवद्भावनस्य विषयत्वेनैवैतसंपदा
याविच्छेदादवगम्यते। अतएवं सूत्रार्थः। स्त्रीदेवतायां मेधपतिशब्दं पुंवद्ब्रूयादिति। एवं व्याख्याय
मानेस्मद्ब्राह्मणमनुसृतं भवति। अथोखल्वाहुः यस्यै वा वकस्यैचेत्येवादि। मेधायां विकल्पः॥ मे
धशब्दात्सत्ववाचिनः परः स्त्रीप्रत्ययः पुंवत्स्त्रीपशाविति निगमयति। तेन स्त्रीपशौ मेधशब्दं पुंवद्वास्त्री
वद्वा ब्रूयादिति विकल्पोत्र विधीयते। यथार्थमध्रिगोरन्यत्मिथुनेभ्यः। अध्रिगोरूर्ध्वं यथार्थमूहो भ
वति। मिथुनेषु सर्वत्राध्रिगुवदेव। एतदुक्तं भवति। अध्रिगोरूर्ध्वं मंगादि शब्दा अन्ये चार्थवशेनोह्याः। तेननि
यमेनांगादिशब्दाएवेति। मिथुने तु सर्वत्र पुंवदेवाभिधेयमिति॥ सर्वेषु यजुर्निगदेषु॥ न केवलमेषं विधिः
पशावेव। कथं तर्हि सर्वेषु यजुःषु निगदेषु। चार्थवशेनोहः कार्यः। यजूंष्येवोच्चैः प्रयोगान्निगदाउ

श्रौ०सू०
८२

च्यंते॥ प्रकृतौ समर्थनिगमेषु॥ प्रकृतावितियस्मिन्कर्मणि अर्थाभिधानार्थो मंत्रास्तत्संपद्यते तस्य मंत्र
स्य तत्कर्म प्रकृतिः। समर्थो नाम यथार्थाभिधायी शब्दः। निगमा नाम मंत्राः। उत्पत्तिस्थाने ये मंत्रा यथा
र्थाभिधायिशब्दवंतः। तेषु विकृतावूहो भवति। ये तु पुनः प्राकृतावेवायथार्थाभिधायिशब्दवंतः तेषु
विकृतावपि न भवत्यूह इति। प्रकृतावेव समर्थनिगमसंभवानुज्ञानान्न प्रकृतावूहो विधत्त इति गम्य
ते। उपपन्नमेतेद। तदर्थाभिधानार्थमेव तस्य मंत्रस्य प्रत्यक्षाम्नानात्तत्र लक्षणया गौण्या वाभिधा
नं कल्पनीयं। तस्याः कल्पनाया विकृतावप्यविशेषात्तेषां विकृतावप्यनूह एवेति युक्तमुक्तं। प्रकृतौ
समर्थनिगमेष्विति॥ प्राकृतास्त्वेवं मंत्राणां शब्दाः॥ ऊहे क्रियमाणे मंत्राणां प्राकृता एवं भवेयुः। एतदु शब्दा ७
क्तं भवति। यदि प्रकृतौ छांदसं प्रातिपदिकं स्यात्तदा तस्मादेव विभक्त्यूहः कर्तव्यो न प्रातिपदिकं सं
स्कृतमिति। शब्देन न्यायविद्धोऽयमर्थ इति दर्शयति। ऊहस्यात्समदायत्तप्रयोगत्वात् नाधिक
त्वमेवेति न्यायविरुद्धमपि। असमर्थेष्वनूहवचनं छांदस्योऽसौ प्राकृतस्यैव शब्दस्य ग्रहणमिति प्र राम
योक्तव्यमेवेति रवं शैशवं प्रयुक्तवाक्यमेवाचार्यः॥ प्रतिनिधिष्वपि॥ प्राकृता एव शब्दा इति वर्त्तते॥ ८२

ऊहेउदीचीनानित्याद्यपिभवति४

नामिरूपमामदोऽदविरित्यनूह्यानि॥ यथा कथंचित्साम्नानां प्रतिषेधोऽयं। उपमेरूपमार्थाः। श्येनादयः
शब्दाग्रहणे॥ अदित्याः पाशितारम् अन्नमत्तु आरभध्वमुत मनुष्याः उपनयत मेध्या दुर आशासाना मे
धपतिभ्यां मेधं। प्रास्मा अग्निं भरत स्तृणीत बर्हिः। अन्वेनं माता मन्यतामनु पिता नु भ्राता सगर्भ्योऽनु स
खा सयूथ्यः। उदीचीनां अस्य पदो निधत्तात् सूर्यं चक्षुर्गमयतात् वातं प्राणमन्ववसृजतात् अंतरिक्षमसुं
दिशः श्रोत्रं पृथिवीं शरीरं। एकधास्य त्वचमाछ्यतात् पुरा नाभ्या अपि शसो वपामुत्खिदतात् अंतरेवोष्मा अ
णं वारयध्वात्। श्येनमस्य वक्षः कृणुतात् प्रशसा बाहू शला दोषणी कश्यपेवांसाच्छिद्रे श्रोणी कवषो
रू स्रेकपर्णाष्ठीवंता षड्विंशतिरस्य वंक्रयस्ता अनुष्ठ्योच्यावयतात् गात्रं गात्रमस्यानूनं कृणुता
त्। ऊवध्यगोहं पार्थिवं खनतात्। अस्नारक्षः संसृजतात्। वनिष्ठुमस्य मा राविष्टोरूकं मन्यमाना
भूतावहं शेषमुपासीयातां। उपासीत पत्न्या सहैवं कुर्वन्नग्नीनां समीप आसीतेत्यर्थः। द्वयोर्दुग्धे
नवासेग्निहोत्रं जुहुयात्। वासो रात्रेः पूर्वश्चतुर्थो भागः द्वयोर्गवोर्दुग्धेन पयसा सायमग्निहोत्रं स्व
काले जुहुयादित्यर्थः। अधिश्रितेन्याम्मिं द्वितीयमवनयेत्। अयमत्र विशेषः। एकस्या गोर्दुग्धं पयो
धिश्रित्य तस्मिन्नेवोपरि सिद्धे द्वितीयं गोर्दुग्धमवनयेत्। तेन पयसा होमः। ततोग्न्योरपवर्गः। प्रातरिष्टिः॥
ततः श्वोभूते पूर्वाह्णे इष्टिः कार्या। इयमपि प्रातःकालातिपत्तिनिमित्तैव। प्रातरिति कालविधानात्
प्रयोगभेदः। ततो विहरणं होमोपरागन्योरपि भवति। अग्निर्व्रतभृत्। व्रतभृद्गुणोग्निर्देवता। त्वमग्ने
व्रतभृच्छुचिरग्ने देवाँ इहावह। उप यज्ञं हविश्च नः। व्रतानि बिभ्रद्व्रतपा अदब्धो यजा नो देवाँ अ
जरः सुवीरः। दधद्रत्नानि सुमृळीको अग्ने गोपाय नो जीवसे जातवेद इति॥ एतत्प्रायश्चित्तं स्व
काल एव प्रणीतेष्वग्निषु होमकालातिपत्तौ भवति। अप्रणीतेषूक्तकालातिपत्तावस्तंतायदि
अनुद्धृतप्रायश्चित्तं कृत्वा होमं कुर्यात्। अनापदि मनस्वतीहोमेनानुद्धृतप्रायश्चित्तेन च सहितो राम
होमः कार्यः। विहृतेष्वेवाग्निष्वनुद्धृतेषु होमान्तरकाले प्राप्तावुपक्रान्तमेव होमं कालातिपत्तिप्रा १०४

यश्चित्तसहितं कृत्वा वर्त्तमानकालीनमनुद्धृतप्रायश्चित्तसहितं कुर्यात्। अविहृतेषु कालान्तरप्रा
प्तौ मनस्वतीहोमं कृत्वातिपन्नस्य प्रातिहोमं च कृत्वा अनुद्धृतप्रायश्चित्तादि पूर्ववत्। एवमनेककाला
तिपत्तावपि द्रष्टव्यं। विहृतेष्वविहृतेषु वानेककालातिपत्तौ मनस्वतीहोमं चावश्यं कुर्यात्। विहृते अग्निहोम
षु तेष्वेवाग्निषु अविहृतेषु तु मनस्वत्यादि कृत्वा प्राप्तकालस्य विहरणादि क्रियते। एवमत्रवि
चार्य यद्युक्तं तत्कर्त्तव्यं। विचारस्यास्य दिङ्मात्रमत्रालिखितमिति मन्तव्यं। एवैवात्यश्रुपाते। आर्त्या
श्रुपाते दुःखेनाश्रुपाते। न धूमादिनेत्यर्थः। एतद्दर्शपूर्णमासयोस्तत्सब्रूति ध्रुवं भवति। ब्राह्मणो
उपवसथेश्रु कुर्वीतेति दर्शनात्। यद्याहवनीयं प्रणीतमभ्यस्तमियाद्बहुविद्ब्राह्मणोग्निं प्रण म
येदनैर्हिरण्यमग्रतो ह्रियमाणे। अग्निहोत्रार्थं विधिनानुद्धृतमाहवनीयं यद्यस्तमियात्तदा तदानी
मेवानेतुं शाक्येषु ब्राह्मणेषु यो बहुवेत्ति तमानीय तेनोद्धरणादि निधानान्तं आहवनीयस्य कारये
त्। अग्नेः प्रणीयमानस्याग्रतो हिरण्यं दन्तैरेवनयेत्। ब्राह्मणग्रहणं बहुविद्यत्वेपि जात्यन्तरनि
वृत्त्यर्थं। अभ्युदितेचानुगृहीतमार्यं रजतं वा हिरण्यवदग्रतो हरेयुः॥ अनुद्धृतमभ्युदिते सति व

ऊविदग्निं प्रणयेत्। तस्याग्रतश्चतुर्गृहीतमाज्यं नेतव्यं। रजतं च। यदि हिरण्यवद्वचनेन रजतस्याग्र
तोहरणं प्राप्येत तदा दक्षिणैर्हिरण्यमपि प्राप्नुयात्। आज्यस्याग्रतोहरणं तु न प्राप्नुयात्। अतो दक्षिण
त्यर्थमाज्यस्य प्रापणार्थं चाग्रे तदृतिवचनं। एवं च हिरण्यवद्वचनं पूर्वोक्तस्य जुहुवि ब्राह्मणाग्रतुहृ
रणस्य प्रापणार्थं। अथ तदाज्यं जुहुयात् पुरस्तात्प्रत्यङ्मुखस्तत्र पवित्रयाः प्राञ्चः कृत्वा स्रुषः तां स्वाहेति॥
हिरण्यरजतयोरग्रतोहरणमेव कार्यं। आज्यस्य कार्यान्तरमुच्यते। निदितेऽग्नावाहवनीयस्य पुरस्तात्प्र
त्यङ्मुखस्तत्र पवित्रयाः प्राञ्चः कृत्वा नेति तदाज्यं जुहुयात्। कालात्ययेन शेषः। उभयोः कालयोरनुद्धृतप्रायश्चित्त
शेषः कालात्ययप्रायश्चित्ताभ्यामेवोक्तः। तेनैव तेन कालात्ययप्रायश्चित्तेन अग्निहोत्रमुपसाद्य स्यादि
वारुणीष्ट्यं तं सायंकाले भवति। प्रातःकाले पि तदाद्येवज्ञातं [illegible]ष्ट्यं तं भवति। नाति हाग्निरनुगम्य॥
प्रातःकाले अयं विशेषः। अनुगमयित्वाहवनीयमित्येतं न भवति। तेनाग्निहोत्रार्थे वाग्निभुक्ता
यं होमांतं भवति। आहवनीयेऽध्रियमाणे गार्हपत्योऽनुगच्छेत्तेभ्य एनमवक्षामेभ्यो मंथेयुर
नुगमयेदितरं॥ विद्यमान आहवनीये गार्हपत्योऽयमनुगच्छेत्तदा स्वेभ्यो वक्षामेभ्य एनं गार्हपत्यं

मंथेयुः। ततद्वितरमनुगमयेत् आहवनीयं इत्यर्थः। गार्हपत्यग्राहाद्देव गार्हपत्ये येसिद्धे तत्प्रत्ययार्थ
मेनमिति वचनं सर्वविस्तरस्य गार्हपत्यस्यानुगमने मंथनेनैवोत्पत्तिः। एवंरूपाव सेतिज्ञापनार्थं। तु
ग्राह्यादप्ययमर्थो द्योत्यते। गार्हपत्यमनुगतं मंथनेनैवोत्पादयेत्॥ ध्रियमाण आहवनीये यो वि
शेषः। तं वानुगमयेदिति। अवक्षामाणि मंथनसमर्थानि काष्ठानि॥ सामाभावे भस्मनारण्यामिसंस्ट
य मंथयेदितो जज्ञे प्रथमभेभ्यो योनिभ्यो अधिजातवेदाः। सगायत्र्या त्रिष्टुभा जगत्यानुष्टुभा
च देवेभ्यो हव्यं वहतु नः प्रजानन्निति॥ मंथनसमर्थक्षामाभावे भस्मनारणीसंसृज्य लक्षयित्वा ततो मंथये
त्। इतो जज्ञ इति मंत्रेण मंथयेदिति णिच्प्रयोगात्प्रकृते कर्मणि यः कर्ता स एव मंत्रं ब्रूयात्। ये केचन
समर्था मंथयेयुरित्येवमवगम्यते। अरणीमंथन एवायं मंत्रो न अवक्षामेमंथने। य इत्थमयोरभिप्रेतं स्यात्
वत्रैवमंत्रं ब्रूयात्। अनुगमयेदितरं वत्। तथा च न कृतं। तेन पूर्वस्मिन् मंथने मंत्रो नास्तीति सिद्धं। अव
 रोहणमंत्रस्तूभयोरपि भवति। अरणीगतावरोहणस्यापि तस्मिन्नेव सूत्रे विधानुमिष्टत्वात्॥ मथि
त्वा प्रणीयाहवनीयमुपतिष्ठेताग्ने सम्राळभि पारोचरम स्वसदृसेद्धम्नायो जेपत्याय। सम्राळ

श्रौ०सू०
१०६

गार्हपत्यमाहृतादन्यत्र

सिञ्चवाळसिसारत्स्वतोलोत्सोऽपि तामंनादं त्वां गार्हपत्यायादध इति। मथित्वेति वचनं इतोऽन्य द्वि
[illegible]स्य प्रणयनमंत्रलत्रीकानित्यर्थः। अत एव केचित् प्रणयंत्याहृत्य दक्षिणं। अत्रैव विषये अयं द्वि
तीयः कल्पः। ध्रियमाणआहवनीये गार्हपत्यानुगमने सति अत एवाहवनीयादाहवनीयं प्रणयं
त्येके। तथा सति दक्षिणाग्निरप्यनुद्धर्तव्यः। सहतस्मान्नवा गार्हपत्यायतने निधायाथ प्रांचमा
हवनीयमुद्धरेत। इदमपि कल्पांतरं। आहवनीयमुद्धरेदित्येतावतैव सिद्धे प्रांचमिति वचनं आ
हवनीयात्प्रत्यंचं गार्हपत्यं प्रणीयापि विहारसिद्धिरितीदमपि कल्पांतरमिति ज्ञापनार्थं। एते
चत्वारः पक्षा ब्राह्मणे समुद्दिष्टाः तत्र निंदा विध्यंतरस्तुत्यर्था। अतः सर्वेषां कश्चिच्छास्त्रांतरे वि
धानमस्तीति तान्सर्वान्कर्तव्यतया सूचितवानाचार्यः। सहनस्मानमित्यस्मिन्पक्षे दक्षिणेन
विहारं नीत्वा गार्हपत्यायतने निधानं॥ ततइष्टिरग्निस्तपस्वोज्जनद्वान्पावकवान्। एकात्र देवता।
सचाग्निस्त्रिभिर्गुणैर्युक्तः। आयाहि तपसा जनेष्वग्ने पावको अर्चिषा। उपेमां सुष्टुतिं मम। आनो राम
याहि तपसा जनेष्वग्ने पावक दीद्यत्। हव्या देवेषु नो दधदिति। प्रणीतेनुगते प्राग्घोमादिष्टिः अ १०६

ग्निहोत्रार्थं प्रणीतआहवनीयानुगते प्रायश्चित्तत्वेनेयमिष्टिः कर्तव्या। प्रावृक्षं कुर्यात् ... प्रक्षेपादेषैवेष्टिः।
प्रायश्चित्तिर्भवति। उत्पत्तिस्तु ब्राह्मणोक्ता भवति। तदाहुर्यस्याग्निमनुद्धृतमादित्योभ्युदियाद्वाभ्य
स्तमियादित्यादि हिरण्यं पुरस्कृत्य सायमुद्धरेदुजतमंतर्धाय प्रातरुद्धरेदित्यत्रोक्तो। इयमेवोत्पत्ति
रस्मिन्नवसरे प्रणीतो वा प्राग्घोमादुपशाम्येदितिवचनात्। अग्नावनुगतेतेराहुती इतिवक्ष्यति।
उत्तराहुत्यां हुतायां मन्युत्पत्तेः प्रयोजनं नास्ति एवमग्निहोत्रेनिर्वाह इत्यस्मत्सूत्रानुसारेण मन्याम ना
हे। अग्निर्ज्योतिष्मान्वरुणः॥ हे देवते। ज्योतिष्मानित्यग्नेर्गुणः। उदग्ने शुचयस्तवाग्नेत्वं ह्यस्मा
मूर्धा अस्त्वादि इति। सर्वांश्चेदनुगतानादित्योभ्युदियाद्वाभ्यस्तमियाद्वाग्न्याधेयं पुनराधेयं वा॥
यदि सर्वेष्वग्निष्वनुगतेषु आदित्योस्तमुदयं वा गच्छेत्तदाग्न्याधेयं पुनराधेयं वा प्रायश्चित्तं भवेत्। अ
नयोरेव कालयोः शास्त्रांतरे गार्हपत्याहवनीययोः द्वयोरेवानुगतावेतत्प्रायश्चित्तमुक्तं। तस्मिंश्छा
स्त्रे दक्षिणाग्निर्भिन्नयोनिः। अत एव विनिवेशाः एकयोनित्वे सर्वानुगमने भवति भिन्नयोनित्वे द्व
योरेवानुगमनं इति। अत्राग्न्याधेयपुनराधेयाभ्यां नेष्टिके तंत्रे स्यातां। अत्रानुसादकत्वसामान्यात्तेः ए

श्रौ॰सू॰
१०७ तदर्थमेवाधानाद्वादशरात्रमित्यत्र सेष्टिकेग्न्याधाने आधानशब्दप्रयोगः संव्यवहारार्थं कृतः।
तस्मिन्काले सर्वदा सर्व एवाग्नयो विहृता एव प्रायेणासते। तत्र केवलगार्हपत्यानुगमने मंथने
नोत्पाद्य तपस्वती कार्येत्युक्तं। दक्षिणाग्न्यनुगमनेपि तद्योनितो विहृत्य सैवेष्टिः कार्या। आहवनी
यमनुगमनेपि प्रायश्चित्तविशेष उक्तः। द्वयोर्द्वयोरनुगमने तान्येव यथालिंगं कर्त्तव्यानि। अतः
सर्वानुगमनमिदमवशिष्यते। अतः सर्वशालाविवक्षायामपि नैमित्तिकस्य स्वनादपर्यालोचनया
सर्वानुगतावेवैतद्भवतीति मंतव्यं। एकयोनित्वे भिन्नयोनित्वे को विनिवेशः। उभयोरनुगमने
पि विधीयमानस्याग्न्याधेयस्य सर्वोत्पादकत्वेनावाप्त्या गात्तद्विधानसामर्थ्यादेवानष्टोपि दक्षि
णाग्निर्नष्ट इति गम्यते। विहृते ह्येवं भवति। अविहृतेष्वपि किं गार्हपत्यानुगमने सर्वानुगमोस्ति न
वा। अस्तीति ब्रूयात्। तत्र हि सर्वेग्नयः समवेता इति गम्यते। ततो विहरणदर्शनात्। कथं तत्र सम
वायः। अंगारसमवायस्तावन्नास्ति। कर्मार्थं पृथक्कृतानां कर्मसमाप्तौ तत्रैवानुगमनदर्शनात्। अत्रा राम
यमभिप्रायः। अंगारात्रयो यो दक्षिणाग्न्याहवनीयाख्यः शास्त्रगम्यः स कर्मसमाप्तौ गार्हपत्यांगा १०७

रानुप्रविशति। अन्यथा तत्तदुद्धरणविधानं नोपपद्यते। तत्संसर्गेस्ति सर्गदोषश्च नास्ति। अंगारसं
सर्गो हि सः। तथा च शास्त्रांतरे वचनं। यदि पूर्वेनुगतः संचर्य पश्चाद्धिसतर्हि गत इति। एवमपि
न युज्यते। अविहृतावस्थायां गार्हपत्ये गार्हपत्यं प्रज्वल्येति मंत्रप्रयोगात्। तथा च शास्त्रांतरे मंत्र
कारप्रयोगो मंत्रवर्णप्रयोगो दृश्यते॥ गार्हपत्यमभिमंत्रयते स गार्हपत्य इति। तेनावगम्यते तत्रानु
प्रवेशोग्न्यंतरस्य नास्तीति। यत्तु नः पश्चाद्धिसतर्हिगत इति। तदप्यन्यपरं। यदि हि सर्वदानुग
तस्याहवनीयस्य गार्हपत्यात्प्रणयनेनैवोत्पत्तिः स्यात्तदैव तल्लिंगमनुप्रवेशस्य। तत्र हि
शास्त्रे मंथनादप्युत्पत्तिरुक्ता। अतोस्यायमर्थः। यस्मिन्ननुगमने गार्हपत्यात्प्रणयनेनोत्प
त्तिरुक्ता तदानुगतं तदायं संचरणमविरुद्धं मंथनोत्पाद्येनुगतेप्यंतरा न संचरितव्यमिति। अ
तोन्यपरत्वादेवास्य वाक्यस्यानुप्रवेशो लिंगं न भवितुमर्हति। अतस्तत्र समवायः प्रत्यक्षेण
शास्त्रेणावाल्लक्षयितुं न शक्यते। कथं तर्हि तत्तदुद्धृत आहवनीयादिर्भवति। वचनगम्यो हि सः। दा १
वचनमेवं भवति गार्हपत्यं प्रज्वल्य ततो दक्षिणाग्निमुद्धृत्य गार्हपत्यादाहवनीयं ज्वलंतमुद्धरेदिति।

तेनाधिकृतेन पुरुषेण तं नियुक्तेनवाग्निहोत्राद्यर्थं स्वकाले यथोक्तेन विधिनाय उद्ध्रियते स एवाहव
नीयादिर्भवति। नान्यथा। अन्यथा चेदुद्ध्रियते तदा समोप्यतमग्निं विक्षेपप्रायश्चित्तं कर्त्तव्यं नान्य
त्। अस्पृदितेष्टो तु नाम्न नामधेयो द्धृतोप्याहवनीयादिर्भवति। एवं तर्हि कर्मान्तराळ कालेक्वासौ ति
ष्ठति। वयमपि न जानीमः। क्वासौ तिष्ठतीति। एतावदत्रावगंतुं शक्यते। सर्वकर्मार्थमग्नयआहि
ताः तत्र गार्हपत्यो यावज्जीवं धार्यते वचनात्। इतरौ तु कर्मणि कर्मण्युद्ध्रियेते। गतःश्रियः सर्वेधा
र्यंते वचनान्यदतोवगंतुं शक्यते। एवं सति कर्मान्तरे वर्त्तिष्यति। यथा याग्यादिजनितान्यपूर्वाणि
यावत्फलभोगसंबंधं तिष्ठंति। तथाहवनीयादिरपि तिष्ठतीति। अतो नुद्धृतेषु गार्हपत्यानुग
मने सर्वानुगमनं नास्तीति तत्राग्न्याधेयं वा न कर्त्तव्यमिति सिद्धं। समारूढेष्वारणीनाशे॥ षु
अग्निष्वरण्योः समारूढेषु सत्सु अरण्योर्नाशे ग्न्याधेयं वा कर्त्तव्यं। अन्यतरारणीनाशेपि भव राम
त्येतत्प्रायश्चित्तं तयोरेकैकस्याएव कार्यविशेषे नियमाज्ज्ञायापतिसंस्कृतत्वाच्च। नचरणीना १०८
शइति शाछ्य एकस्यामप्यनष्टायां न प्रवर्त्ततइति। सत्यमसौ शाछ्येन प्रवर्त्तते तथापि मंथनपक्षेनि
हें
पुनराधेयं

क यासंपादितुं शक्यइति। अनष्टापि नष्टैवेति कलोक्तं। यदि परमनष्टामेव द्विधाकृत्वा मंथनसिद्धिरि
ति। तथापि नैवं कर्त्तुं शक्यते। उपादानकालेअरणी आहरेदिति द्वयोरुपादानमदृष्टार्थं स्यादिति
युक्तं कार्यनिर्देशनादिति। एवं सति तद्वशी। पुरूरवः संस्कृतिरधोत्तरयोररण्योः श्रूयमाणास्वोपप दे
नाभवतीति युक्तं॥१२॥ अथाग्नेय्यइष्टयः। अथानंतरं या वक्ष्यंते ता अग्निदेवत्याइष्टयइति वेदितव्या
मित्यस्य सूत्रस्यार्थः। न्यच चतुर्थ्यं तानि पदानि तान्यग्नेर्गुणवचकानीत्यर्थः। एतेनावगम्यते सर्वत्र
चोदितेव देवताचोदनायां सत्यां असत्यां तु चोदनायां याज्यानुवाक्यालिंगादवगंतव्या। देवतागु
णस्तुचोदनातएवावगंतव्यौ कथं तर्हि वैश्वानरपार्जन्यौ वैश्वानरशब्दोग्नेर्गुणः। तयोरेव याज्या यां
नुवाक्ययोरत्र प्रवेशात्। अत्र हि वैश्वानरशब्दस्याग्निगुणत्वं चोदितमेवेति। व्रतातिपत्तौ व्रतप
तये। यस्मिन्कर्मणि यानि चोद्यते व्रतशब्देन धर्मशब्देन वा तत्र तेषामतिपत्तौ एषेष्टिः कार्या॥ साग्ना
वग्निप्रणयनेग्निवते॥ निवृत्तकर्मणा अनिवृत्तकर्मणा वाग्निनासादिते आहवनीयायतनेयद्यन्यो
ग्निराहवनीयार्थमुद्ध्रियते तमग्निं निधायैव स्मरति वेदायतनस्थमुद्धृत्य इदानीमुद्धृतो निधा
मे

दध्यात्। तथा सती ष्टिर्न भवति। एतस्मिन्नपि पक्षे यद्यनपवृत्तकर्मोद्देशेन तदा व्याहृतिहोमः क
र्त्तव्यः। अपवृत्तकर्माचेन्न किंचिदपि प्रायश्चित्तं विद्यते। यद्यस्मिन्नेव तस्मिन्नप्रणीते निदध्यात्तदा
इयमिष्टिः कार्या। क्षामवत्यागारदाहे। अन्वयं सीसमग्निभिन्नान्येन। अन्य इतिशब्दाग्निरुच्यते। मिथः शुद्धि
विषये। गार्हपत्यादयः सर्वे द्वौ द्वौ वा परस्परं यदि संसृज्येरन् तदा विविचय इष्टिः कार्या। गार्हपत्याहवनी
ययोरिति तयोरेवस्यामयमपवादः। आग्नेयोग्नेर्वसंवर्गाय। ग्राम्यः पचनाग्निः। वैद्युतेनाग्नुमते। वैश्वानरायेति
मतानां मंनं भोजने। विमतवाविमनस्काः शत्रवइत्यर्थः। द्विषदन्नं यद्यादितताग्निर्भुंजीत तदा वैश्वानरायेष्टिः का
र्या। एषे च कपाले नष्टेनुद्वासिते। केषांचिद्धर्माणां पुरोडाशाः अर्पणानंतरमेव कपालोद्वासनं विहितं। केषां
चित्कर्मसमाप्तौ। केषांचिदनुद्वासनमेव। तत्र सर्वपक्षयोरनुद्वासिते नष्टे एषेष्टिर्भवति। अनुद्वासन
पक्षेपि प्रयोगमध्ये भवति। प्रयोगसमाप्तौ न भवति विध्यपराधाभावात्। अन्याआवितेवा येषांश्चप
णानंतरमुद्वासनं तेषामुद्वासिते कपाले सत्यार्थ्यवणेन तेष्वेषेष्टिः कर्त्तव्या। सुरभय एवयस्मिन्‌जी राम
वेम्हतत्राहुः। यस्मिन्नाहिताग्नौ जीवत्येवम्हतइतियदि शब्दः संजायेत। तदा इयमिष्टिः कार्या। एवशा १०९

ब्दो गुणनियमार्थः। सुरभय एव न सुरभिमत इति तेनान्यत्र गुणांतरसंबंधोप्यभ्युपगतो भवति।
यथा क्षामाय क्षामवते वेत्येवमादि। त्वमग्ने व्रतपा असि यद्वो वयं प्रमिनाम व्रतानि। अग्निनाग्निना
ग्निः समिध्यते त्वं ह्यग्ने अग्निना ग्नेत्वमस्मद्युयोध्यमीवा अक्रंदद ग्निस्तनयन्निव द्यौर्विर्नि विश्वग्वात
जरतासो अग्नेत्वामग्ने मानुषीरीळते विशो अग्नआयाहि वीतये यो अग्निं देववीतये कृविसुनो गविष्ट
ये मा नो अस्मिन्महाधने अग्ने सधिष्टव यदग्ने दिविजा अस्यग्निर्होतान्यसीद द्वनीयान्साधीम
कृदेववीतिं नो अद्य येति। यस्य नार्यां गौर्वा यमौ जनयेदिष्टिः। मरुतः। मरुतोस्यामिष्टौ देवता। सान्ना
स्रा य्यपुरस्ताच्चंद्रमा अभ्युदितेग्निर्दातेंद्रः प्रदाता विष्णुः शिपिविष्टः। सांनाय्यशब्देनामावास्यं कर्मोच्यते।
तस्मिन्नासन्ने सति चंद्रमा यदि पुरस्तादभ्युदियात् तदा एतामिष्टिं कुर्यात्। अस्यां अमावास्या विका
रत्वात्प्रायश्चित्तेष्टीनां यो धर्मस्तं पांशु संवर्ग [illegible] भागता चन भवति। एकदेशविकृतमनन्य
व वद्भवतीति वचनात्तावितादयो मावास्याधर्मा एव भवंति। एतदुक्तं भवति। अकालेमावास्याक
र्मण्यासन्ने सत्यकालोयमिति ज्ञाने तामेवामावास्यां देवताभिर्विकृतां समापयेत्। अत्र काले

प्राप्तेषु नर्यागोस्ति नास्तीति अत्रा धत्वर्त्विग्भिः सह निश्चयः कार्यः। दाताग्नेर्गुणाः प्रदाते ग्रस्यपि
विष्टोविल्लाः। अग्नेदादाउ अषेरयिं सयं तावि प्रष्टपांदी यक्ष्णो अरत्वं कुशान द्वाते दक्षता सुकृतो त
पाणी वषट्टे विक्लवा सआकृणोमि प्रतत्ते अघवि विपिविष्ट नामेति। अपिवा प्रायश्चित्ते नष्ठी नास्ता
ने तस्ये तस्ये देवतायै पूर्णाहुतिं जुहुयादिति विज्ञायते। प्रायश्चित्त प्रकरणे याज्ञिक्य ज्ञप्तिप्राप्ति नैव चो
द्यते। माध्यन्दिन ब्राह्मणोक्तत्वात् सामर्थ्यविकल्पिको विधिरुच्यते। याभ्ता सामिष्टीनां देवता सा सामैकैक
स्यै देवतायै एकैकां पूर्णाहुतिं जुहुयात्। द्वादशगृहीतेन स्रुचं प्रतरशितायजूय ते सा पूर्णाहुतिरुच्यते।
५ स्कन्नु अयं पुनः प्रक्रान्ते दर्शपूर्णमासस्य भवति। दर्विहोममध्ये च। नान्यत्र भवति॥ हविषां स्कन्नमभिमृशे
द्देवांजनमगन्यज्ञस्तस्य माशीरवतु वर्धतां। भूतिर्घृतेन मुंचतु यज्ञो यज्ञपतिमंहसः। भूपतये स्वा
हा। भुवनपतये स्वाहा। भूतानां पतये स्वाहा। यज्ञस्य त्वा प्रमया न्मयानिमयाप्रतिमयाद्भ्रस्यस्कं
देति। देवांजनमित्यादिना स्कन्दे यं [illegible] तेन स्कन्नं दर्विष्वारि घि स्कन्दे तदा तस्या स्कन्नं वाजिमर्शने कृते तत राम ११०
आग्नी ध्रस्तामादाय तत्रैव जुहुयात्। हुतं वन्मेर्पपात्रं दद्यात्। होमं कृतवते आग्नीध्राय तदानी
२ मिमन्त्रोत्। आहुतिर्ब्रह्मि द्वहि स्परिधिभ्यां भीष्म एनां जुहुयात्॥ यदि हूयमाना हुति र्बहि २

मेव येन केन विद्वान्यरसादिना पूर्णपात्रं दद्यात्। देवते अनुवाक्ये याज्ये वाविपरिहृत्या ज्येअवदाने ह
विषी वा। यद्दो देवा अतिपातयानि वाचा च प्रयुती देवहेलनं। अरायो अस्माँ अभिदुच्छुनायते न्य
त्रास्मरुतत्तानि धत्तन स्वाहेत्याज्याहुतिं हुत्वा मुख्यं धनं दद्यात्। देवताविपर्यासे आवाहनादिषु
व्युत्क्रमः अनुवाक्याविपर्यासोन्यदीयामन्यस्यानुब्रूयात् एवं याज्याविपर्यासः। आज्यविपर्यासो
औदेवओपभृतयोरित्यादि अवदानविपर्यासः सर्वाधत्तिर्वमित्यादि हविर्विपर्यासो निर्वपणा
दीयमानास्य दिषु व्युत्क्रमः। यागे वान्यदीये [illegible] यागः एतेषु सर्वेषु यद्दो देवा इत्याहुतिं हुत्वा स्वगृहे यत्प्र
म धानभूतं द्रव्यं तद्धोतृकर्त्रे ब्राह्मणे दद्यात्। यजमानः। हुते सर्व समानकर्तृत्वमविवक्षितं। याज्यानुवा
क्ययोः कृतस्मिन्कर्मण्यपि विदितत्वे योस्तद्देवतयोरन्यदेवतयोर्वा विपर्यासे सति यागान्यागे
वश्रेषज्ञाने सति प्रायश्चित्तं कृत्वा पुनर्विदिते वानूच्य यष्टव्यं। कृते तु यागे अनुवाक्याविपर्यासज्ञाने ए
प्रायश्चित्तमेव न पुनर्यागाभ्यासः। याज्यायामप्यविदितायां तद्देवतायां विदितदेवतादेशे कृत्वा वि
हितामेव देवतां ध्यायन्यदि वषट्कुर्यात्तदापि नाभ्यासः। अनेन्य [illegible] देवतायामपि आ

देवताध्याने विहितविषयेऽस्याभावेत्तदापि नाभ्यासः। अतोन्यथात्वे यागावृत्तिः कार्या। यागविषये
पि द्रव्यविपर्यासे यागावृत्तिशंकानैवकर्त्तव्या। कृतत्वाद्यागस्य। एतद्विलक्षणं यागस्य देवतो वै
यद्देवतान्तरेण तत्राभावे। देशेन स्वद्रव्ययागो याग इति। देवतातावद्विहितैवास्मिन्कर्मणि
द्रव्यमपि स्वमेव। अयमाय मभिप्रायः। अन्यस्यै संकल्पितत्वात् स्वत्वमपगच्छतीति। एवं चेत्तस्या
अपि देवतायै यष्टुं नशक्यते स्वत्वाभावात्। अथ संकल्पनकाल एव यागः क्रियत इति। सुतरां
विपर्यासे यागो नावर्त्तयितव्यः। यागस्यावैगुण्यात्। तस्माद्यथासंकल्पकरणमेवात्रापराधे
नयार्थसिद्धिरिति। यदि पुनराग्नेयेनाग्नीषोमीययागे कृते भ्रेषो ज्ञायेत तदाग्नीषोमीयेणाग्नेय
यागः कर्त्तव्यः। संनिहितत्वात्तस्य द्रव्यस्य कार्यस्याभावात् तस्मिन्संनिहिते सति स्वद्रव्ये द्रव्यां
तरोपादानमशक्यमिति तस्मादेवं कृत्वा प्रायश्चित्तमेव कुर्यात्। अत्र व्याहृतिहोमश्च कार्यः। ए
तद्विपर्यासं तरितव्यं तत्रैवोक्तं॥ स्थानिनी मनावाहा देवतामुपोत्थायावाहयेत्। यदि कस्मिंश्चि
त्कर्मणि यष्टव्यां देवतामनावाह्यैवोत्तरं कर्म कुर्यात्तदा यावति गते स्मरति तदैवोत्थायावाहयेत्।

वर्त्तमानावधिस्वरेण न मंद्रेण। यदि मंद्रेणैवस्यादुपोत्थानं न विदध्यात्। तस्याप्याहवनीयधर्म
त्वात्तस्मादुपोत्थानविधानान्मंद्रत्वनियमः। अवधिस्वर एवेति सिद्धं। मन सत्येके। आज्येनास्था
निनीं यजेत। यद्यस्थानिनी प्रमादादावाहयेत्। तदा तस्मिन्नेव कर्मेतां यजेत। निगमेषु च निगमयेत्।
यजेदिति वचनं यद्देवत्यो यागस्तन्नाम्नाहुतिहोम इत्येवमर्थं॥ १२॥ हविषि दुःशृते चतुः शरावं
यजेदिति वचनं यद्देवत्यो याग एवाम्नानाहुतिहोम इत्येवमर्थं॥ १२॥ हविषि दुःशृते चतुःशराव
मोदनं ब्राह्मणान्भोजयेत्॥ यदा हविरपक्वं भवति तदा तेनैव हविषा तत्कर्म समाप्य चतुःशरावपरिमि
तव्रीहिभिरोदनं पक्त्वा चतुरो ब्राह्मणान्भोजयेत्। सामेष्टिष्टेनेष्ट्वा पुनर्यजेत। एकदेशक्षामस्या
शक्यपरिहारत्वात्प्रायश्चित्तं न भवति। यदा पुनरदग्धं किंचिदस्त्यवदाने भ्योन पर्याप्तं च तदेतस्या
यश्चित्तं भवति॥ अशेषे पुनरावृत्तिः॥ हविष्यशेषे दग्धे पुनरावृत्तिः कार्या। पुनर्यागपुनरावृत्त्यो
र्यं विशेषः। वर्त्तमानप्रयोगं समाप्य पुनरप्यादित एवारभ्यां तां क्रिया पुनर्यागः। पुनरावृत्ति
स्तु वर्त्तमान एव प्रयोगे नष्टस्य हविषः पुनरुत्पादनमिति। पुनरावृत्तौ तु पुनरुत्पादितेन हविषा
स एव प्रयोगः समापयितव्यः। अयमनयोर्विशेषः। प्रागावाहनाद्दोषे पुनरावृत्तिप्रसंगात्। स्व

चत्रयमारब्धं। आवाहनाद्याम्घविदेषिसति पुनरावृत्तिरेव॥ अप्यर्यं तं गुणकृतानां॥ गुणकृतानाम
प्यंतमपि पुनरावृत्तिरेव। अंत्यं तमित्या कर्मपरिसमाप्तेरित्यर्थः। प्रा[illegible]स्विष्टकृतः प्रधानकृतानी॥
यत्पुनर्हविषांव्यापत्ताविकर्मं तत्प्रधानहविषामेव स्विष्टकृतः प्रागेवेति वा न्यमनेन नियम्यते। ते
नात्राप्यंगानां पुनरावृत्तिरेव। अवदानदोषे पुनरायतनादवदानं॥ प्रसक्तानुप्रसक्तमिदं। मध्यमात्पू
र्वार्धाग्रहीतस्यावदानस्य दोषे सति तस्य हविषो मध्यपूर्वार्धाभावात्स दय्यस इवेति मन्यमानः प्रधा
नहविष्यैदाज्येनेष्टिमित्यादि कर्तव्यं। अंगहविष्ये पुनरावृत्तिरेव। मध्यपूर्वार्धयोरेव साधनत्वेनोप
संहानादितियो व्यवतिष्ठते। तस्योत्तरमिदं सूत्रं। अवदानदोषे पुनरप्यवदानाभावात्तानान्मध्यात्पूर्वा
र्धादेवावदातव्यं आपेक्षिकत्वात्तयोः वावृयोरिति। चतुर्मुष्ट्यादिभिर्व्रीहिभिः संपादितं हविः सर्वं
यागार्थमेव। तत्र ह्यवदानेन यागसिद्धौ सत्यां तादर्थ्यं तत्रोपसंहृतं भवेत्। नान्यथा। यत्कार्यार्थं यदु
पादीयते तस्य तत्कार्यकरणे तत्त्वं ति तादर्थ्यं नापैति। अतस्तादर्थ्यान्निपायात्तेनैव हविषा यष्टव्य
मिति सिद्धं। हविर्भूति हद्दक्षिणां दद्यात्॥ प्रकृतमनुसरतं। क्षामेष्टिशेषेने ष्टे तस्मिन्प्रयोगे या दक्षिणा

साद्वेष्टेदातव्या। नान्यैरित्यर्थः॥ दक्षिणादानेऽवैर[illegible]सांदध्यात्॥ सर्वार्थमिदं सूत्रं। सर्वेषु कर्मसु विहि
तदक्षिणादानेऽवैर[illegible]सांदध्यात्। सस्य सर्वसंपन्नाभूमिरुर्वरेत्युच्यते। कपालं भिन्नमनपत्नतत्कर्म गायत्र्या
लाभ्ना नास्वरयासंदधामीति संधाय पोन्यवहरे पुरा भिन्नो घर्मो जीरदानुर्यतिआर्त्तिदगन्तु न इ
ध्मो वेदिः परिधयश्च सर्वे यज्ञस्यायुरनुसंचरंतु। त्रयस्त्रिं[illegible]शत्तंतवो या न्वितन्वत य इमं यज्ञं स्वधयाददं
ते। तेषां छिन्नं प्रतिदध्मायत्र स्वाहा। यज्ञो अप्येतु देवानिति॥ अनपट्टकर्मवचनात्तु रोडाशश्रपणाद्
र्ध्वं न प्रायश्चित्तमिति गम्यते। एवमवलीढादिभिः क्षितेषु॥ अवलीढानि श्वादिभिरभिक्षितानि तद्
न्नानादिभिः अन्यथा वा अविसंबंधीनि कपालान्यभिन्नानि अप्येवं कुर्यात्। भेदाभावात्सं[illegible]धनमर्थ
लुप्तं। तेनाभिन्न इत्यादिना अपोभ्यवहरेयुः। अत एवान्यानि मृन्मयानि भूमिर्भूमिमगान्माता माता व
रमप्यगात्। भूयास्म पुत्रैः पशुभिर्यो नो द्वेष्टि स भिद्यतामिति॥ कपालेभ्योऽन्यानि मृन्मयानि भिन्नान्य
भिन्नानि च भूमिर्भूमिमिति मंत्रेणाप्सु अपोऽभ्यवहरेत्। न संदध्यादित्यर्थः। यदि पुरोडाशः स्कंदेद्वा
न्यतेवाबर्हिष्येनेनिधायाभिमंत्रयेत किमुस्तासि किमुत्प्रोषाः शांतः शांतोरि हागहि अघोरो

यज्ञियो भूत्वासीद सदनं स्वमासीद सदनं स्वमिति मा हिंसीदं वृषेरितं आज्येन तेजसाज्यस्व
मानः किंचनं नीरिषः। योगक्षेमस्य शान्त्या अस्मिन् आसीद बर्हिषीति ॥ स्फुटेरभिन्द्यादित्यर्थः। उ
स्य ते तत् छिन्देदित्यर्थः। एवोनिधानमंत्र उत्तरो निर्मंत्रणार्थः। आनंतर्य योगात् ॥ अग्निहोत्रीय का
ले ग्ना व जायमाने मन्यमानीयं जुहुयुः। अग्निहोत्र होमार्थं प्रणयनकाले समारूढोग्निर्मथ्यमानो
यदि न जायेत तदान्यं लौकिकमग्निमानीय प्रणीय तत्रैव होमः कार्यः। एतदनुगतेषु भवति। अनुगते
षु मंथनादि तपस्वती ष्यंतं तत्र प्रायश्चित्तं। तत्राग्निसंधानमेव मंथनप्रवृत्तौ निमित्तं। नाग्निहोत्रहो
मः समारूढेषु नैमित्तिकस्याभावात् अग्निहोत्राद्येव मंथनस्य निमित्तं नान्यत्। अतः समारूढ एव
वेति युक्तमुक्तं। तेनानुगतावयो जोमानेपि यावेऽजन्मता वन्मथितव्यमेवेति। ततस्तापुस्वतीष्टिः। त
त्राग्निहोत्र होमो वुहृतप्रायश्चित्तेन सह यदि होमकालोतिपन्नस्तदा मनस्वती होमश्च कार्यः। अ
प्यन्यमिति अन्य ग्रहा लौकिकमग्निमानीय जुहुयुः। अपिशब्दाद्ब्राह्मणपाण्यादिवक्ष्यमाणमपि गम्य राम
ते॥ सर्वालाभ अग्नीत्तरं। अग्न्यादीनां दृष्टिर्यं तानीम्येवं सर्वालाभे उत्तरोत्तरं गृह्णीयुः। सर्वालाभइति अ ११२

लाभवचनात्। अलाभे वचनांतरविधिरयं न प्रतिनिधिनियम इति अध्यवसीयते। तेन द्दष्टार्थ निमं
गानां मध्ये यस्य कार्यं भक्तितं देवकार्यं नान्यत्। ब्राह्मणपाण्यप्सु कर्णदर्भस्तंबाप्सु। काष्ठेषु पृथिव्यां॥
अग्नौ सर्वसंभवात्। तस्य पृथग्योगाभावः। पाण्यादीनां त्रिगुणाइंधनाधिश्रयणादिवर्जिता न्यत्सर्वं संभ न
ब तीति पृथग्भावः। काष्ठानामग्नौ विधानादुदककार्याण्यपि काष्ठेषु न स्युरिति तेषां पृथग्भावः। पाण्यादि
षु पंचसु आहुतिधारणार्थं समिन्द्भवति। इंधनार्थक्तिन भवंति वसमिधः। पृथिव्यां तु धारणार्था
पि समिन्न भवति। काष्ठाभावे तस्याविधानात् एवमन्यदपि विचार्य कर्तव्यं। हुत्वापि मंथनं। होमं
कृत्वानंतरमेव मंथनं भवति। अपि शब्दात् कालांतरेपि भवति मंथनं। अत्र विनिवेशः। यदा प्रया
पाकाले प्रयाणं परिसमाप्तं तदा होमानंतरमेव मंथनं भवति। यदा तु परिसमाप्तं प्रयाणं तदा पु
नरपि होमकाल एव मंथनमिति। वुशाद्धोवधारणार्थः। हुत्वा मंथनमेव भवति। न पुनर्होम इति।
पाणौ वेद्धा सेनवरोधः। यदि पाणौ जुहुयात्तदा ब्राह्मणस्य वासार्थिनो नावरोधः कार्यः। केचिन्मां
सवर्जनं॥ अजमांसवर्जनं भवति। स्तंबेचाधिशयति। अत्र दर्भाणामनधिशयनं। अप्सु वेदविव

कः। अत्राविवेको पाइ माभोजनीयाद् मा अभोजनीयाद् इत्येवंरूपः॥ एतत्सांवत्सरं व्रतं यावज्जीवि-
कं वा॥ पूर्ववद्विकल्पप्रतिभासहेतुर्द्रष्टव्यः। अग्न्यावनुगतेतराङ्नीहिरण्यमुत्तरां जुहुयाद्धिरण्य-
मुत्तरां जुहुयात्॥ आहुत्योरंतराग्न्यावनुगते सति हिरण्यं निधाय तस्मिन्हुतीयामाहुतिं जुहुयात्।
४९व हिरण्ये यथा सोमवंतो शेषकार्याणि कुर्यात्। न पुनरग्निरुद्धर्तव्यः। अभ्यासोध्यायपरिसमाप्त्यर्थः।
॥१४॥ इत्याश्वलायनसूत्रवृत्तौ नारायणीयायां तृतीयोध्यायः॥छ॥ दर्शपूर्णमासाभ्यामिष्ट्वा
पशुचातुर्मास्यैरथ सोमेन॥ उक्ता हविर्यज्ञास्तेषु च प्रायश्चित्तमुक्तं॥ इदानीं सर्वसोमानां प्रकृतिभूतं
ज्योतिष्टोमं वक्तुकामस्तदधिकारविशेषणार्थं केषांचित्कर्मणामनुष्ठानक्रममुक्तवानाचार्यः। इष्टिरा-
ना ग्रयणेष्टिः। पशुर्निरूढः। आधानांतरं दर्शपूर्णमासयोरारंभकः। तदारंभोत्तरकाले इष्टिपशुचा-
तुर्मास्यैरिष्ट्वा सोमेन यष्टव्यं। अथशब्दः सोमेन संबध्यते। स चाधिकारार्थः। सोमप्रमुखं कर्मसो- नाम
म इत्युच्यते। तच्च ज्योतिष्टोमाख्यं। एतदुक्तं भवति। अग्न्याधेयानंतरमनेन क्रमेण दर्शपूर्णमासादिभि- ११४
रिष्ट्वा ज्योतिष्टोमाख्येन सोमेन यष्टव्यं। इत उत्तरमाषष्ठाध्यायपरिसमाप्तेस्तमेवाधिकृत्य सर्व-

मुच्यत इति॥ ऊर्ध्वं दर्शपूर्णमासाभ्यां यथोपपत्त्येके। प्रागपि सोममेके॥ सोमे वक्ष्यमाण इत्यस्मिन्सूत्रे वसं-
तादिकालेभ्यः कालांतरविशिष्टाधानविधिपरो वाक्ये सोमाधानयोरानंतर्यमप्युक्तं भवति। अतस्त-
स्यार्थस्यैव तत्कव्यत्वादिदमन्यदानंतर्यमित्यवगम्यते। तत्राधानं कृत्वाग्निहोत्रहोमं कुर्वतः प्रागेव दर्श-
पूर्णमासयोरारंभात्सोमेन यष्टुं यद्युपपद्यते। तदा तस्मिन्नपि काले यष्टव्यमित्यर्थः। तस्यर्त्विजः॥ ति
वक्ष्यंत इति शेषः। ऋत्विजः कर्तार इत्यर्थः। त एकरूपा इत्याह। चत्वारस्त्रिपुरुषाः॥ त्रयः पुरुषा येषां
ते त्रिपुरुषाः। ते च ऋत्विक्षु वक्ष्यमाणेषु चत्वारः पुरुषवंतः। तेभ्यश्चतुर्भ्योन्ये तेषां चतुर्णामिव पु-
रुषा इति वेदितव्याः। अनेन प्रकारेण चतुर्णां मुख्यत्वं इतरेषाममुख्यत्वमित्युक्तं भवति। एते मु- ग
ख्यास्तेतेषां पुरुषा इत्याह। तस्य तस्योत्तरे त्रयः॥ अस्मिन्नृत्विजामनुक्रमणे यस्य यस्योत्तरे त्रय-
स्त्रयस्ते संभवंति। स मुख्यः। उत्तरे चये त्रयस्त्रयस्ते तस्य तस्य पुरुषा इति प्रतिपत्तव्याः। होता मै-
त्रावरुणोच्छावाको ग्रावस्तुद् अध्वर्युः प्रतिप्रस्थाता नेष्टोन्नेता ब्रह्मा ब्राह्मणाच्छंस्याग्नीध्रः पो-
ता उद्गाता प्रस्तोता प्रतिहर्ता सुब्रह्मण्य इति। परिक्रमनिर्देशः सर्वे पुरुषव्यापि पदार्थानुष्ठाने अयमे-

श्रौ०वृ०
११५

वत्क्रमइतिज्ञापनार्थं॥ एते ह्यहीनैकाहैर्याजयंति। एते याजयंतीति वचनादहीनैकाहैः षोळशैकपुरुषा या
जयंति। न सदस्य चामित्युवमसाधुर्यवइति ज्ञापितं भवति। अतः सत्यपि वरणे तेषामृत्विक्त्वं न भवति। अ
हीनैकाहैरितिवचनं सत्रेष्वेतेषामपिवरणनिवृत्त्यर्थं। याजयंतीति वचनं स्वद्रव्यत्यागात्मकत्वाद्या
गपदार्थस्य ऋत्विग्भिः सकर्तुं न शक्यत इति ज्ञापनार्थं। अतः स्वामिकर्तृक एव यागपदार्थो भवती
ति सिद्धं। एत एवाहिताग्नय इष्टप्रथमयज्ञा गृहपतिसप्तदशा दीक्षिता सोमोप्याग्निर्मित्तसुखवः
सत्राण्यासीरन्॥ एत एवावधारणात्सदस्यादिवर्जिताः पूर्वोक्ताः एव षोडशपदार्थसंबंधिनः पुरु
षा अग्नीनाधाय प्रथमयज्ञेनेष्ट्वा गृहपतिसंज्ञकेन केवलयजमानपदार्थकारिणा सप्तदशेन
पुरुषेण सहिताः संतः स्वास्वानग्नीन्सर्वान्मिश्रयित्वा सर्वे वदीक्षिता गृहपतिमुखाः सत्राण्या
सते सत्रैर्यजंते इत्यर्थः। इष्टप्रथमयज्ञा इत्याहिताग्निविशेषणं। यद्याहिताग्नयस्तदेष्टप्रथमय
ज्ञा भावेयुरिति। तेनानाहिताग्नीनामपि सत्रासनमस्तीति गम्यते। तन्मुखा गृहपतिप्रधानाः गृह राम
पत्यभिप्रेतवैकल्पिकपदार्थकारिणस्तथाविशुद्धसमवायेन गृहपतेरविरोधेन कर्त्तव्यमित्यर्थः। तेषां ११५

हविस्कंनामिमर्षा
दीयतपतिशब्दादौ ५

वनस्पतियागेरूतत्वाकादौ च ३

समावापादियथार्थमभिधानमैष्टिके तंत्रे। तेषामिमिसत्रिणः पुरुषानुच्यंते। समावाप इति यस्मिन्क
र्मण्यग्नयः समोप्यंते तत्कर्म समावापशब्देनोच्यते। साग्नीनाम नग्नीनां च सत्रासनमुक्तं। तत्र साग्नीनां
सत्रिणां समावापादियथार्थमूहः कर्त्तव्यः। ऐष्टिके तंत्रे। नानेष्टिकेन पाशुक इत्यर्थः। तंत्रग्रहणं ऐष्टि
कसंबंधेपि तंत्रत्वाद्वाच्य एव भवति। नान्यत्रेत्येवमर्थं। तेन प्रथमाध्यायविहिते न प्रायश्चित्ते भिन्न भव
ति। तस्मिन्नध्याये तंत्राधिकाराभावात्। न तृतीयाध्यायविहिते इति वचनं॥ दीक्षणाद्यनग्नीनां॥ साग्नी तंत्र
नां समावापप्रभृतियथार्थमभिधानमुक्तं। इदानीमनग्नीनां दीक्षणीयाप्रभृत्येव यथार्थमभिधा
नमैष्टिके तंत्र इत्युच्यते। सत्राणामग्निसाध्यत्वादग्नीनां साग्निभिः सहैव सत्रासनं भवति। तत्र न
दीक्षणाद्याक्कनेषु एकवचनेन ह्येवेद्विवचनेन बहुवचनेन बहुवचनेन इत्येवं भव
यजमानव कुर्वे ति। सत्रेष्वग्निबहुत्वे सति सर्वेष्वपुयजुर्निगदेष्विति यथार्थमूहे प्राप्ते समावापादीत्यनेन सूत्रेण य
जमानाभिधायिनामेवेति नियम्यते। ऐष्टिके तंत्र इत्यपि। ततउत्तरसूत्रेण तावेव नियमावनग्नीनां
दीक्षणीयाद्येवन प्राग्भाविन्युत्सवा संभरणादाविति विधीयते॥ अग्निर्मुखमिति नियाज्यानुवाक्य

मैत्रावरुणश्च सर्वान् दंडान् गृहीत्वा एकेन दंडेन दंडिलसि स्येस्तेषामेकेनाभिमतेन सहितः स्वपदार्थान् कुर्यादित्येवम
न्नकल्पयितव्यं प्रैषेषु निधित्सु अग्राह्यविधीयते ४ वाक्यः १

श्रौ०सू० ११६ योः। रुत्कादप्राप्तऊहोविधीयते दंडप्रदाने। अनैष्टिकत्वादस्य मंत्रेषूहविधानं। अस्मिन्मंत्रे यजमान
विषयस्य पदस्याभावेप्यूहविधानसामर्थ्याद्दंडविषयस्येवायमूहविधिरिति कल्पनीयं। अत्र बहु
वो दंडाः संतीति दीक्षितबहुत्वाद्दीक्षितबहुत्वाद्दीक्षितदंडस्य च प्रकृतौ मैत्रावरुणादंडत्वमवगतं। अत्र
च ते बहवः संनिहिताः संतितेषां च सर्वेषां प्रदानं प्राप्तं एवं प्राप्ते ऊहो विधीयते घृतयाज्यायां। अनैष्टिक
त्वादृत्कोद्धप्राप्तविधिः। कुर्द्धा च॥ रुत्कादप्राप्तिः। अच्छावाकनिगदो पदवः प्रत्कपदवेत्र। निगदश्च
उपदवश्च प्रत्कपदवश्च निगदोपदवप्रत्कपदवमितिद्वंद्वैकवद्भावः। पुनरच्छावाकशब्देन षष्ठीसमासः।
अच्छावाकस्य निगदे यजमानहोतरध्वर्यो इत्यत्र उपदव मित्रपदवे प्रत्येतासुन्वन्नित्यत्र। आ
र्षेयाणि गृहपतेः प्रथमं वरिलालादीनां मुख्यानां। आर्षेयवैपो गृहपतेः प्रथमं वरिलालादीनां २४
मुख्यानां प्रहृणीते। गृहपतेः पृथग्वचनं यावतोनंतर्हिता इत्यत्रापि पृथक्स्वरणार्थं। आत्मादि वचनं
दीक्षाक्रमनिवृत्त्यर्थं। तेन सूक्तवाकादौ नामादेशो दीक्षाक्रमस्यास्य च विकल्पः सर्वत्र सिद्धो भवति। राम
एवं द्वितीयतृतीयचतुर्थानां। सर्वान्मिव यदित्यमस्मत्सूत्रोक्तएव क्रमश्च॥ यावतोनंतर्हिताः समानगो ११६
त्रौ

संस्कर्तहोतासंस्कार्या आहवनीयाः आहवनीयस्य यजमानेनोत्सादितत्वात्तयजमानस्य पुत्रवदुपचर्यते। तस्माद्यजमानस्य गोत्रमाहवनीयस्यापि भवति तेन
स्मात्संस्कार्य भेदात्संस्कार्यभूतस्य प्रवरणस्यावृत्तिर्भवति अनग्निनां तु गृहपतेराहवनीय एव आहवनीयो भवति तस्मादनग्नीनामपि प्रवरणं कर्तव्यमेवा। नेन
न प्रकारेण सूक्तवाके नामादेशश्च कर्तव्यः इति सि० भाष्ये

त्रा रुत्वावर्तेत संस्कृत॥ समानगोत्राः समानार्षेया इत्यर्थः। सगोत्राणामपि भिन्नार्षेयत्वसंभवात् समानार्षेय
त्वमेव वा तत्र सिद्धो निमित्तमिति लक्षणार्थत्वमत्राभिहितं समानगोत्राणां इत्यस्यार्षेयवरणस्याहवनीयसं
स्कारत्वे सत्याहवनीयभेदेच सत्यार्षेयस्यैकस्याहरणाकाले व्यावरणोच्चारणविशेषाग्रहणात्तंत्रा
नुष्ठानमुक्तवानाचार्यः॥ आवर्तयेद्द्व्यान्वयाः संस्काराः॥ वा शब्दः पक्षं व्यावर्तयति। आवृत्तिरेवा
त्र कर्तव्या द्व्यान्वयाः स्संस्कारो यतः। द्व्येअन्वयो येषां ते द्व्यान्वयाः संस्कारा पाद्द्व्यवच्छावर्ति
त्वादित्यर्थः। प्रतिप्रधानं गुणा आवर्तेत इति सिद्धो न्यायः। यत्तु नर्विशेषाग्रहणात्। अनावृत्तिरिति
तदपि न। एकवचनांतस्यार्षेयस्य बहुष्वनभिधानादिति एवं चेद्बहुवचनोहः किमिति न क्रियते। तेषां
समावापादिरित्यत्र यजमानवाचिनामेवोहनियमात्। अत आवृत्तिरेवात्र युक्ता। साग्निचित्येषु
कर्तृषूखासंभरणीयामिष्टिमेके। अग्निचयनमग्निचित्या तया सह वर्तंत इति साग्निचित्याः कर्तवः।
तेषूखासंभरणीयां नामैष्टिकमेके शाखिन आमनंति। उखासंभरणप्रयोजनं उखासंभरणी
या। अग्निर्ब्रह्मण्वान् अग्निः क्षत्रवान् अग्निः क्षत्रभृत। ब्रह्मण्वान् क्षत्रवान् क्षत्रभृत् इत्यग्नेर्गुणास्ति

क्रतुग्रहणं सत्राधिकारनिवृत्त्यर्थः उखासंभरणं तु नित्यं इष्टिर्विकल्पः ३

स्त्वोदेवता॥ एतेनाग्नेर्ब्रह्मणा वाऽवृधस्व ब्रह्म च ते जातवेदो नमश्च। पुरूण्यग्ने पुरुधा त्वाया सवित्र
चित्रं चितयं तमस्मे [illegible] अग्निर्नीचो बृहतः क्षत्रियस्य वर्ध मिते सुमतिं पोष्यवागिति। इदं प्रभृति
कर्मणां ज्ञानेस्त्वरामुत्तरोत्तरं। इदं प्रभृतिर्येषां तानीदं प्रभृतीनि इदं प्रभृतीनि च तानि कर्माणि वेदं प्रभृति
कर्माणि तेषामुत्तरोत्तरज्ञानैस्त्वरां भवति। एतत्त्वपि पौर्णमासात्॥ एतद् उरुखासं भरणीयं पौर्णमासाद्भवे
स्त्वरां भवति। अत एतत् सिद्धं भवति। मंद्रादि त्रिषु त्रिषु स्थानेषु षष्ठे नयमेन दर्शपूर्णमासयोर्मंत्राणां
प्रयोगः। सप्तमेन वषट्कार इति। एव पंचम चतुर्थ तृतीय द्वितीय प्रथमेरुरवासं भरणी याप्राजाप
त्या दीक्षणीया प्रायणीयातिथ्याः प्रयोक्तव्याः। तस्मात्तस्मादुत्तरेण च वषट्कारः। प्रायणीया व
मुख्यत्वात् सि· त्सोमप्रवहणां॥ मंद्रस्य द्वितीयेन यमेनेत्यर्थः। ऊर्ध्वं प्रथमाया अग्निप्रणयनीयाया औपवसथ्ये नियमः।
औपवसथ्ये यदग्निप्रणयनं तस्य प्रथमाया ऊर्ध्वं स्वरे अनियमो भवति। मंद्रो वा मध्यमो वोत्त
मो वा सर्वो वा स्वप्रयोगपक्षे मंद्रादीनुत्तमपर्यंतानामारोहणेरेव प्रयुंजीत। एकस्वर प्रयोगे राम
पियमाने वारोहयेत। मध्यमादि घर्मे॥ घर्मे मध्योत्तमयोरेव नियमः। न मंद्रस्य तत्र प्रवेशाद् इत्यर्थः। ११७
मो

अत्रापि स्वरयोर्यमानां चारोहित्वमेव स्यात्॥१॥ दीक्षणीयायां धाय्ये विराजौ॥ दीक्षाप्रयोजना
इष्टिः दीक्षणीया सा कर्तव्या तस्यां धाय्ये विराजौ भवतः। अग्ना विष्णू॥ अस्यामियं देवता। अग्नि
र्मुखं प्रथमो देवतानां संगतानामुत्तमो विष्णुरासीत्। यजमानाय परिगृह्य देवां दीक्षयेदं हविरा
गच्छतं नः। अग्निश्च विष्णो तप उत्तमं महो दीक्षापालाय वनतं हि शक्रा॥ विश्वैर्देवैर्यज्ञियैः संवि
दानौ दीक्षामस्मै यजमानाय धत्तमिति। साग्निरत्ये चित्रीण्यन्यानि॥ हवींषीति शेषः। वैश्वान
र आदित्याः सरस्वत्यदितिर्वा॥ अत्यर्थो विकल्पः त्रीण्यन्यानीत्यनेन विशेषणात्। आम्नावैष्णवाद
धिकानि त्रीणीति गम्यते। पारयंत आदित्यासो जगत्स्था इति द्वे। एते एव भुवद्वद्भ्यो भुवनपतिभ्यो वा। एते एव
चौ आदित्येभ्यो भुवद्वद्भ्यो आदित्येभ्यो भुवनपतिभ्यश्च याज्यानुवाक्ये भवतः। भुवनपतिलिंगयोरेकं भुव तः
नपतीनां विधानादेतद्गम्यते सगुणेभ्योऽपि निर्गुणाय विहितेव वचनाद् हते सगुणाया स्तेन भवत इति॥ ने
दमादिषु मार्जनमर्वाक् गुदयनीयायाः॥ इदमादिषु कर्मसु प्रागुदयनीयायां न मार्जनं भवति। द्विविधं वेदमा
र्जनं गृह्यते चोदितं लैंगिकं च परिस्तरणे रंजलिमंत धार्या प्र आस्व यते सब्रह्मका [illegible] त्वाले मार्जयिं

नेइति चोदितं। प्राच्यादिदिशो देवा ऋत्विजो मार्जयंतामिति लैंगिकं। तदुभयं प्रतिषिध्यते। शास्त्रांतरे च
स्पष्टं वचनमस्ति दीक्षणीयादि शंयुवाकांतं विनाकादि न भवतीति। तेन उभयप्रतिषेधोवगम्यते। एवं सति
दर्शनादग्नीषोमीये सवनीये चात्वाले मार्जनं न प्रतिषिध्यते कुतः चात्वाले मार्जयिता ध्वर्युपथेन
पति सुतं इति सवनीये दर्शनं। अग्नीषोमीयेण चात्वाले मार्जनादिति सिद्धवदनुवादो दग्नीषोमी
येप्यस्तीति गम्यते। एवं सत्युभयोर्न प्रतिषेध इति सिद्धं॥ इडमादीळायां सूक्तवाके चागुराशीस्थाने इ
ळायां सूक्तवाके च या आशिषस्तासां स्थाने आगुर्नाम मंत्रः प्रयोक्तव्यः। आगुरं प्रक्षिप्य आशिषउद्धृत्य
थातौ प्रयुज्येते इळासूक्तवाकौ तथा पाणिनैव दर्शयिति। उपहूतोयं यजमानोस्य यज्ञस्यागुर उदृचमशी
यीयेति तस्मिंस्तु पठ्यतः॥ एवमिळानिगद इत्यर्थः। उपहूतोयं यजमान इत्यस्मादुपरिष्टात्तस्मिंस्तु पठ्य
त इत्यस्मात्पुरस्ताद्यः पदसमुदायस्ता आशिषइत्युच्यंते। तत्स्थाने यः पदसमुदाय इदानीं पठ्य
ते। असावागुरित्युच्यते। एवमिळानिगदः॥ आशास्तेयं यजमानोस्य यज्ञस्यागुर उदृचमशीयेत्या राम
शास्ते॥ इत्येवं सूक्तवाक इत्यर्थः॥ आशास्तेयं यजमान इत्यस्मादुपरिष्टा(त्) आशास्तेयदनेन हविषे ११८

ति अस्मात्पुरस्ताद्यः पदसमुदायस्ता आशिषस्तत्स्थाने यः पदसमुदाय इदानीं पठ्यते स चागुरः ए
वं सूक्तवाकनिगदः। अस्य यज्ञस्यागुर उदृचमशीयेत्येतं भयत्रागुः। अस्यायमर्थः। अस्य यज्ञस्य ओर
अस्य समाप्तिं प्राप्नुयामिति। तस्मिंस्तु पठ्यतइती ळायां प्राप्नुयामित्याशास्तइति सूक्तवाके अतइयम
प्याशीरेव। आगुरित्यस्य उदृगाशासनरूपत्वादागुरित्युच्यते॥ नचात्र नामादेशः॥ पावादेवनामादे
शाभावे सिद्धे पुनः प्रतिषेधवचनं अन्यत्सर्वं प्रकृतिवदेवेति ज्ञापनार्थं। प्रकृत्यां सउर्ध्वं पश्चिळायाः॥
सवनीयपश्विळात्रगृह्यते। तच्छब्दचोदितत्वात् अंत्यं तदिति वचनादहरगणे पृषद्येदनि पश्विळा गृह्यते।
एकादशेषु तदेवांत्यमंत्यं भवति। दीक्षितो नासंचरो गार्हपत्याहवनीययोर्गतरागृनेः प्रणयनात्
संचरशब्द आसनशयनादीनां प्रदर्शनार्थः। तेनास्मिन्नवधौ तयोरेवाग्न्योर्मध्ये समीपे यजमा
नावर्तेरन्। अग्निप्रणयनोत्तरकालं संचरदेशः शास्त्रांतरादवगंतव्यः। दीक्षणादि रात्रिसं
ख्यानेन दीक्षा अपरिमिताः॥ प्रकृतेरिदं दीक्षाविधानं यस्मिन् दीक्षा चेदीक्षणं क्रियते तद्
वारभ्य रात्रीरेव संख्याय अपरिमिता दीक्षाः कर्तव्याः। तस्माद्दीक्षितो द्वादशाद्भृतिं वन्वीतेति

प्रकृतौ नित्यवदाम्नातं। तथा मासं संवत्सरं यदा वा कृशः स्यादिति परिमिता। अपरिमि
ताश्च दीक्षाकल्पाः शाखांतर आम्नाताः। तेषां प्रदर्शनार्थं परिमितवचनं अध्वर्यु प्रत्ययत्वाद्दी म२
क्षा नियतेः। तत्सूचन मात्रमत्रो कवानाचार्यः। सत्राणां दीक्षाविधानमत्रोच्यते॥ एकाहाप्रभृ
न्त्यर्धसंवत्सरान्ते। संवत्सरत्वेव सत्रे॥ महाव्रतसहितेसत्रेऽयं विशेषः। संवत्सरमेवेति। द्वाद
शाहतापश्चितेषु यथा सुत्योपसदः। तेषु सत्रेषु यथा सुत्योपसदः तथा दीक्षा अपि कर्तव्याः। उ
पसत्संख्याया अप्यन्यत्र विहितत्वादत्रैव विधिः कल्प्यते। यत्संख्याः सुत्या उपसदश्च तत्संख्या दी
क्षा एवेति। एतदुक्तं भवति। द्वादशाहतापश्चितेषु यत्संख्याः सुत्यास्तत्संख्या एवोपसदश्च दीक्षा
श्च भवंतीति॥ कर्माचारस्त्वेकाहानां। आचीर्यते स्मिन्निति आचारः कालः। कर्मणा आचारः कर्माचारः।
एकाहानां प्रयोगकालो वक्ष्यत इत्यर्थः। एकाहशब्देनात्र विकृत्येकाहा उच्यन्ते। बहुवचनसंबं
धात प्रकृतौ दीक्षाणां विहितत्वाच्च। तुशब्दो विशेषविवक्षार्थः। अस्मिन्प्रकरणे दीक्षाकाल एव वि राम
धातव्यो दीक्षोपसत्सहितानामेकाहानां प्रयोगकालो विधीयत इति विशेषः। एकाति स्त्रोवा ११८

दीक्षास्तिस्र उपसदः सुत्यम् अहरुत्तमं। उत्तमग्रहणं प्रातरनुवाकाद्युदवसानीयांतमेकमेवाहः स्या
त्तच्च सुत्याशब्देनोच्यत इत्येवमर्थं। दीक्षाकाले विधातव्ये उपसत्सुत्यानामपि विधानं त्रिप्रकारेणा
मेव सौमिकत्वसिध्यर्थं। तेन दीक्षणीयायाः प्राग्भाविनः खस्तं नरणीयादेः सौमिकधर्मत्वं पंथ्य
त्वादिर्न भवतीति सिद्धं। दीक्षांते राजक्रयः॥ दीक्षाहस्सु परिसमाप्तेष्वनंतरं यदहस्तस्मिन्नहनि
राजक्रयः कर्तव्यः। सोमः क्रेतव्य इत्यर्थः॥२॥ तदहः प्रायणीयेष्टिः। यस्मिन्नहनि सोमः क्रेष्यते तदहः
प्रायणीयानामेष्टिः कार्या। दीक्षांते राजक्रय इत्युक्त्वा तदहरिति वचनाद्दीक्षांते यदहस्तस्य राजक्रय
इति संज्ञा अर्थात्कृता भवतीति गम्यते। तेनायमर्थः। तदहरिति यद्राजक्रयसंज्ञमहस्तस्मिन्नित्यर्थः।
पथ्यास्वस्तिरग्निः सोमः सविताऽदितिः स्वस्ति नः पथ्यासु धन्वस्विति द्वे अग्ने नय सुपथा राये अ
स्मान् देवानामपि पंथामगन्म त्वं नः सोम प्रचिकितो मनीषा या ते धामानि दिवि या पृथिव्यां या विश्वे
देवं सत्पतिं सूक्तैर्य इमा विश्वा जातानि सुत्रामाणं पृथिवीं द्यामनेहसं महीमू षु मातरं सुव्रतानां
सेदग्निरग्नीरत्यस्त्वन्यानिति द्वे संयाज्ये। शंयवंतेयं। इयमिति वचनोदियमेव शंय्वंता नोदयनीये

त्यर्थः।अँनाज्यभागा।वत्राष्टोध्यादर्त्तव्याः।अनाज्यभागावेयमेवभवतिनोदयनीया॥संस्थितायांऽ।
राजानंक्रीणंति।संस्थितायामितिवचनंप्रायणीयायाराजक्रयस्य संबंधार्थं।तेनाद्यगणेषुप्राय
णीयावद्राजक्रयोनाभ्यावर्त्तयितव्यः।सकृदेवकर्त्तव्यइत्यर्थः।क्रीणंती।तिवचनंसोमप्रवहणाय
दस्मात्कर्मविदितंतत्क्रयोत्तरकालवर्तिन्येवप्रवहणंभवतिनान्यकालीनइत्येवमर्थं।तंप्रवेस्य
स्तुपश्चादनसस्त्रिपदमात्रेंतरेणवर्त्मनीअवस्थाय प्रेषितोग्रेमिदिंकारात्वंविप्रस्त्वंकृ
विस्त्वंविश्वानिधारयन्।अपजन्यंनेयंनुदेत्यस्पंदयन्पाह्लं। प्रपदेनदक्षिणापांसूंस्त्रिरु
दुप्यानुब्रूयात्महदादनिशृयः प्रेदिहृदस्यतिः पुरएतातेअस्तु।अथेमवस्यवरआदृथि
व्याआरेशत्रून्कृणुहिसर्ववीरइतितिष्ठन्।तंक्रीतंसोमंराजानंप्रागवंशस्समीपंनेष्यत्स्वधर्युस्तु
पश्चादनसस्त्रिपदमात्रेंतीतेचक्रयोर्येवर्त्मनीतयोश्चमध्यदेशस्यार्जवेनयोदेशास्तस्मिन्नवस्था राम
यप्रेषितःसंनमिदिंकारात्वंमस्यासीदमस्वालयत्रपदेनदक्षिणस्यांदिशिपांसूंस्त्रिरुदुप्येतार्वं १२०
विप्रइतिमंत्रेणाततस्तस्मिन्नेवसाम्येनस्थितामिदिंकुर्यानुब्रूयात्।तिष्ठन्निवचनंब्रजन्

धर्युस्तुप्रथमामसमाप्यनब्रजेदित्येवमर्थं॥अनुब्रजंस्तुनराश्वांतरेणैववर्त्मनी॥अंतरेणैववर्त्मनीअ
नेनपश्चानुब्रजंस्तुतराअनुब्रूयादित्यर्थः।ब्रजन्नेवानुब्रूयात्नब्रजनविक्षेपइत्येवमर्थंब्रजतिग्र
हणं।सोमयास्तेमयोस्तुवइतितिस्रः।सर्वेनंदंतियशसोगतेनागंदेवत्रस्तुभिर्वर्धस्तुसयभिय
धर्यार्त्यआरभेत।अवस्थितेनसिदक्षिणात्यसादतिक्रम्यराजानमभिमुखोवतिष्ठते।अ
नस्यवस्थितेतस्यदक्षिणपार्श्वेनराजासमीपंगतातमीक्षमाणस्तत्रैवतिष्ठेत्।अपायमा
नेराजन्यग्रेणानीत्युसंब्रजेत॥अनुब्रजंस्तुतराइतिसवस्थितस्तुअनुब्रजतोस्तुवचनसिद्धौसत्या
मनुब्रजेदितिवचनंसम्यगाज्ञोनंतरमेवानुब्रजेन्नव्यवायंत्रेषंकुर्यादित्येवमर्थं।अतोग्रेणाहव
नीयंतस्यानुब्रजनंकृतंभवति।यातेधामानिहविषायजंतिमाधियंशिक्षमाणस्यदेवतिनि
दितेपरिदध्याद्राजानमुपस्पृशन्॥निदितइतिब्रजनसमाप्तिदर्शनात्तिष्ठन्नेवपरिदध्यात्।सेव
नेरुस्तुवा।उपस्पर्शनविषयस्यविकल्पोयं।मंत्रेणबद्धस्यविस्त्रंसनेबंधनशास्त्रविरोधःवृसनो
पस्पर्शनेचराजोपस्पर्शनशास्त्रस्यविरोधःतत्रान्यतरस्यलक्षणाश्रयणेसतिउपस्पर्शनस्ये

१२१ वललक्षणाश्रयणं युक्तं। बंधनोत्तरकाले विदितत्वादिति वसनइत्युक्तं वचनाद्वृद्धस्य वचनादेव
विस्रंसनेन दोष इति मत्वा अंशुर्वेत्युक्तं। वाशब्दः पक्षव्यावृत्त्यर्थः। बद्धो वसनीति वचनात्पुनरस्या न
पि बंधनं कर्त्तव्यं॥४॥ अथातिथ्येष्टिः॥ आतिथ्यानामेष्टिरनंतरं कर्त्तव्या। तस्यामग्निमंथनं॥ तस्या
इति वचनं तदंगतासिध्यर्थं तेनास्मिन्नस्मिन्नग्निमंथने मंत्रस्य प्रथमयमः साधितो भवति। धाय्ये
अतिथिमंतौ। समिधाग्निं दुवस्यत। आप्यायस्व समेतु त इति त्रिविष्णुरिदं विष्णुर्विचक्रमे तदस्य प्रियम
भि पाथो अस्थयां होतारं चित्ररथमध्वरस्य प्रप्रायमग्निर्भरतस्य शृण्व इति संयाज्ये। संस्थिता
यामाज्यं तानूनप्त्रं करिष्यंतो निम्रुक्तां यत्नाद्दृष्टमस्य नाधृष्यं देवानामोजो अभिशस्तिपाः।
अनभिशस्त्यंजसा सत्यमुपगेषां स्विते माधा इति॥ संस्थितइति वचनमहर्गणेषु तानूनप्त्रस्याना
वृत्त्यर्थं। तानूनप्त्रमित्याज्यविशेषस्य नाम करिष्यंत इत्यार्त्विज्यं करिष्यंतः करिष्य द्रुह इवमांस वैरस्वप
मे वाजिमृशेरन्नान्योन्यस्य आतिथ्येनेत्येवमर्थं। स्पृष्टोदकं राजानमाप्याययेति। आप्यायन श्रीराम
स्वरूपमुपरुक्तमद्भिः संस्पर्शनाधिक्यादिति॥ इदमादिमदंतीरवर्थं जपमलं। इतः प्रभृत्युपसत्सु यदु १२१

दकोपस्पर्शनं क्रियते तत्र मदंतीरेव गृह्णीयात् मदंत्यो नाम तप्ता आपः। उपस्पर्शनसन्निधानुक्त
त्वादुपस्पर्शन एवायं नियमो नाचमनादावपीति गम्यते। अर्थग्रहणमर्थप्राप्तेषूपस्पर्शनेषु भव
तीत्येवमर्थं। अंशुरंशुष्टे देव सोमाप्यायतामिंद्रायैकधनविद आतुभ्यमिंद्रः प्यायतामात्वमिंद्राय
स्मान्४ प्यायस्वाप्याययास्मान्सखीन्सन्या मेधया स्वस्ति ते देव सोम सुत्यामुदृचमशीयेति। आप्यायनमंत्रोऽयं॥
स्पृष्टोदकं निह्नुवते प्रस्तरे पाणीन्निधायोत्तानान्दक्षिणान्सव्यान्नीचः एष्टा राय एष्टा वामानि प्रेषे
भगाय। ऋतमृतवादिभ्यो नमो दिवे नमः पृथिव्या इति॥ निह्नवो नाम नमस्कारः। द्यावापृथिवीभ्या
मेव तं नमस्कुर्वंतीति दर्शनात्। तेन पाणिनिधानं नमस्कारांजलिरूपेण कर्त्तव्यं॥५॥ स्पृष्टोदकं प्रव
स्या र्ग्येण चरिष्यत्सूत्तरेण खरं परिक्रम्य पश्चाद्दीपविश्य प्रेषितोभिष्टुयाद्ग्रावाणं। एतान्युदकोपस्प
र्शनान्युत्तरांगानि आप्यायननिह्नवप्रवर्ग्याणामंगानीत्यर्थः। प्रवर्ग्यशब्दः कर्मविशेषवचनः। तेन
चरिष्यत्स्विति वचनं होतुरभिष्टवनकालविधानार्थं तेन कालांतरे यद्यध्वर्युर्विश्वरेत तदाप्यभिष्टुया
देव। खरो नाम यत्र महावीरः संसाद्यते स देशः। एतदुक्तं भवति अध्वर्य्वादिषु प्रवर्ग्येण चरिष्यत्सु

होतातीर्थेन प्रपद्यस्वरसुचरेण प्रव्रज्यतस्य पश्चाउविश्यततः प्रेषितः संनभिंष्टुयादग्नावानी। अग्नावा
नेलक्षणमाह। अत्र च त्वमनवानसुक्तां प्रयुक्तावस्येत। अस्यविधानस्य अग्नावानुमितिसंज्ञेतिप्रद
र्शनार्थं। एवंसति अग्नावानशब्दप्रयोगः। अवसान सुच्छासार्थमिरूक्ते तेनार्धर्चः संहितयावक्तव्याः।
तत्रार्धर्चांतसंधानेनाषिके वर्ससंहितास्यान्न छांदसीतिमंतव्यं। अश्ले अज्ञानं प्रथमं पुरस्ताद्दिसीमतः
सुरुचोवेन आवः। संबुध्नि पार्श्व उपमा अस्यविचाः सतश्च योनिमसतश्चविवः। इयं पित्रेराष्ट्र्येत्वग्रे
प्रथमायजुषे मनस्था। तस्माएतंसुरुचं ह्वारमह्यं घर्मं श्रीणंति प्रथमस्य धासेः। महान्मही अस्त
भायद्विजातोद्यांपितासद्म पार्थिवं च रजः। स बुध्नादाष्ट्रजनुषाभ्युग्रं। बृहस्पतिर्देवतातस्य संम्रा
ट्। अभित्यंदेवंसवितारमोण्योः कविक्रतुमर्चामिसत्यसवं रत्नधामभिप्रियंमतिंकविं। ऊर्ध्वाय
स्यामतिर्भाअदिद्युतत्सवीमनि हिरण्यपाणिरमिमीत सुक्रतुः कृपास्वः। पास्वरिति वासंसी
दस्वमहाँअसीति संसाद्यमानेजंतियं प्रथयंतो नविप्राइत्यज्यमाने पतंगमक्तमसुरस्यमाय राम
यायोनः सखुत्येअग्निदासदग्नेनवानो अग्ने सुमनाउपेतावितिहुताः कृणुष्वपाजः प्रतिंनय १२२

घ्वीमिति पंचपरिलाविरोधिद्वयोरद्यावस्थ्यंवचः अक्तेअन्यद्यजतंतेअन्यद पन्चर्यं गोपामनपद्यमा
नं स्वक्रे द्रप्सस्यायं वेनश्चोदयत्पृश्निगर्भाः पवित्रंतेविततं ब्रह्मणस्पत इति द्वेवियत्सावित्रं धिषणतअ
व्रतघर्मं शोचं प्रणवेषु बिभ्रतः। समुद्रअंतरावेगोवि चक्षणं चिरह्नोनामसूर्यस्यमन्वत। गणानां
त्वाप्रथमस्य यज्ञस्यापन्नयं लैत्यतस्याद्यया यजमानमीक्षते द्वितीयया पत्नीं तृतीययात्मानं
कोराधद्धोत्राश्विनावामिति नवा नात्यग्निर्गुर्वाणे वेळेद्यावापृथिवीइति प्रायुत्तमायाअरूक्षच
दुपसः पृश्निरग्रिय इत्यावपेतोत्तरेणार्धर्चेन पत्नीमीक्षेतोत्तमयापरिहितेसमुल्लाप्येनानध्व
र्य वोवाचयंतीतिनुहर्षपटळं। एतावत्सर्वमभिष्टवनं। अत्रमध्ये यद्यात्स्वोर्थवचनं तदेव यास्याय
ते। कृपास्वः स्वःपास्वरितिवा। अग्नवयवभूतयोः कृपाहृपाद्याहृयोः प्रयोगविकल्पोयं। संसी
माने। सम्यक्साद्यमानइत्यर्थः। अंजं मानेअग्निर्यमापोउत्तराखण्या भिरूप्यं यथाशक्ति सं
पाद्य पवनीयं। अय॰ क्षते। द्विती॰ पत्नीं। तृती॰ त्मानं। प्रागु॰ पेते। उत्त॰ क्षेत। अत्रक्रियांतरसंबं
द्धायाअभावात्सामर्थ्यभिष्टवनमेवकार्यं। अभिष्टवनं नाम घर्मस्य संस्कारोभिधानरूपः।

एतच्च घर्ममभिष्टुहीति संप्रैषादवगतं। तत्र यत्क्रियान्तरमीक्षमाणादितदानुषंगिकं। तदपि क्व
नाकर्तव्यमेव। नत्क्रियमाणमेवं क्रियेत यजमानादीनीक्षमाण एताभिरभिष्टुयादिति। अनूक्तवद्विप
स्यामृच्यक्ततमो वा धर्मनीक्षमाणो ब्रूयात्। उत्तरेति स्वनात् अस्मादेव स्वनात् वृत्तिर्यारं जोवमतः। घा ३
उत्तःयंति। परिधानीयानन्तरं अध्वर्युर्भिर्यदुक्तं तदस्मदीयैरपि कर्तव्यमित्यर्थः। उत्थाप्य वाचयती
त्यध्वर्युशास्त्रोक्तस्य होत्रादिभिरनुष्ठेयत्वं सूचयति। इति० टळं। ब्रह्मजज्ञानमित्यादि यद्दृष्टु
क्तेनत्पूर्वमभिष्टवनमित्यर्थः। इतिकारः समाप्तिसूचकः। नुवाक्ष्ट तत्र विवक्षा सूचनार्थः। घ
अथोत्तर॥ अथशब्दः संबंधार्थः। पूर्वोत्तरयोः पटलयोः संबंधप्रयोजनमुक्तरेपि पटलेऽस गावा
नादि धर्मप्रापणार्थं। उक्तसमितिवचनं याज्यावषट्कारानेसत्वप्ये काभिष्टवनत्वं सूचनार्थं।
उपविष्टेष्वध्वर्युर्घर्मदुघामाह्वयतीति संप्रैषानन्तरस्य॥ उपविष्टेषु होत्रादिष्वध्वर्युर्घर्मदु
रं घामाह्वयतीत्यसावेह्यसावेहीति तदेवोत्तरस्यां जोनिमित्तमित्यर्थः। उपविष्टेष्विति वचनं यद्य राम
ध्वर्युर्वानोत्थापयन्ति तदाप्युत्थाय स्वयमेव कुर्युरित्यस्यार्थस्य सूचनार्थं। अनामिहि कृत्य। उ १२२

त्तरमभिष्टुयादिति शेषः। उपह्वये सुदुघां धेनुमेतामिति द्वे अभित्वा देव सवितः समीवत्सं न
मातृभिः सं वत्सइव मातृभिर्यक्षेत्ता नः शग्मो यो मया न गौरमीमेदनु वत्सं मिषन्तं नमसेदुप
सीदत संजानाना उप सीदन्नभिज्ञु पत्नी विवस्वता दुह इति सप्त का कां समिद्धो अग्निरश्विना त
प्तो वां घर्म आगतं दुह्यन्ते गावो वृषणेह धेनवो दस्रा मादयेति कारवः। समिद्धो अग्निर्वृषणा रतिर्दिवः
तप्तो घर्मो दुह्यते वामिषे मधु। वयं हि वां पुरुतमासो अश्विना हवामहे सधमादेषु कारवः। तदुप
यस्तनमस्य कर्मन्निन्द्रं नो दुह्यते घृतं पय उत्तिष्ठ ब्रह्मणस्पत इत्येता गुक्तावतिष्ठते दुग्धाया
मधुक्षस्यिप्सु पीमि अभित्या क्रियमाण उपद्रव पयसा गोधुग्गोषमा धर्मे सिंच पय उस्त्रियायाः।
विना कमरव्यत्सविता वरेण्योऽनु द्यावापृथिवी सुप्रणीतिरित्यासिच्यमान आनूनमश्विनो ऋषि
मितिगव्य अस्तु ते सिंचतश्रियमित्याज आसिक्तयोः समुत्ये महतीरपद्रति महावीर मादायो
त्तिष्ठत्सु दुष्यदे वः सविता हिरण्ययेत्य रक्ति उत्थेत्ये तु ब्रह्मणस्पतिरित्यनु ब्रजेद्धधव इत्था
पद्मस्य रक्षतीति रवरमेवस्य तमतिक्रम्य नाके सुपर्णमुपयत्पतन्तमिति समाप्य प्रणवे

नोपविशेदनिरस्य तृणं प्रेषितो यजति तप्तो वां घर्मो नक्षति स्वहोता प्र वां मध्वर्युश्चरति प्रयस्वा
न्। मधोर्दुग्धस्याश्विना तनाया वीतं पातं पयस उस्रियायाः। उ नो पिबत माश्विनेति वा नाम्ना
मन्वानमग्ने वीहीत्यनुवषट्कारो घर्मस्याग्ने वीहीति वा अस्तु श्रौवषट् कृते जपत्यनुवषट्कृते तत्र विशा
आहाद सि पास्मादि स्वान्द्वे वा नयालिं द्रास्वाहाकृतस्य घर्मस्य मधोः पिबतमश्विनेत्येवं भक्षा पूरा
श्रिकेऽयड्डस्त्रिया स्वाहाकृतं घृतं पयायं सवामश्विना नागआगतं माध्वी धर्त्तारा विदथस्य सत्पती
तप्तं घर्मं पिबतं सोम्यं मधस्यापिबतमश्विनेति वा प्रेषितो होतानुवषट्कृते स्वाहाकृतः अग्निर्देवे
षु घर्मो यो अश्विनो श्रमस्मो देवपानः। तमी विश्वे अमृतासो जुषाणा गंधर्वस्य प्रत्यास्ना रि
हंति। समुद्रादूर्मिमुदियर्ति वेनो नभस्सः समुद्रमभियाज्जिगाति सरवे सखा यमभ्यावृ
त्त्या धरूणं जुषाऊतयऽइति हुतं घर्मं श्रिनमश्विनेति प्रागाथी। स्वाहा काण्वी मपरा हान्य
तरां वास्यं तं काण्वीत्वे वात्तमे पावकेत्यौ चे तवद्विस्यं परी त्युक्त्वा न क्षमा कां स्वाहा जिने न राम
नक्षोपायोऽकृतं हविर्मधु हविरिंद्र तमे ग्नावाऽश्याम ते देव घर्म। मधुमतः पितुमतो वाजवतो १२४

गिरस्वतो नमस्ते अस्तु मा मा हिंसीरिति नमस्कारजपः कर्मिणो घर्मं भक्षये युः सर्वे बुदीक्षिताः स वे बुदीक्षि
तेऽगृहपते स्कृतीयो नमो भक्षौ संप्रेषितः श्येनो नयोनिं सदनं धियाकृतमायस्मिन्नमभवा सवाते दु
दुर्व्यर्थिदः। सखिर्हदीर्घश्रुत्तमइंद्रस्य घर्मो अतिथिः स यवसाद्भगवती हि भूयाइति परिदध्या
स्था त॥ एवा वृद्धुत्तरं पटलं तन्मध्यगतानि व्याख्येयानि व्यर्यते। उत्ति० श्रुते दुग्धायामिसेत्ततो दुग्ध निमित्तदर्श
नादेवावस्थाने सिद्धे अवतिष्ठतइति वचनमत्रैवावतिष्ठते न स्वर्वासु लिंगापेक्षा कर्त्तव्येत्येवमर्थं।
दुग्धायामिति। आङ्कि० रिति। आसि० गव्ये। आस्तु० त्याजे। आसिच्य मानइत्यनुषज्यते गव्या
ग्रि७ जइति वचनात्। पयो विपर्यासे च पर्यासः। आसि० पद्गती द्व्योः पयसो रासेचनपर्यवसाने सति
समुत्येमहतीरपइति ब्रूयात्। महा० त्तिष्ठेत्। एतया भिष्टवनं कृत्वानंतरमुत्तिष्ठेत्। प्रैतु० व्रजेत्। ति
मन्त्रेवोक्त्वानुव्रजेत्। गंध० तृणं। स्वराक्षे वेणं तस्य पश्चात्याङ्मुखस्य तिष्ठतः पुनस्तमुत्तिक्रम्या
नुव्रजेत्। व्रजित्वा श्रोणिदेशं प्राप्य नाके सुपर्णमित्यस्या मंत्रः प्रणवोच्चारणेन सहतत्रैवोपवि
शेत्। वा वोन्यत्र व्याप्टतत्वान्निरसनेऽउपवेशने मंत्रोच्चारणं न संभवति। प्रतिषेधस्तु निरसनक्रियाप्र

तिषेधार्थः। प्रेषितो॰ वानं। अत्रैवासरे यजेति प्रेषित एवाभ्यामृग्भ्यां यजति ज्ञ चौरे वात्रद्विर्त्वं
नयाज्यायाः तेनसकृदागूर्वषट्कारौ कर्त्तव्यौ। अग्नेः॰ कारः। घर्मं॰ तिवा। ब्रह्मा॰ नेति। प्रति वषट्का
रं जपाद्वृत्तिः। एवमेः॰ ह्निाके। अपराह्निके प्रवर्ग्ये एवमेव सर्वं भवति तत्र विशेषमाह। युञ्॰ तिर।
एतौत्र वौयाज्या भवति। अप्रे॰ कृते। उत्तरां ब्रूयादिति शेषः। अप्रेषित वचनं पूर्व सत्रे प्रेषितो य
जतीत्यस्यानुवृत्तिमरणार्थं। तेन यदुस्त्रियास्वाहुतमिति अस्य पिबतमित्येताभ्यामपरा
ह्निके प्रेषितो यजतीति गम्यते। होतृग्रहणं ब्रह्माधिकार निवृत्त्यर्थं तेनापराह्निकेपि प्रवर्ग्ये व
षट्कारानुवषट्कारयोर्ब्रह्म जपोस्तीति गम्यते। तं घे॰ र्दद्यो काण्वीनाह्ये। अन्यत॰ र्यंतं। अनयो
रन्यतरामेव वासर्वेष्वपि प्रवर्ग्येषु ब्रूयादित्यर्थः। [redacted] काण्वीत्ये॰ तमे। अन्यतर पक्षेप्ययं विशे
षः। उत्तमे प्रवर्ग्ये काण्वीमेव ब्रूयादिति। अनयोश्चोर्विशिष्टकालनिर्देशादन्यस्य सर्वं साधा
रणमिति गम्यते। पाव॰ क्षेत। एताम्॰ कमुल्का नक्षार्थमाकांक्षेत। अत्रावस्था यनक्षणांक राम
र्तव्यमित्यर्थः। वाजि॰ पायः। उक्तइति शेषः। उपाय वचनमिळामिव प्रतिगृह्य होत्रेव मादेर्धर्मस्य प्रा १२५

पणार्थं। हुतं॰ जपः। यन्मेरतइत्यस्यापवादः। अत्रापि प्राणान्भक्षयेत्यव यजमानं वर्जयित्वा। कर्मि॰
येयुः। वाजिनस्य वैश्वदेव्यामुत्पन्नत्वात्तत्र प्रतिप्रस्थातुरभावादत्र प्रतिप्रस्थातुरुपहूवत्वा
मार्थं कर्मिणां भक्षणाविधानं। कुमस्कवारुणप्रघासिकएव। तस्यन्यायलभ्यत्वात्। सर्वे॰ न्ति
ताः। भक्षयेयुरिति शेषः। यजमानत्वादेव सर्वेषां भक्षणप्राप्ते वचनमिदं मैत्रावरुणादीनाम
स्मच्छास्त्रविहितोपायेनैव भक्षणं भवतीत्येवमर्थं। सर्वे॰ भक्षौ। सर्वाधिकारेपुनः सर्वसंग्रहा
र्थं सर्वेष्वपि दीक्षितेष्विति वचनं सत्रेष्वपि यजमानो गृहपतिशब्देनोच्यतेइति ज्ञापनार्थं। तेन
होताध्वर्युं गृहपतिभ्यामित्यादौ यजमानसंप्रत्ययः सिद्धो भवति। गृहपतेस्तृतीयोत्तमभक्ष
विधानमुपहवे क्रमविधानार्थं तेन होत्रादिवाद्येरेवेतरेषामुपहवयाचनं भवति गृहपतिशब्दे
यम्यते। पृथग्वषट्कारवचनं घर्माश्विन याज्यासु च। ग्द्वित्वेपि याज्याद्वित्वाभावात् साधनद्वारेणैक
वषट्कारतां वक्तुं। यत्र पुनर्द्वाभ्यामृग्भ्यामेकमेव याज्याकार्यमनुवाक्याकार्यं वा साध्यते तत्र सर्व
स्यार्धर्चे प्रणवो न कर्तव्यो। वषट्कारश्च। कार्यभेदाभावात्। सामिधेनीष्वपि प्रत्यृचं प्रणवसंबंधः
कार्यभेदनिमित्त एवेति मंतव्यः। इदमाद्यवानं प्रातःसवन इज्यानुवाक्ये। अयं विधिः प्रातःसवने प्र

युज्यमानानामपि भवति नोत्पन्नानामेव। तेन वाजिनामनुवाक्याप्यनवानं वक्तव्या। प्रैषौ चोत्तर
योरिति। तस्मादेव चनात्। इत्तरयोरपि ग्रहयोरनुवाक्ययोरप्यनवानेसिद्धे अन्यानुवाक्योत्पन्ना-
स्तत्र नास्तीति कृत्वा प्रयुज्यमानविषयत्वमस्य सूत्रस्यावगम्यते। प्रैषौ चोत्तरयोर्ग्रहयोः। प्रैषौ च
याज्यानुवाक्याश्चोत्तरयोर्ग्रहयोरनवानं भवंतीत्यर्थः। हुतेत द्रुहपात्रमाहरत्यध्वर्युः। एतदिति प्रक्र
तं वाय्विंद्रवायुसंबंधि यत्पात्रं तदित्यर्थः। गृह्यत इति ग्रहः सोमः तस्य पात्रं। एतदुक्तं भवति यदेत
द्वाय्विंद्रवायुसंबंधिग्रहपात्रं हुतात देवाहरत्यध्वर्युरिवेति तिनान्योप्यत्र ग्रहो हूयते पात्रमप्यन्य
दमस्तीति ज्ञायते। अध्वर्युराहरतीति वचनात्प्रतिप्रस्थाताप्यत्र जुहोतीति गम्यते। तेनास्मिन्नस्यमा
णे प्रति प्रस्थातप्युपह्वयात्वेनं कर्त्तव्यमित्यवगंतव्यं। तं हृत्वा ईयादे पुवसुः पुरूवसुरिति। तदिति व
चनमाहृतं गृह्णीयान्नाड्रियमाणमित्येवमर्थं। प्रतिगृह्य दक्षिणस्य रूमपोह्य तस्मिन्सादयित्वाका
शावतीभिरंगुलीभिरपिदध्यात्। प्रतिगृह्येति वचनं ग्रहस्य हस्तांतरसंक्रमणानिहत्यर्थं। दक्षिणस्य च राम
नमपोह्यादने सव्यस्यं प्रापणार्थं। आकाशावतीभिरंगुलीभिरिहिं नूतेन पाणिनापि दध्यात्। अंगुलिभि १७

रेवाकाशावतीभिरपिधानुमत्राक्यस्यात्। एवमुत्तरे। एवमुत्तरे अपि पात्रे प्रतिगृह्य साद नापिधानेकु
र्यादित्यर्थः। एवमुत्तरे सव्येनत्वपिधाय तयोः प्रतिग्रहो भक्षणं च। प्रतिग्रह भक्षणकाले तु सव्येनापिधा
नं भवतीत्यर्थः। मैत्रावरुणस्यार्थं वांमित्रावरुणा हो तोयस्तन्मित्रावरुणा गृणानाजमदग्निनेति रे तुव
सुर्विदद्वसुरिति प्रतिगृह्य दक्षिणेनैंद्रवायवं हत्वाभ्यात्मं सादनं। आश्विनस्य प्रातर्युजाविबोधय हो
तायस्त्वदश्विनानासत्यावाहृधाना नासत्यावनस्पती इत्येउ वसुः संयद्वसुरिति प्रतिगृह्य एवमेव हत्वो
तरं त्तरेणाशिरः परिहृत्याभ्यात्मं सादनं। एवमेवेति यथा मैत्रावरुणः पूर्वमासादित मैंद्रवायवं दक्षिणेन ह
त्वाभ्यात्ममासादितः। एवमाश्विनः पूर्वसादितावैंद्रवायवमैत्रावरुणौ दक्षिणेन हर्त्तव्य इत्यर्थः। ततस्त
मुत्तरेणाशिरः पश्चान्नीत्वा पुनर्दक्षिणेन शिरः पुरस्तान्नीत्वा मैत्रावरुणाद प्यभ्यात्मतरं सादयेत्। अनुव
चनप्रैष्ययाज्या सुनित्यो ध्वर्युतः संप्रैषः। अनुवचनादिष्वध्वर्युसंप्रैषः आकांक्षणीयः। अध्वर्युग्रहण
मध्वर्युपुरुषाणामपि प्रदर्शनार्थं। अत एवाध्वर्युतः इत्युक्तवान्नाध्वर्योरिति। नित्यवचनं नित्यस्त्वेन
एव प्रैषआकांक्षणीयो नानित्य इत्येवमर्थं। तेन पशुसूक्तवाकप्रैषादौ नियमेन प्रैषआकांक्षणी

श्रौ॰ सू॰
१४८

यः। उन्नीयमानेभ्योन्वाहाग्नावर्द्रलसाविदेवमिहोपयातेत्यनुसवनं। उन्नीयमानेभ्य इति वचनं चमसे
भ्य उन्नीयमानेभ्यः सोमेभ्य इत्यर्थः। अनुसवनं सवने सवने एतेषामेकैकं सूक्तमनुब्रूयादित्यर्थः। होता
प्रातः यक्षदिंद्रं प्रातः सवनस्य होता यक्षदिंद्रं माध्यंदिनस्य सवनस्य होता यक्षदिंद्रं तृतीयस्य सवनस्येति प्रे
षितः प्रेषितो होतानुसवनं प्रस्थितयाज्याभिर्यजति। एतैस्त्रिभिः प्रैषैर्यथालिंगमेव प्रेषितो होतानु
सवनं स्वाभिः प्रस्थितयाज्याभिर्यजति। होतृग्रहणं हेतुरेव प्रैषेण प्रेषणं नान्येषामित्येवमर्थं। अनुस
वनं सवने सवने प्रैषेण प्रेषितो होतैव यजेदित्यर्थः। नामादेशमितरे। इतरे प्रशास्त्रा[illegible]यो नामादेशं प्रेषि
ता यजेयुः न होता। तेन यद्यप्यध्वर्यवो होतर्यजेति प्रेष्यति। तथाप्यत्र प्रशास्त्रैव यजेत् नामादेशमिति ना
मादिश्यादिश्येत्यर्थः। इतरेषां क्रमस्वरूपमाह। प्रशास्ता ब्राह्मणाच्छंसी पोता नेष्टाग्नीध्रः। अच्छावाक
श्च। सूत्रभेदकरणं तस्यैवोत्तरसूत्रे विशेषविध्यर्थं। उत्तरयोः सवनयोः पुनाग्नीधात्। इदं ते सोम्यं मधुमि
त्वं वय हवाम ह इंद्र त्वा वृषभं वयं मरुत्वो यस्य हि क्षये ग्ने पत्नीरिहा वह होतः सान्नायवत्सान्नायेति प्रा नाम
तः सवनिकः प्रस्थितयाज्याः॥ पुनः प्रस्थितयाज्यावचनं प्रशास्त्रादिसंबंधिनी नामपितरौशाप्याय १४८

पार्थं। अच्छावाकस्यात्रनोच्यते प्रातर्यावभिरागतमिति यजतीति स्वावसरे वक्ष्यते। पिबा सोममभिय
मुग्र तर्द इति तिस्रो वा उ हि सोमकामं त्वाहुः स्तवायं सोमसुत्वमेह्यर्वाडिंद्राय सोमाः प्रदिवो विदाना
आपूर्णो अस्य कलशः स्वाहेति माध्यंदिन्यः। इंद्र ऋभुभिर्वाजवद्भिः समुक्षितमिंद्रावरुणा सुतपाविमं
सुतमिंद्रश्च सोमं पिबतं बृहस्पत आ वो वहंतु सप्तयो रघुष्यदो मेवनः सुदवा आहि गंतनेंद्राविष्णू
पिबतं मध्वो अस्य सोमस्य मद्दे ते जातवेदस इति नात्र यज्ञसवनिक्यः। सो[redacted]मस्याग्ने वीहीत्यनुवषट्कारः। अयमनुवषट्कारः कर्तव्यः। अनुवषट्कारस्य प्रवृत्तिवि
षयमाह। प्रस्थितयाज्यासु ग्रावस्त्रयाज्यासु मन्दत्वनीये हारियोजने महिष्मि। आश्विने च तेषां कर्म। सू
त्रभेदकरणं वैषम्यख्यापनार्थं वैषम्यं च शास्त्राते क्रियमाणापि शास्त्रयाज्या न भवतीत्येवमर्थं। तेनाया
ज्यमाश्विनमित्यवगतं भवति। तदेषाभियज्ञगाथा गीयते। ऋतुयाजांहि देवत्यान्यश्च पोतीवतो ग्रहः।
आदित्यग्रहः सावित्रो तान्समानुवषट्कुर्यादिति। एतद्यज्ञगाथात्मको वेदो यष्टौ बह्वृचशास्ति गाथाशब्देन ब्रा
ह्मणगता मन्त्रव्यंते। यज्ञार्था गाथा यज्ञगाथा सैषा तदनुवषट्कारविधानं प्रत्युच्यात इत्यर्थः। कोदिह

यसंकीर्तनं सानुवषट्कारार्थम् अनुवषट्कारश्चैतावत एवेति ज्ञापनार्थं। प्रतिवषट्कारं भक्षणं। प्रति
वषट्कारं भक्षणे प्रयत्नं कुर्यात्। नात्र भक्षो विधीयते ऽन्यत्र विहितत्वात्तेन वचनात्तदेवा विहिते भक्षे त
स्यावृत्तिमात्रमत्र गुणो विधीयते। यत्र द्विर्वषट्कारोस्ति तत्र भक्षोपि द्विरावर्तते। यत्र तु सकृदेव वषट्क
रोति तत्र तु सकृदेवेति सिद्धं। न त्वी सुत्तरं। उत्तरं प्राशनं तूष्णीमेव कर्तव्यं। वषट्कारप्रसंगादत्रैवेदमुक्तं। ह्वय
एत्य ध्वर्युः। आहवनीयप्रदेशात्सद आगच्छतीत्यर्थः। अयाळग्नीदिति पृच्छति। आगच्छं तु मध्वर्युं होता पृच्छ
तीत्यर्थः। अयाळिति प्रत्याह। प्रत्याहाध्वर्युरित्यर्थः। सन्नद्धमकर्मणिः सोमस्य पायिष्यतीति होता जपति॥
होतृग्रहणमध्वर्य्वधिकारात्॥ १॥ ऐन्द्रवायवमुत्तरेर्धगृहीत्वाध्वर्यवे प्रणामयेद्देववसुः पुरुवसुर्मयिव रिहवसुःपुरु
सुः पुरुवसुर्गसिवावाचं मेपाह्युपहूता वाक्सह प्राणेनोपमांवाक्सह प्राणेन ह्वयतामुपहूता ऋषयो वसु
दैव्यासस्तनूपावानस्तन्वस्तपोजा उपमामृषयो दैव्यासो ह्वयंतां तनूपावानस्तन्वस्तपोजा इति। उ
त्तरेपात्रे सव्येनाविधायैन्द्रवायवं दक्षिणेन हस्तेनोत्तरे भागे गृहीत्वाध्वर्यवे विग्रहणाय प्रणामयेत् तत ए नाम
व वसुरिति मन्त्रेण। अध्वर्युरुपह्वयस्वेत्युक्तः कावधाय नासिकाभ्यां वाम्देवी सामस्यव्यालिति भक्षये १४९

[illegible]सवत्रि। अत्रोपहवविधानं क्रमार्थं। उत्तरत्र विहितत्वात्। नासिकाभ्यामिति वचनं नासिकाद्वयेन
वघ्राणे नियमेन कर्त्तव्यं। तेनान्यत्रेन्द्रियकार्यमनियमेन कर्तव्यं। एकेन द्वाभ्यां चेति सिद्धं। सर्वत्रेति व
चनमन्यत्राप्ययमेव सोमभक्षणमंत्रः स्यादित्येवमर्थं। प्रतिभक्षितं होतृचमसे किंचिदवनीयाना
चम्योपह्वानादि पुनः संभक्षयित्वा न सोमेनोच्छिष्टा भवंतीत्युक्तत्वादाहरेति शेषं होतृचमसमानी
यात्सृजेत्। होत्राभक्षितमध्वर्युणाच भक्षितं होतृचमसे किंचिदासिच्यानाचम्यैवोपह्वानादि पुनः सद
भक्षयित्वा शेषं होतृचमसमानीय तत्पात्रमुत्सृजेत्। न प्रागुत्सृजेदित्यर्थः। पुनर्भक्षे प्रतिप्रस्था
तापुपह्वयाचनं कर्त्तव्यं। अस्य सूत्रस्य मध्ये भक्षपानिमित्ताच्छेवित्वनिर्दशनाय प्रसक्तमाचमनम
कृत्वोपहवादिकर्त्तव्यमित्युक्तं। अनाचम्योपह्वानादीति। सोयमाचमनप्रतिषेधः सोमभक्षणेऽशु
चित्वाभावादुक्त इति तदुपपादनार्थं तत्सूत्रमध्याएव न सोमेनोच्छिष्टा भवंतीत्युक्तादृशीत्युक्तवान्नाचा
र्यः। उदाहरंतीति वचनादिदमपि स्मृतिवचनमिति दर्शयति। सोमेनेति सोमभक्षणेनेत्यर्थः। तेनान्य
द्रव्यभक्षणेनाशुचित्वमेवेति गम्यते। सोमाधिकारे पुनः सोमग्रहणं सर्वसोमभक्षणप्रापणार्थं। ए

वसुत्तरे। एवमुत्तरैरपि ग्रहपात्रे भक्षयेत्। तत्र विशेषमाह। न त्वेनयोः पुनर्न्नसः। अनयोरपि प्राति
प्रस्थात् पृथुपदवयासनमस्ति। न किंचन द्विदेवत्यानामनवनीतमवस्रजेत्। द्विदेवत्यानां मध्ये कृचन
ग्रहं होतृचमसे अनवनीतं नोत्सृजेदित्यर्थः। मैत्रावरुणमेष वसुर्विदद्वसुरिद वसुर्विदद्वसुर्मयि व
सुर्विदद्वसु चक्षुष्पाश्चक्षुर्मे पाह्युपहूतं चक्षुः सह मनसोप मां चक्षुः सह मनसा ह्वयतामुपहूता ऋ
षयो दैव्यासस्तनूपावानस्तन्वस्तपोजा उप माम् ऋषयो दैव्यासो ह्वयन्तां तनूपावानस्तन्वस्तपोजा इ
ति। अध्वर्यवे प्रणामयेदिति शेषः। असौ मैत्रावरुणो वेद्यां दक्षिणेनाग्रे। पश्चात् सव्येनेत्यर्थः। सव्येन पाणिना हो
तृचमसमाददीतेत्युवसूनां पतिर्विश्वेषां देवानां समिदिति। मैत्रावरुणपात्रोत्सर्गोत्तरं कर्मकृत्वा दक्षिणे
नाग्निनमपिधाय सव्येन पाणिना होतृचमसमाददीत मन्त्रेण पाणिग्रहणम् अपिधानमपि पाणि
नैव काञ्चनवत्यांगुलिमुक्तेन कुर्यान्नान्याङ्गुलिभिरेवेत्येवमर्थं। तस्यारत्निनातस्योनो वसिनमपोह्य
का तस्मिन्नादयित्वोच्चावतीभिरङ्गुलीभिरपिदध्यात्। तस्येति सव्यस्येत्यर्थः। कुरोरिति वचनमूर्ध्वरेकदे
शस्य यावत्प्रयोजनमपोह्यानं न सर्वस्येत्येवमर्थं। अपिधानमपि सव्येनाधिकृतत्वादन्यस्यान्यत्र

व्यापृतत्वात्। आग्नीध्रेनं यथाहृतं परिहृत्य पुनः सादयित्वाध्वर्यवे प्रणामयेदेष वसुः संयद्वसुरिद वसुः संय
द्वसुर्मयि वसुः संयद्वसुः श्रोत्रपाश्श्रोत्रं मे पाह्युपहूतं श्रोत्रं सहात्मनोप मां श्रोत्रं सहात्मना ह्वयतामुप
हूता ऋषयो दैव्यासस्तनूपावानस्तन्वस्तपोजा उप माम् ऋषयो दैव्यासो ह्वयन्तां तनूपावानस्तन्वस्त
पोजा इति। होतृचमसं सव्येनापिधाय ततो दक्षिणेनाग्निनं गृहीत्वा ततः प्रणामादि कुर्यात्। कर्णाभ्यां
ति होपोपद्धे दक्षिणायाग्रे निधाय होतृचमसं स्पृष्ट्वोदकमिळामुपह्वयते। आग्नीध्रमुत्सृज्य ततो णिने दक्षि
सव्यपाणिना होतृचमसं निधाय स्पृष्ट्वोदकमिळामुपह्वयते। उपोह्यैव ते चमसान्। इळोपह्वानकाले चम
सिनः स्वं स्वं चमसमभिव्यासमीपे तद्धर्षंति चमसाध्वर्यवो वा। अवान्तरेळां प्राशयाच्यम्य होतृचमसं भक्ष
येदध्वर्यउप ह्वयस्वेत्युक्त्वा। अवान्तरेळाप्राशनविधानमत्र क्रमार्थं। आचमनविधानं नियमार्थं। इळो
पह्वानानन्तरमवान्तरेळाप्राशनमेव कुर्वीत चमसमेव भक्षयेदिति। तेन इदानीमिळाभक्षणं नास्तीति ज्ञा
यते। इदमप्यनेन ज्ञायते प्रकृताववान्तरेळाप्राशनमिळाप्राशनं च कृत्वा पश्चाच्छोधार्थमाचमनं भव
ति न तयोर्मध्ये पीतिं। अध्वर्यउप ह्वयस्वेत्युक्त्वा भक्षयेदित्यनेन वचनेनात्र वक्तारो। सविता जग

वता सूत्रकारेण। तत्रायं कौ मेऽर्थः। नानुपहूतेन सोमः पातव्यः। न वै सोमपीथेन द्व्यर्धकोऽभवतीति श्रुति
वचनादुपहूतेनैव सोमो भक्षयितव्य इति। अयमपरोऽर्थः। कर्मनामधेयेन संबध्यते नोपह्वयस्वेत्येवमेते
नवाक्येनेति। अयमप्यपरोऽर्थः। यत्र कश्च सोमेव च इकारेण वा समाख्यया वा भक्ष्यमाणो होमाभि
षवनिमित्तेन भक्षणेनैकस्मिन्पात्रे प्रति भक्षितायाः सह भक्षो नास्ति तत्राध्वर्यो देवो पहवयाचनमि
ति। अयं वापरो भक्षणमपि कर्तव्यमिति। एतदुक्तं भवति। अवांतरेडां प्राश्य इडा भक्षणमकृत्वाव
न्य होतास्त्वचमसं भक्षयेदध्वर्युमुपहवमिष्ट्वा वाग्देवी यानेन मंत्रेणेति। दीक्षितो दीक्षितादुपह्वयधां दी
क्षितश्चेद्धोता तदा दीक्षिता उपह्वयधमिकरुक्त्वा स्वचमसं भक्षयेत्। यजमाना इतिवा। दीक्षितश्चत्तु
वर्त्तते। यजमाना उपह्वयधमित्युक्त्वा भक्षयेत्। मुख्यान्या[illegible] यग्घात्रकाउपह्वयधमितीतरान्।
एवं चोपहवयाचनं दीक्षितस्य। मुख्यानध्वर्यादीनध्वर्यउपह्वयस्वब्रह्मन्नुपह्वयस्वउद्गातरुपह्वयस्वे
ति पृथक्पृथगुक्त्वा अमुख्यान्सर्वान्सकृदेव होत्रका उपह्वयधमित्येवमर्थः। एवमितरे। अदीक्षितो दीक्षित
श्च होता यथोक्तमुपहवयाचनं कृत्वा स्वंचमसं भक्षयेदित्युक्तं। एवं दीक्षिता अदीक्षिताश्च मैत्रावरुणा

दयः स्वंस्वंचमसं भक्षयेयुः। तेनैवोपहवयाचनप्रकारेण दीक्षितानामयमेवोपहवयाचनप्रकारः स
र्वत्रेति भक्षिणि [illegible]समतिवादी दीक्षितानां कश्चिद्विशेषोऽस्तीत्याह। यथासभर्सवदीक्षिताः। योयस्य
स भक्षः स यथा सुभक्षः। समक्षो नाम समानभक्षः। एतदुक्तं भवति। एकस्मिन्काले एकस्मिन्पात्रे ययो
र्भक्षित उत्पद्यते तयोरन्यतरोऽन्यतरं प्रति सभक्ष इत्युच्यते। स एव होमाभिषवकर्ता। वषट्कर्तारं प्रति स
भक्षः। इत्यर्थः। तत्रैवं भक्षयति तत्रतमेवोपह्वय भक्षयेन्नाध्वर्युमिति। अदीक्षितानामेवायमपवा
दः। दीक्षितानां तु मुख्यहेतुश्चमसेषु च दीक्षिता उपह्वयधमित्यादयस्त्र यएव प्रकाराः नान्यः कश्चिदपीति।
मुख्यचमसादन्यमसाः। होता स्वंचमसं भक्षयेदित्युक्त्वा एवमितरदित्युक्तं। तेन होतुरन्येषां सर्वेषां भ
क्षणांविदितमिति मन्यमाना श्चमसिनश्चमसेभ्यो भक्षयंति। अवसानं पुनः प्रत्यासत्त्या स्ववर्गस्य
मुख्यस्य द्वितीयस्य हती यस्य वा मनोंतरतमस्य चमसव तश्चमसान्भक्षयेयुः। यस्य पुनर्होमाभि
षवनिमित्तं भक्षणमस्ति तस्य तदेव भवति। इतरेषां मुख्यस्य चमसादिति ये मन्यंते तेषां श्रौतिम
पक्षं तु सुरपि पूर्वपक्षेऽनुष्ठानं निर्वाहं वर्णितवानाचार्य। एवं प्रकारेणैवं न्यायोऽनुसर्तव्य इति प्रदर्श

त्र सस्य हि निमित्तं वषट्कारो होमाभिषवौ चमसिता च। अचमसानां तु तेषां निमित्तानामन्यतमदपि नास्ति। अतस्तेषामत्र

श्रौ॰ सू॰
१५२ यितुं। मुख्यत्वाद्धोत्रापेक्षिको ग्रहः॥ मत्वा सत्याभुगुण्यादिनं भक्षं भक्षयति। द्रोणकलशाद्वा। वाशाभृप
क्षं यावर्तयिति। नाचमसानां सोमभक्षणमस्ति विधानाभावात्। सोमभक्षो नास्तीति सिद्धं द्रोणक
लशात्तु भक्षणमस्ति गुचनाद्यथा चमसमन्यांश्चमसांश्चमसिनो भक्षयंति अथैतस्य हारियोजन
स्य सर्वे एवलिप्संत इति श्रुतिवचनात्तेन द्रोणकलशो हारियोजनशेषस्य चमसिभिरचमसैश्च भक्ष
णं विहितं। तदनेनप्राप्तं भक्षणमयं सूत्रकारोव प्राणभक्षरूपेण विधास्यति। तदेवं वा रूपमेवानेनोच्यते
न भक्षांतरमित्यवगंतव्यं। उक्तः सोमभक्षजपः सर्वत्र॥ यत उक्तः सोमभक्षणमंत्रो गोम्द्देवीतिसर्व
त्र सोमभक्षेन्नवतिनं द्रव्यांतरभक्षे एवं सर्वत्रग्रहणं हि देवत्येष्वेव चरितार्थमिति पुनस्तद्विधीय
ते चमसानां भक्षणमुक्तात्तत्प्रसंगेन सर्वत्र सोमभक्षस्य निमित्तमुक्तं द्रावादि चमसभक्षयिल
विचार्य वाजेन दर्शयितुमाचार्योऽतिरमतात्युपन्यस्यतिस्म। होतुर्वषट्कारे चमसाद्भक्षयं तत उद्गातु
श्चलगायजमानस्य तेषां होताग्रे भक्षयेदिति गौतमो भक्षस्य वषट्कारान्वयात्। सोमभक्षणे त्री राम १५२
णि निमित्तानि श्रौतोनिदिष्टानि। वषट्कर्तुः प्रथमभक्ष इति प्राथम्यविशिष्टं भक्षणं वषट्कार

निमित्तं विदधाति। अभिषुत्य हुत्वा भक्षयंतीति होमाभिषवनिमित्तं विदधाति। होतृचमसद
त्यादि समाख्याबलात्साऽपि समाख्या भक्षणे निमित्तमिति गम्यते। तत्र होमाभिषवौ वषट्कारे
ये पुनस्तद्वतितं निमित्तस्य भक्षस्यात्र विचारो न कृतः। तत्र वषट्कारनिमित्तं समाख्यानिमि
त्तं च भक्षणं विहितमेवास्तीति मन्यमानो गौतमस्तेषां होताग्रे भक्षयेदित्युक्तवान् अग्रवचनसा
मर्थ्यादुद्गात्रादयोऽपि पश्चाद्भक्षयेयुरिति अस्याभिप्रायो गम्यत एव। होतृग्रहणं शास्त्रिणां चवु
र्णामपि प्रदर्शनार्थं उद्गात्रादिचमसग्रहणं च सर्वचमसानां प्रदर्शनार्थं। उद्गात्रादिचमसग्रहणं
च सर्वचमसानां प्रदर्शनार्थं। तथाहि सर्वे चमसाः शास्त्रिणां वषट्कारे हूयमाना दृश्यंते किंते
षो नास्ति ४ षां चयाणां विशेषोक्तिः सर्वदा परवषट्कारेषु हूयंत इति। भक्षस्य वषट्कारान्वयत्वादिति वषट्का
रनिमित्तत्वादित्यर्थः। एवं गौतमेनोक्ते समाख्यया भक्षो न विधातुं शक्यते इति मन्यमानस्तोऽन्वलि
त्वाह। अभक्षणामितरेषामिति तोऽन्वलिः कृतार्थत्वात्॥ वषट्कर्ता भक्षणेन च शेषस्य प्रतिपत्त्यंतरान्वेष
णे नैरपेक्ष्यं भवतीति कृतार्थत्वादित्युक्तं। यद्यपि समाख्यापि भक्षस्य विधायिका स्यात्तदा तस्मिन्कृते

श्रौ॰वृ॰
१५३ प्रकृतार्थमिवावतिष्ठते साक्षान्न विधायिकानामधेयतयापि नादृष्टानामेव पदानां समन्वयदर्शनादि
ति। एवमुक्ते गाणगारिर्गौतमपक्षमेव समर्थयितुमाह। भक्षयेयुरिति गाणगारिरतः संस्कारत्वात्का
वतच्चमसतास्यात्स्वाम्यः संबंधः॥ उद्गात्रादयोपि भक्षयेयुः वषट्कारनिमित्तभक्षणेन संस्कृतानामपि चो
षाणां समाख्यासमाख्यानरूपात्तदपि संस्कारत्वात् वचनेसति संस्कृतानामपि संस्कारस्य संभवोस्ती
त्यर्थः। ये तत्संस्कारत्वादितिपठंति तेषामयमर्थः। योयं समाख्यानशात्संस्कारः स वषट्कारभक्ष
संस्कारेण न भवतीति तेनान्यत्वादित्यर्थः। अन्यत्वे चाविरोधात्समुच्चय एवेत्यर्थः। ननु समाख्यानलक्षणां
विदधातीत्यत्र कं। सत्यं स्वरूपेणानविदधाति कार्यतस्तु विदधात्येव। कथं ज्योतिष्टोमाधिकारनियो
गः स्वप्रकरणादधीतसकलपदोपाधितपदार्थावच्छिन्नः प्रतीयमानः कार्यात्मकत्वादात्मनः स्वाव-
च्छेदकभूतानपि कार्यतयावगमयन्नहोतृचमसपदाभिहितान्संबंधविशेषानपि कार्यतयावगमय
तीत्येवं। सचसंबंधविशेषो होतान्निभक्षमतीति होतृचमसइति एवमुक्तान्यः स्वस्वाम्यादिलक्ष राम
णोत्र न संभवति। एवमप्यर्थं सूत्रकारः स्वविवरान्। कावतच्चमसतास्यात्स्वाम्यः संबंधइतिव १५३

दन्तायदा चमसिनां चमसेषु वषट्कारनिमित्तं समाख्यानिमित्तं च भक्षद्वयमागच्छति सर्ववष
ट्कारोद्भक्षयितारो मामिषवभक्षणं चकृते तत्र समाख्यातो भक्षयेत् यजुः पुनः प्रतिभक्षयितानास्ति
तत्रोनोभक्ष्योतत्रैष सिध्यतः। वषट्कारनिमित्ते भक्षे सानु वषट्कारेषु सर्वत्रैहिन्चिरस्त्येवाभक्षयि.
त्वापामसोममस्ताअनूमशंनोभवहृदआपीतइंद्विति मुखहृदये अभिमृशेरन्। भक्षणानंतरमेता र
भ्यामृग्भ्यां मुखहृदये अभिमृशेरन्। अद्भिर्यथासंख्यं अनयोराप्यायनं दर्शयिष्यति। प्रतिप्रदायग्रे
णां कलशमात्मानमाप्याय्येति। आप्यायनत्वे चाद्भिः संमार्जनं भवत्येवेति। आप्यायस्व समेतु ते सं ते पयांसि
ना सभुर्यवुवाज्जाइति चमसोद्योपाद्यानर्वयोः सवनयोः। स्वं स्वं चमसं द्वाभ्यां ऋग्भ्यां मद्भिरभिमृशेरन्सद
र्वयोः सवनयोराद्यान्द्वितीयांश्च चमसान्। आद्यांस्तृतीयसवने। तृतीयसवनेआद्यानेव चमसानभि
मृशेरन्। एतदप्याप्यायनं चमसमाप्यायय यत्स्वनिरूपाभ्यामिति फलं चमसे कृतो दर्शनात्। सर्वत्रात्मा
नमन्यत्रैकपात्रेभ्यः। एकपात्राण्यूर्ध्वपात्राणि तानि वर्जयित्वा सर्वत्रात्मानमाप्याययेयुः। आत्मशब्देनात्र
मुखहृदये उच्यते। आप्यायितांश्चमसान्सादयंति। तेनारात्रौ सादयंति। नाराशंसस्संज्ञा भवतीत्यर्थः। अन्व

र्वसिंङ्ग्नेयंनाराशंसानां। त्वयपितृगणाञ्जमावोर्वाः काया श्चेति तिस्त्रानुसवनं यथासंख्ये नाप्यायितानां
चमसानां देवतानुवंति। इति नाराशंसाश्चमसा भवंतीति॥६॥ एतस्मिन्काले प्रपद्याछावाक उत्तरेणाग्नीध्री
यं परिव्रज्य पूर्वेणासद आत्मनो धिष्ण्य देशमुपविशेत्॥ अछावाकस्य कर्मकालत्वादेतस्मिन्कर्मकाले प्र
पदनेसिद्धे कालोपदेशोऽछावाकः कर्मकाल एव प्रपद्येतेत्येवमर्थः तेनान्यकर्मकाले प्रागेव प्रातरनुवाक
काले प्रपद्येरन्निति सिद्धं भवति। प्रपद्येतिवचनं यजमानेन नान्यथा वा प्रपन्नोऽप्यछावाकीयकाले तस्मि
न्काले नियमेन प्रपद्येतेत्येवमर्थं। स्वस्य धिष्ण्यस्य पुरस्तादद्दूरे सदसो बहिरुपविशेत्॥ पुरोळाशा इ
ग्ळं प्रत्तमिळामिवोपह्व्याछावाक वदस्वेत्युक्तोऽछावाको अग्निमवसरतिह्वचमन्वाह। इगाळ शंकळ
मित्यर्थः। प्रत्तमध्वर्युणा इळामिवोपह्व्यास्यसंमितं प्राप्य संमितं वेत्यर्थः। संप्रैषपाठः स्वशास्त्रचोदन
या संप्रैषस्यासंवादे सत्यप्यनुवचनसिध्यर्थं। अंत्येन प्रणवेनोपसंतनुयाद्यजमानहोतरध्वर्यो ग्ना
द्व्यग्नी पोतर्नेष्टरुतोपवक्तरिषेषयध्वमूर्जोर्जयुधं निवो जामयो जिहतान्यजामयो निः सपत्नायां राम
मनि बाधिता सोजयतान्नीतवं जयतान्नी त्वयाश्विवद्धइद्रः श्रृणवद्धो अग्निः प्रस्थाय इन्द्राग्निभ्यां १५४

सोमं वोचतोपो अस्मान्ब्राह्मणान्ब्राह्मणा ह्वयध्वमिति। अंत्येन प्रणवेनेति एतावतैव प्रणवेन निगदस्य
संतानेसिद्धे उपसंतनुयादिति वचनं कृत्स्नस्यास्य निगदस्यानवानत्वसिध्यर्थं। समाप्ते स्मिन्निगदे
अध्वर्युर्होतरित्युपह्वयं काङ्क्षते। एतदध्वर्योरुपह्वयाचनमछावाकार्थं। समाप्त इति वचनमुपह्वयाचनका
लविधानार्थं। अस्मिन्निति वचनमुत्तरोऽपि निगद एव न कृत्स्न उपह्ववमंत्र इत्येतद्दर्शयितुं। तेन प्रत्ये
तेत्यादिरुपह्वताइत्यंतो निगद एव उपह्वत इत्येतावानेवोपह्ववमंत्र इति वेदितव्यः। प्रत्येता सुन्वन्ये
जमानः सकावामाग्नीत्। उत प्रतिष्ठोत्तोपवक्तारुतनोगावउपह्वताउपह्वतइत्युक्त उपह्वयते। उ
पह्वता इत्युक्ते स्थाने उपह्वत इत्युक्ते उपह्वयत इति मध्ये अध्याहारः कर्त्तव्यः। उपह्वत इत्येष एव प्रकृत उपह्ववमंत्रः सर्वत्र
चायमेव प्रकृत उपह्ववमंत्रः। अपेक्षितत्वादन्यस्य वानाम्नानात्। उपह्वतः प्रत्यस्मा इन्द्रः कम्नीयमानायाच्छ
छ प्रातर्यावभिरागतमिति यजति। उपह्वत इति वचनमछावाकस्य ग्रहार्थं तेनोन्नीयमानायच्चमसा
य प्रत्यस्मा इत्येतस्य कर्मणोऽछाके बोएवानुब्रूयात्। ततः प्रातर्यावभिरित्यनया यजति एषास्य प्रस्थित
याज्या। निधाय पुरोळाशादिगामसंस्पृश्योद्कैवमसं भक्षयेत्। निधायेतिवचनादेतावंतं कालं इगाळ

मुख्यम्येवासीत। नास्पृष्टोदकाः सोमेनेतराणि हवींष्यालभेरन्। सोमेनेति सोमेन [illegible] संसृष्टाः का
इत्यर्थः। तेन सोमं स्पृष्टवतः उदकोपस्पर्शनमकृत्वेतराणि पुरोळाशादीनि हवींषि नालभेरन्।
पुरोळाशांस्पृष्टवतः सोमस्पर्शने उदकोपस्पर्शनं विधाय तदुपपादनाय वक्ष्ये सति विपरी
तमुक्तं। तस्यायमभिप्रायः। यथा स्पृष्टसोमस्य हविरंतरालंभनेनोदकोपस्पर्शनं तथास्पृष्टपुरोडा
शादिकस्यैव सोमस्पर्शने उत्क्रमयथाप्रिनवतीति। न केवलमिदं तत्स्पर्शनेर्व तद्दस्मात्रस्पर्शनेऽपि
भवति। निधाय दोहचमसं संस्पृष्टोदकमिति चमसस्पर्शने विधानं वा। आदायेनद्वादित्यप्रभृतीं
धिष्ण्यान्नुपस्थाय। परया द्वारा सदः प्रसृप्य पश्चात्स्वस्य धिष्ण्यस्योपविश्य प्राश्नीयात्। एतद्दुगळमा
दापतद्दस्त एव धिष्ण्योपस्थानादियोऽयचेत्येव मंतं कलात्तत्रस्थ एव तत्प्राश्नीयात्। उपविश्य प्राश्नी
यादिति उपविश्य जपित्वा प्राश्नीयादित्यर्थः। अपरया द्वारा प्रसर्पणविधानात् ह्यायाजिमवनिवर्त राम
स्यामेव सदः प्रसर्पणे कृते स्वस्यैव धिष्ण्यस्य पश्चादुपवेशनेन सिद्धे यत्स्वाख्यस्य धिष्ण्यस्योपवे १५५
शनं विदधाति तत्तत्रैव हुतशेषप्राशनार्थं तत्रैवोपविश्य हुतशेषं प्राश्नीयात् न बहिर्निष्क्रमेति। इमव

म्यबर्हिर्वेद्याग्नीध्रीयं प्राप्नोति। अच्छावाकस्य हुतशेषं प्राश्यतीर्थेन निष्क्र

मेवार्थं शास्त्रांतरे चोद्योत्तरभंग्यास्फुतिरेव साधयति। तदाह कुर्यदन्यत्र त्विडोऽन्तःसदसि सोमं
प्राश्नंति। अथ कस्मादच्छावाको बहिःसदसि आश्नातीति। यद्वै वेतदंतःसदसि पुरोडाशाद्धुतं
प्राश्नाति तेनास्यांतःसदसि सोमः प्राशितो भवतीति। उपविष्टे अच्छावाके आग्नीध्रीयं प्राप्य हविःशेषं
सर्वे प्राश्नीयुः प्रागेवेतरे गता भवंति। यदाच्छावाक उपविष्टस्तदाच्छावातीर्थेन निष्क्रम्यान्यत्तं देशं
प्राप्नुयात्। इतरे होत्रादयोऽप्यनुपविष्ट एवाच्छावाके तं देशं प्राप्तान्नेयुः। एते सर्वे संहतास्तस्मिन्देशे हु
विःशेषं प्राश्नीयुः। सर्वग्रहणं पौर्णमासिकहविर्निवृत्त्यर्थं। आग्नीध्रीयं प्राप्येति वचनं प्राशनस्य बहि
र्वेदिदेशे सिद्धे आग्नीध्रीयमंडपबहिर्वेदिदेशप्रापणार्थं। तत्राधर्मेतरे द्युर्ध्वं बहिर्वेदि भवति। हविरु
च्छिष्टं चाद्ये नचात्र धानादीनां शेषभिक्षा पात्रस्थमन्यदप्युच्यते। आश्यप्रति प्रस्थाप्य॥ ७॥ अनुयाजैश्च
५३ रंति। प्राशाने कृते प्राचयवचनमन्यदप्यस्मिन्नेव काले सुनिष्ट्यर्थं भोजनादि कुर्यात्। नप्राशितेव मर्थं प्रति
प्रस्थाप्य वचनं सर्वेषु प्रतिप्रस्थेष्वनुयाजचरणार्थं तेषां प्रैषः। तेषामनुयाजसंज्ञानां यागानां प्रैषा
अपि न भवंति। पंचमं प्रैषसूक्तं। प्रैषसमाम्नाये यत्पंचमं प्रैषसूक्तं तदेषां प्रैषा भवंति। तेन तेनैव प्रेषितः प्र

श्रौ·वृ·
१५६

षितः स स यथा प्रैषं यजति। प्रैषास्त्वावत्स वै मैत्रावरुणेन वक्तव्याः। अस्मिंस्तु तंत्रे ऋतुयाजानां याज्या
य एतास्थ विधीयते। येन येन प्रैषेण यथा प्रैषं प्रेषितस्तेन तेनैव प्रैषेण स सर्व यजति। नान्यः तेनै
व साधितं भवति मैत्रावरुणस्य यष्टृत्वमपीति। होताध्वर्युगृहपतिभ्यां होतरेतद्यजेत्युक्तः। यजेदि
ति शेषः। होतरेतद्यजेत्येताभ्यामुक्तो होता यजेत। स्वयं पश्चेद्धा आहवनि। पाणिं केषु दर्विस्त्वयमेवाध
र्युगृहपतीयजतः। पश्चादुत्तरवेदेरुपविश्याध्वर्युः पश्चाद्गार्हपत्यस्य गृहपतिः। अध्वर्युर्यजमानश्च
निरसनं कृत्वा मंत्रवदेतयोः पश्चादुपविश्य यजतः। पश्चादिति प्रकृते पुनः पश्चादिति वचनं नित्येषामनु
कालः। पवेशनकालो सर्वथा यागकाल एव। उपवेशनं गृहपतेरित्येवमर्थं। अध्वर्यू यजतमिति हि लक्षके पि
संप्रैषेसु स्व एवाध्वर्युर्यजति नान्यः। अथ तद्दतुपात्रमानतर्पणाबषट्कुर्वन्निलक्षयन्ति। अथेति सर्वे
ष्वेवैष्वनंतरमित्यर्थः। अत्र होता वषट्कारः। पोतृनेष्टारौ द्विवषट्कारौ एकवषट्कारसंकेतौ। त
त्र सर्वेषिद्य भक्ष्यमाणे अनेकवषट्कारणामपि शेषाविनागाकृते काले स्याच्च सकृदेव भ राम
णं प्राप्नोतीतिवंति ऋतुपात्रमानं तर्पणे स्फकं। एतमध्वर्युः प्रतिमन्त्रयेत। अध्वर्युग्रहणं प्रतिप्रस्थाता १५६

७५ न

त्तुरपि प्रदर्शनार्थौ अत्रापि तंत्रशंकानिवृत्त्यर्थं पृथक्कमेव तत्र विधीयते। इतरत्वनूद्यते। स्विंश्चैवापद्
वः। तस्मिन्नेव प्रति प्रक्षयितर्युपदवक्ष्यन्भवति। अवधारणादीक्षितास्य पचयति भक्षयितारमेवोपहवं
याचेरंश्। नदीक्षितास्सर्वानिति। अन्यत्र दीक्षितादीक्षितान्सर्वानिव। प्राङ् धर्यावाष्टते सुमत्प ह
न्देपितामातरिश्वाच्छिद्रापदाधाच्छिद्रोक्था कवयः शंसत्र। सोमो विश्वविन्नीथानिनेषद्बृहस्प
तिरुक्थामदानि शंसिषद्वागायुर्विश्वायुर्विश्वमायुः क इदं शंसिष्यति स इदं शंसिष्यतीति जपित्वा
न जिंदिं कृत्य शोंसावोमित्यध्वेराह्वयत्। शंसंशंसेदुपांशु सप्रणवम् संतन्वन्। पराङिति समन्त्य
र्थ प्रथमामासां प्रयुक्ताच्छंदोवस्त्राणि भवतीति। ऋतुपात्रभक्षणानंतरमध्वर्युर्होतुर्मुखत्वासीनः
पराङावर्त्तेत एव तः करोतीत्यर्थः। तस्मिन्पराव्यावृत्ते होता सुमदिति जपित्वा जिंदि कारमकृत्वा
शोंसावोमित्यध्वेराह्वयत। शंसं शंसेदुपांशु सप्रणवम् संतन्वन्नध्वर्यावावृत्ते तद्रातिस्वकालो
पदेशार्थं। आव्हां गमयं जपः। जपित्वेति वचनं संबंधदर्शनात। औं जिंदि कृत्येति प्राप्तानि षि न२
ध्यते। शोंसावेति शंसावेत्यर्थः। स एव प्रणवांतः शोंसा वोमिति पठ्यते तेनाध्वर्युमाह्वयत

श्रौ० सू०
१५७

भिमुखी क्रियेत्यर्थः। अनेनाहूयेति वचनादस्य शस्त्रस्याहाव इति संज्ञा भवति। उच्चैर्वचनं मंद्रस्वरप्रा
प्त्यर्थं। शस्त्रीगतादाहावस्य शस्त्रस्य च मंद्रस्वरत्वादाहावानंतरवर्तिनः शस्त्रैकदेशस्योपांशुत्वात्
मुख्यानुग्रहन्यायेनोपांशुत्वाशंकायां प्रबलामनुग्रहः स्वरस्याश्रयितुं युक्त इति मंद्रस्वरसिध्यर्थमुच्चैरि
त्युक्तवानाचार्यः। यः पुनराहावः शस्त्रावयवस्तस्य स्तोत्रियादेरेवांगं स तस्यैव स्वरं भजते तेन निष्के
वल्येषु ब्राह्मणस्वरपक्षेऽप्याहावस्यापि स्वरविशेषः सिद्धो भवति। तूष्णींशंस इति नामधेयं। सप्रण
वं समानप्रणवं तूष्णींशंसे ये प्रणवास्ते पठिता अपि संवानार्थिकैर्लाक्षणिकैः समानाः स्युर्मा इत्यर्थः। च
असंतन्वन्नित्ययमप्राप्तप्रतिषेधः अन्तर्गतत्वात्परस्य वानत्वात्तेन ज्ञायते पठितोऽपि प्रणवः सं
तानार्थीय इति तेन शस्त्रादौ नाम्नाहावेनोत्तरैः संततो वक्तव्यः। अत्र तूष्णींशंसस्याहावस्य च स्वर
स्थानभेदात्प्राणसंततं भवति। एष आहावः प्रातःसवने शस्त्रादिषु पर्यायप्रभृतीनां च। सर्वत्र चांतः शस्त्र। याम
स्थस्थानेषु वेषनांतरेणाह्वाने विहिते शोंसावोमित्यनेनैव शब्देनाह्वानं कुर्यात्। नान्यैरिति नियम्यते। सूत्र १५७
त्रयेण शस्त्रादिषु प्राप्तिरेवाहूयेति वचनात्तु गोउक्तास्तोत्रियत्वात्प्रतिपत्वादाधिनेऽथांतःशस्त्रेऽपि
नेर

स्तोत्रियानुरूपानुचरं प्रगाथं धाय्यां तदनंतरवर्त्तिं परिधानीयां चाहूयैवेति माध्यंदिने तृतीयस
वने च पर्यायेभ्यः प्राक् शस्त्रादिषु वचनादध्याहावादि शाश्वोऽभिधीयते तेषु शस्त्रादिषु नयोर्विहितत्वात्
दादिभूतानां प्रतिपदादीनां तावेव भवत इति नाह्वानांतरं कल्प्यते। तेन चोपसंतानः। तेनाह्वानेनोत्त
रस्योपसंतानः कर्त्तव्यः। शस्त्रादानस्य च सर्वेणेति गम्यते। इदमंतःशस्त्रे विधानं असंतन्वन्नित्यप्राप्तसं
ताने प्राप्तवत्प्रतिषेधात् शस्त्रादिभूतेनाह्वानेनोत्तरस्य संतानमुक्तः। शस्त्रः स्वरः प्रतिगर ओथामोदैव
ति। शस्त्रस्य स्वर इव स्वरो यस्य स शास्त्रस्वरः। उत्तरपदलोपोऽत्र द्रष्टव्यः। शस्त्रस्वरस्वर इत्यर्थः। सु
वनस्वरस्याविधेयत्वादन्योऽपि योऽविशिष्टस्वरो विहितः शस्त्रस्य तस्य प्रापणार्थं वचनं। ओथामोदै
वेत्ययं प्रतिगरसंज्ञो भवति। शस्त्रस्वरश्च भवति। प्रतिगीर्यते अनेन शस्त्रमाय तेऽइति प्रतिगरः। वक्ष्यमाण
विशेषविशिष्टतया सकृदेव विधानं शाक्यपि सामान्यस्य पृथग्विधानं प्रतिगरशब्दव्यवहारेऽपि सामा
न्येनास्य ग्रहणार्थं। शोंसामोदैवेत्याहावे प्रतिगरो भवतीति विशेषः। यः पुनरयं प्रतिगरांतरो विधीयते तेन विधिमध्ये २
ज्ञापयति प्रतिगरांतरमध्यवर्त्तिन्याहावेऽयं नियम्यते तेन शस्त्रमध्य एव स्यात्। शस्त्रादावयं ब्राह्मणो

श्रौ॰ सू॰ १५८ कः शंसामोदैवोमितिवा॥ प्लुतादिःप्रणवेप्लुतादिरवसाने। व्यवहितस्येमौ विशेषविधी। अनंतरस्यप्र
णवावसानेरूपेणाविषयत्वेदासंभवात्। प्रणवेप्रणवआदावोत्तरे॥ प्लुतादेरयमपवादः आदावोत्तरेप्र
णवेप्रणवएवप्रतिगरोभवति। अवसानेवाप्रणवः प्रतिगरोभवतीतिविशेषः। शास्त्रांतेशास्त्रमध्येचाव
सानेप्ययंविधिर्भवति। प्रणवांतोवा॥ विषयद्वयेयंविकल्पः। यत्रयत्रवांतःशास्त्रप्रणवेनावस्यति
ग प्रणवांतएवतत्रप्रतिगरः। शास्त्रांतेतुपूर्वः। सर्वोक्तस्यप्रतिगरद्वयस्यविषयव्यवस्थापनमात्रमत्र
क्रियते। ननुयद्ययमर्थोविवक्षितःस्याच्चदेवंप्रणेतव्यंस्यात्। अवसानेचेत्यादिसर्वमिष्टत्वाच्छास्त्रांते
वांतःशास्त्रप्रणवांतइतिप्रणेतुंयुक्तं। सत्यमेवंप्रणेतुंयुक्तं। तथाचनप्रणीतवानाचार्यः। किंकुर्मः।
एवंसतिप्रणीतमनुसरामः। तत्रयदिसर्वस्मिन्नेवावसानेशब्दं समाप्तिवचनमभ्युपगम्यद्वा
भ्यांसूत्राभ्यांशास्त्रांतेविकल्पउक्तः। उत्तरेणांतःशास्त्रेप्रणवांतविधिरितिकल्प्येततदाशास्त्रां
तेतुप्रणवएवत्यतिरिच्यते। अस्यमतं। यत्रेत्यादिसूत्रेवस्यतिशब्दसंबंधात्कर्मचोदनायांहो राम
तारमितिहोतृविषयमिदंसूत्रं परिशेष्यात्सर्वोक्तविकल्पोहोतृकविषयइति। तदपिवोप १५८

पद्यते। अवस्यतीत्यत्रविधानाभावात्कर्मविधौसापरिभाषानकर्मानुवादइति। अतः
सर्वोक्तिरेवार्थः। यत्रयत्रेत्यादिप्रपंचोक्तिश्चैवमेवेतिसूचयति। अत्रसंक्षेपविस्ताररूपेणप्रपंचोक्ति
रेवाश्रितासूत्रकारेणेति। प्रतिगरस्यशास्त्रसमकालत्वादाह्वावस्यचाद्विवचनयुक्तत्वात्प्रतिगरशब्द
वाच्यत्वाच्चकर्त्रंतरमस्यान्वेषणीयं। तत्राध्वर्युरेवभवति। पराङावर्तेत्यस्यैवाधिकारात्सर्वत्राध्वर्युरे ध्व
वभवति। शंसामोदैवोमित्यध्वर्युःप्रतिगृणीतीतिदर्शनात्। शंसावाध्वर्योप्रतिमेगृणीहीतिचद
दर्शनात्सवनांतरेचअध्वर्योशोंसावोमित्यादिदर्शनात्। अत्राध्वर्युशब्दःप्रतिप्रस्थातुरपि
प्रदर्शनार्थः। ग्रहणामेतत्। किमित्याध्वर्यवमत्रविधीयते। शास्त्रांगत्वाच्छास्त्रस्यचऋग्वेदविहितत्वात्त
स्याप्यृग्वेदिकत्वमेवेति। अध्वर्युकर्तृकत्वंनुवचनात्। नसमाख्यातइतिसिद्धं। प्रतिगरस्वरूपमु
क्त्वात्राशास्त्रमेवानुसरति। भूरग्निर्ज्योतिर्ज्योतिरग्निः। इंद्रोज्योतिर्भुवोज्योतिरिंद्रः। सूर्योज्योतिर्ज्योतिःस्वः
सूर्यइतितित्रिपदमभूस्तीशंसः। यद्वावेषट्पदःप्रवैज्योतिःशास्त्ररूपेवस्येत्। त्रिपदःषट्पदोवायंशंस्त
व्यः। त्रिपदपक्षेयथापठितमेव। षट्पदपक्षेत्रीणित्रीणिवाक्यानिद्विधाकृत्वावाक्येत्त्रद्विधाकरणप्र

वसानस्थानं परवैज्योतिः शब्दैरग्रैवस्येदिति। उक्तैर्निविदं यथा निशां तमग्निर्देव इद्ध इति। उक्तैर्वचनमुपा
श्वाधिकारनिवृत्त्यर्थं। निविदिति निविदां नामधेयं यथा निशातं यथा पवितं पदे पदे वसायेत्यर्थः। एक
कत्यां तु शास्त्रवादे वशाग्नं नास्या आह्वानं। आह्वानं च निविदामित्यत्र पदसमाम्नायनिवृत्त्यर्थं निविद्ग्रहणं
कृतं। उत्तराधिकारस्य तत्रास्ति तत्र निविद्ग्रहणं पदसमाम्नायनिवृत्त्यर्थं क्रियमाणमुत्तराधिकारस्य लि
त्तयितुं शक्नोतीति शापस्यायमपवादः। न चोपसंतानः। अस्या निविदस्तु स्तोत्रं शंसिनः सलोपसंतानस्थकर्ने
र्तव्यः। तेनासंतन्वन्निति प्रतिषेधः। स्तोत्रशंसने तु परस्परमेव परवा प्रयोरिति। अत आह्वानेन स्तोत्रं शंसि
स्य संतानः स्त्रिद्वोनकृति। स तु स्वरविरोधात्प्राणसंतान इत्यर्थः। उत्तमेन पदेन प्रणवेदनायेत्याज्यमुपसं
तनुयात्। निविद उत्तमेन पदेन सह क्रमुपसंतनुयात्। अन्तस्थादिदं विधीयते। आज्यमिति सूक्तस्यैतत्स्थ
नापं नस्यनामक्रियते। रतेन निविद उत्तराः। अस्या निविदः शंसनप्रकारो यो विहितस्तेन सर्वा निविदः शं
स्तव्या इत्यर्थः। उत्तरवचनं सर्वा अपि निविदः सतीति ज्ञापनार्थं तेन [illegible] देवेद्ध इत्यादीनां चतुर्दशानां पदानां रामा
निविल्वं सिद्धं भवति। सर्वेच पद समाम्नायाः। अन्ये चैतत्र प्रथमपादयोः ये पदत्रा आम्नाता मंत्रास्ते निविद इदेव १५०

मन्त्रिद्२

अश्वमेधे तस्य विशेषान्वक्ष्याम इत्यस्मिन्नाने खंडे अग्निं तमन्य इति प्रवोदेवायाग्नय इत्यों ये इत्युक्ते ४

शंस्तव्याः। निविदामपि पदत्रा आम्नाने सत्यपि निविदां पृथग्ग्रहणानि विल्लुकृविलपदसमासोक्तीति ज्ञाप
नार्थं प्रेदं ब्रह्म प्रेदं क्षत्रमित्यादौ। उपसंतानेरलन्यत्र। अस्या निविदो ग्रासुनिविल्लुपदसमाम्नायेषु सर्वेणो
पसंतानश्च कर्त्तव्यः। आह्वानं च निविदां। निविद्ग्रहणं पदसमाम्नायनिवृत्त्यर्थं। आह्वानं चान्यासु निविल्लु भव
ति। आज्यायाः त्रिःशंसेदधर्चशो वियाद्ध। इदं त्रिर्वचनं शस्त्रादौ प्राप्तं सूक्तादौ तिर्यग्यते आज्यग्रहणं का
ण्डानिवृत्त्यर्थं। तेन यत्र ह्वे सूक्ते त्रीपि वा आज्यकार्ये विहितानि तत्राद्यस्यैवाद्यां त्रिःशंसेन्नोत्तरस्येत्येवमर्थं अ
र्द्धर्चश इत्युगावान पक्षेप्य धर्चसंतानं निरस्यार्थं। विशादं विगृह्येत्यर्थः। कवि आह। कथं वा विगृह्य इत्ये
– वं निदर्शनं निदर्शयितुमाह। तन्निदर्शयिष्यामः। प्रवोदेवायाग्नये बर्हिष्मनर्चास्मै। गमद्देवेभिरासनो यजिष्ठो ब
र्हिरासदो२मिति। विग्रहे प्राणसंतानः कार्यः सर्वस्मिन्ने वाद्धर्चे सविग्रहो भवति। अगावानं वैवमेव। एतेना
द्याः प्रति पदामन्त्रगावानं। प्रतिपदां या आद्या अस्य चस्ताए तेन प्रकारेण शंस्तव्याः प्रतिपद्वत्ले प्रतिपदामिति
बहुवचनं ज्योतिष्टोमाभ्यासस्सवनार्थं। तथा प्रथमयज्ञेनैकेधर्ममित्यत्र प्रथमत्राह स्तमेवार्थं सूचय
ति। तथा ज्ञारब्धांतरेस्य स्पष्टं वचनमस्ति। वसंते वसंते ज्योतिष्टोमेन यजेतेति तत्र वीप्सया अभ्यासोवगतः।

श्रौ०सू०
१६०

तदाश्रयोयं बहुवचनप्रयोगः। अन्यत्रचमसगणान वर्जनमिति प्रतिपत्त्यर्थं प्रतिपत्संज्ञितं तृचमेव गृह्णाति
नयोगिकं तेनाश्विनप्रउगयं धर्मो न भवति। अनुब्राह्मणं वानुप्रव्यं। ब्राह्मणोक्तस्य क्रमस्य कत्वर्थत्वात्समाम्नाय
सिद्धस्याक्रत्वर्थत्वात्समाम्नायसिद्धस्य प्रयोगो न प्राप्नोतीति तस्यापि विकल्पेन प्रयोगसिद्ध्यर्थमिदं सूत्रं। आ
हूयोत्तमया परिदधाति। उत्तमया परिधानीयाले सिद्धे सत्युत्तमावचनं याज्यांतानि शास्त्राणि। अन्यार्थमप्युच्य
मानं याज्याया उत्तमत्वं प्राप्तीति जनयतीति तन्निवृत्त्यर्थं। सर्वशास्त्रपरिधायात्वेवं। सर्वासु शास्त्रपरिधा धानी
नीयासु आहूय परिदध्यात् परिधानीयास्विति बहुवचनेनैव सर्वत्वे सिद्धे सर्वग्रहणं होत्रकपरिग्रहार्थं
॥ उक्थं वाचि घोषायत्वेति शस्त्वा जपेत्। अनइन्द्रश्चदाशुषो दुरोणा इति याज्या। उक्थपात्रमग्रे भक्षयेत्।
उक्थशस्त्रं शास्त्रसंबंधि तेयाकेचिद्धोतृगृह्यते। शास्त्रयाज्यायां हूयते च। तच्छेषवद्यत्पात्रं तदुक्थपात्रमि
त्युच्यते। तस्य भक्षणं वषट्कारनिमित्तत्वादविधेयं तदत्र क्रमार्थं विधीयते। अग्र इति। तत्रश्चमसोश्चमसिनः स
र्वे शास्त्रयाज्यांतेषु। तत्रश्चमसांश्चमसिनो भक्षयेयुः सर्वेषु शास्त्रयाज्यांतेषु भक्षणं चक्रमशास्त्र विधीयते नामु
न · भक्षणेनिराकृते नैवसमाख्यायाः प्रवृत्तिनिमित्तसंभवादिवचनादृते भ्यासोनास्तीति भक्षविधानं सर्वशा १६०

स्त्रयाज्यास्विति वक्तव्ये सति श्रुतवचनमाश्विनस्य शास्त्रस्य याज्याभावात्तदृते चमसभक्षणं न प्राप्नोती
तीति तत्संग्रहार्थं। तेनायमर्थः सर्वशास्त्रयाज्यासु भक्षयेयुः। सर्वशास्त्राणामंते वेति सर्वशास्त्राणां या
ज्यानामंते सर्वशास्त्रयाज्यांता इति विग्रहः। ननु स्तोत्रीयमेवाश्विनशास्त्रमंतो न भवति। सत्यं नांतः। त
थाप्यतिरात्रस्थितिहेतुत्वात्तिरात्रातिदेशात्तत्रैव चमसभक्षणं भवत्येव। सर्वग्रहणं होत्रकशास्त्रपरिग्रहार्थं।
एवं सर्वत्र चमसभक्षणविधानाद्यत्रोक्थपात्रमस्ति तत्र तद्भक्षयित्वा चमसानां भक्षणं। अन्यत्र चम त्र
सानामेवेति गम्यते। वषट्कर्तैकपात्राण्यादित्यग्रहसावित्रवर्जं॥ आदित्यग्रहसावित्रग्रहयोर्वषट्क
र्तुर्भक्षो नास्तीत्येतावदत्र विधीयते। अन्यदनूद्यते प्राप्तत्वात्प्रासंगिकं चेदं सूत्रं॥४॥ स्तोत्रमग्रे शा
स्त्रात्। भवतीति शेषः। शास्त्रकालपरिज्ञानमनेन क्रियते। एषेति प्रोक्ते उन्नातुर्हिंकारे प्रातःसवन आहू
यीरन्। एषेति प्रोक्ते प्रस्तोत्रा यत्तदुन्नातुर्हिंकारस्तस्मिन्काले प्रातःसवने शास्त्राया आहूयीरन्। बहुवचनं हो
त्रकशास्त्रसंग्रहार्थं। प्रातःसवनग्रहणं होत्रकपरिग्रहार्थं। प्रतिहारस्तूत्तरयोः सवनयोः। एषेति प्रोक्ते यः प्र
तिहारः तस्मिन्नुत्तरयोः सवनयोराहूयीरन्। वायुरग्रेगा यज्ञप्रीरिति सप्तानां पुरोरुचां तस्या अन्तस्यात्

र्धर्चे अर्धर्च इत्युक्तं तेनात्राप्यवसानत्रयविधानात् समाम्नायसिद्धा एवार्धर्चाः सूत्रकारेण ८

परिष्टात्तृचं तृचं शंसेत् । एताः सप्त पुरोरुचो नामर्चः तासामेकैकस्या उपरिष्टादेकैकं तृचं शंसेत् । सप्तव
चनं सप्त आः सप्तपदत्वसिद्ध्यर्थं । वायवायाहि दर्शतेति सप्त[illegible]ः सप्त वचनं सप्तानां तृचानां ग्रहणार्थं इतर
था पादग्रहणादेकैकस्मा यथा सप्तत्वाभावे पुरः । तथाभ्यासेत् तथा सुतस्मात् सप्त वचनं । द्वितीयां प्रउ
गत्रिः । प्रउगमिति शस्त्रस्य संज्ञा । अस्मिन् शस्त्रे प्रकृतिप्राप्तं यदा धाय्यायास्त्रिर्वचनं तद्द्वितीयायां नियम्य
ते । नत्रिर्वचनान्तरमपूर्वं विधीयते । पुरोरुग्भ्य आहूयीत षष्ठ्यां त्रिरवस्येदर्धर्चेऽर्धर्चे । विश्वदेवानित्येषा ष
ष्ठी सा सप्तभिः पादैरेका । न तैः सप्तभिः पादैर्द्वे अनुष्टुब्गायत्र्याविति । सप्तानां पुरोरुचामित्यत्र सप्तग्रह
णेनोक्तं । अंतो अर्धर्चमर्धर्चमिति लाक्षणिकाः तत्र कथमर्धर्चशः शंसनमिति शंसये तं निर्णयार्थं विष्ठां
त्रिरवस्येदर्धर्चशः शंसने परिगृहीता इति ज्ञायते । एतत्सर्वासां विषमपदावसानानां प्रदर्शनार्थमुक्तं ।
उत्तमां निष्केवल्यां शंसेत् शंसये केतुरन्यत्रापि आह्वानमशंसने । उत्तमर्ग्यानि पुरोरुचः अत्रा सने उत्तमेन चेत् आह्वानं कर्त
व्यं । माधुच्छंदसं प्रउगमित्येतदवेक्षते । अत्रायं प्रउगशब्दः [illegible] वायविहत्यापेक्षया प्रयुक्तः । एवमन्यत्रा ताम
पि यत्र यत्र माधुच्छंदसं प्रउगं विज्ञायते तत्र तत्र तृचापेक्षमेव न पुरोरुग्भिः सहार्थमिति द्रष्टव्यं । उक्थं शा १६१
सनेनार्धर्चशः शंसनमित्युक्तं । अर्धर्चाश्च द्विप्रकाराः समाम्नायसिद्धा लाक्षणिकाश्च । समाम्नायसिद्धाः सर्वोर्ध ५

विश्वलोकाय त्वेति शस्त्वा जपेत् विश्वजितः सोम्यं मधिति याज्या प्रशास्ता ब्राह्मणाच्छंस्यच्छावाक इति शा
स्त्रिणो होत्रकाः । होत्रकाणां मध्ये एते शस्त्रवंतः । एतेषां शस्त्राणि भवंतीत्यर्थः । एते शस्त्रिण इत्युक्ते के
षां शस्त्राणि भवंति किंरूपाणि च तेषां शस्त्राणीत्येतदुभयं वक्ष्यमाह । तेषां चतुराहावा निपातः सवने तृती शस्त्राणि २
यसवने पर्याये चातिरिक्ते च । तृतुस्थाने यत्तेषां शस्त्राणि भवंति तानि चतुराहावानीत्येतदुभयं विधीयते ।
पर्यायातिरिक्तानां तृतीयसवनत्वे सत्यपि पृथग्ग्रहणमुक्थशस्त्रेभ्योऽन्यानि तेषां पि शस्त्राणि भव
युरित्येवमर्थं । अतिरिक्ते चेति बहुवचननिर्देशाद् अप्तोर्यामातिरिक्ते षोडशे च भवंति । न वाजपेयातिरिक्ते ।
तत्रैकत्वादतिरिक्तस्येति पंचाहावानि माध्यंदिने । अत्रापि पूर्ववदुभयं विधीयते । आहावपरिमाणव व
चनं निमित्ताधिक्येऽपि एतेषामेतावत्त्वसिद्ध्यर्थं । इदानीमाहावस्य निमित्तानि प्रसंगादुच्यंते । स्तोत्रि
भ्या३ यानुरूपेभ्यः प्रतिपदनुचरेभ्यः प्रगाथेभ्यो धाय्याभ्य इति पृथगाह्वानं । एतेभ्यः सर्वेभ्य आहावः कर्तव्यः । एतेषां भ्य२
बहूनां संनिपाते पृथक्पृथक् कर्तव्यः । इत्येतदुभयमत्र विधीयते । सर्वत्र यद्यर्थत्वादाहावो विधीयते त[illegible]
से कर्तव्यः । आदौ निविद्धानीयानां होत्रकाणां । अनेकत्वेऽपि प्रथमेष्वाहावः । निविद्धानीयस्य होत्रकस्यादौ न व

होतुरपि होत्रकाणामधिकाराद्धोतृग्रहणं । होतुरपि एतेभ्य आहावः कर्तव्यः । तेभ्योऽन्यदनंतरं होतुरपीत्यत्राप्यनुवर्तते ।
स्तोत्रियादिभ्योऽनंतरं यच्छस्त्रं तत्रापि होतुर्होत्रकाणां चाहावः कर्तव्यः ।

ति। तस्यानेकत्वे प्रथमएवादावेनैविद्वानकार्यमादावस्यनिमित्तं न स्तकस्यस्वरूपमिति। आपो देवते
चहत्वे। आपोदेवतमहेव तमित्यर्थः। सच आग्निमारुतआपोहिष्ठेतितृचउच्यते। तेचवादावः कर्तव्या। ते
षां तृचास्तोत्रियानुरूपाः शस्त्रादिषु सर्वत्र। तेषामधिकारेपुनं स्तेषामिति वचनमस्मिन्सूत्रे सर्वार्थोपि
कश्चिद्विधिरस्तीतिप्रदर्शनार्थं। तेन तृचास्तोत्रियानुरूपाः सर्वत्रेत्येकोर्थः सर्वार्थः। अपरश्च तेषां शस्त्रादिषु
ये आदेशास्ते स्तोत्रियानुरूपास्तेषामादावः कर्तव्यइति व्यवहितयोजनयान्वयार्थः। माध्यंदिने प्रगाथा
स्तृतीयाः। माध्यंदिने तेषामेव शस्त्रेषु तृतीया आदेशास्ते प्रगाथा वेदितव्याः। यथाग्रहणमन्यत्। अतोन्य — प्रगाथ इत्यनेन प्रगाथः।
त्सर्वं यथाग्रहणमेव वेदितव्यं। प्रगाथ इत्येकस्तोत्रियोभवतिनान्यथेति। याज्यांतानि शस्त्राणि। यत्रब
हूनां शस्त्राणामेव आम्नायं तेयाज्यान्तविधायंते तत्र किं यदेकं शस्त्रमित्येतत्संशयनिवृत्त्यर्थमेतद्वच
नं। अन्यदपिप्रयोजनमस्ति यत्स्वार्थं वाग्यमनं विदितं तद्याज्यापर्यंतमनुवर्ततइति। उक्थ्यं वा वी
त्येषां शस्त्राजपः प्रातःसवने। प्रातःसवनस्वनं स्पष्टार्थं। ऊर्ध्वं षोळशिनः सर्वेषां। षोळशिनऊर्ध्वं — राम
यानि शस्त्राणि तेष्वेवमेव शस्त्राजपः सर्वेषां भवति। सर्ववचनं होतुरप्राप्तापणार्थं। उक्थं वा वी द्रा — १६२

स्तोत्रिय ५

चेति माध्यंदिने उक्थं वा वीद्राय देवेभ्यः इत्युक्थ्येषु सषोळशिकेषु। उक्थ्येषु षोळशिनि वायं न वृतीत्यर्थः।
उक्थ्यानीति तृतीयसवने होत्रकशस्त्राण्युच्यंते। अनंतरस्य प्रवर्गा। यत्रानेकपदार्थाः क्रमवर्तिनः सुरे
करूपास्तत्र यदि तेषां कस्यचिद्धर्माकांक्षा स्यात्तदा तेषामेवानंतरेण प्रवर्गेण धर्मविधिर्वेदितव्यः। किमुदा
हरणं। तृतीयसवने पुरोळाशाद्यस्त्रमिस्कर्त्तो। तत्र माध्यंदिने न विधिर्भवति तथा सोमातिरेक शस्त्रे
नंतरस्य शास्त्रस्यय ज्ञास्त्राजपः स भवतीत्येवमादि द्रष्टव्यं। स्तोत्रियेणानुरूपस्य छंदः प्रमाणलिंग
देवतानि॥ छंदोगायत्र्यादि प्रमाणमेकस्मिन्नपि छंदस्यूनाधिकाक्षरता लिंगं आवती प्रवतीत्येवमादि
देवतं प्रसिद्धं स्तोत्रियस्य यान्येतानिता नि एवानुरूपस्येत्यर्थः॥ आर्षं चैके॥ एक आचार्या आर्षं च तद्दे
वेछंति। आनोमित्रावरुणा नो गंतं रिशादसा प्रवो मित्राय प्रमित्रयोर्वरुणयोरिति न यातं मित्रावरुणे
ति याज्या याहि सुषुमा हि तइति षड् स्तोत्रियानुरूपा वनंतरः स तं इत्या हपन सुष्ट्रहना निति स्त इंद्र
क्रतु विदं सुतमिति याज्ये द्राग्नी आगतं सुतमिंद्राग्नी अपसस्परि तो वा सहत्र रूपा कु वइति तिस्र
इंद्रे द्राग्नी उपेयं वामस्य मन्मन इति न वेंद्राग्नी आगतं सुतमिति याज्या। अत्र मध्ये आयाहि सुषुमा हि त

(यद्यध्वर्युः प्रशास्तः प्रसुहीति ब्रूयात्तदा प्रशास्ता सर्पतेति ब्रूयात् ततो०)

श्रौसू०
१६३ इति षड्स्तोत्रियानुरूपाइत्यत्र षड्ग्रहणमासाम्स्चांयास्तु कास्तु चिद्यदि ष्ठंदोगाः स्क वीरन् तदा तिस्रभि न१
रेवस्तोत्रियं कृत्वा शिष्टाभिरनुरूपः। कर्तव्य इत्येवमर्थं॥१०॥संस्थितेषु सवनेषु षोळशिनि चातिरा
त्रे प्रशास्तः प्रसुहीस्फ कः सर्पतेति प्रशास्ता प्रसृजेद्होतादक्षिणेनौदुंबरी मंज सेतरे परयाद्वा
रोत्तरां वेदिश्रोणीमभिनिःसर्पंति। सवनेषु संस्थितेषु मध्येवातिरात्रे षोडशिनि समाप्ते अतिरात्रविशे
षणमतिरात्रेयः षोडशी सा तस्मिन्नेव समाप्तेन वाजपेय षोडशिनीत्येवमर्थं। एतेषु चतुर्षु कालेषु हो
तादक्षिणेनौदुंबरीं गत्वा इतरे च स्वस्य धिष्ण्यस्यांसं आर्जवेन गत्वा सर्वे परयाद्वारा निष्क्रम्य उत्तरां सा
वेदिश्रोणीमभिनिःसर्पंति। तया श्रोण्या बहिर्वेदि प्राप्नुयुरित्यर्थः। यद्यस्मिन्काले ध्वर्युः प्रशास्तः प्रसु
हीति ब्रूयात्तदा प्रशास्ता सर्पतेति ब्रूयात्। ततो निःसर्पणं कुर्युरेतेष्वेव कालेषु यद्यन्यस्मिन्काले ब्रूया
ति२ त्तदा प्रत्युत्सर्जनमेव न निःसर्पणमस्मदीयानामितीयद्यध्वर्युर्न ब्रूयात्प्रशास्तापि नातिसृजेत्। ते
ष्वपि कालेषु तत्तो नातिसृष्टा एव निःसर्पेयुः सर्वथा तावदेतेषु कालेष्वतिसृष्टा वा अस्मदीया निःस राम
र्पेयुरेव नान्यस्मिन्काल इति संस्थितं। तृतीयसवनसमाप्तिरपि शाख्रसमाप्तावेवास्माकं न हारियोज १६३
भनतिसृष्टा॥२

स्थितं। नांतेपत्नीसंयाजांतइति पुनःसदसः प्रवेशप्रयोजनाभावात्सवनसंस्थास्तु निःसर्पणस्य सदः प्रवेश
पर्यंतत्वादिति। मृगतीर्थमित्येतदान्वक्षते। संध्यवदाराभावे पि संज्ञायानित्यत्वात्परिशानार्थमुपदेशः।
एतेन निष्क्रम्य यथार्थं नत्वेवान्यन्मूत्रेभ्यः। अतीर्थेन निष्क्रांतानां बहिस्थानामपि शक्त्यत्वादयो नियमा
यथा संभवमनुवर्तंत इत्येतत्प्राक्तदनेन निष्क्रांतानां नास्तीत्येवमर्थं यथार्थवचनं यथार्थत्ववनात्स्वैरक
र्मण्यपि प्रसज्येरन्निति तन्निवृत्त्यर्थं नत्वेवान्यन्मूत्रेभ्य इत्येतेन यदावश्यकं तावन्मात्रमेव भवति। अतो
नान्यदिति। आवश्यकमपि यत्र शम्याप्रासादूर्ध्वं कर्तुं न शक्यते तदनेन निष्क्रम्य न कर्तव्यं तीर्थेनैव निष्क्रम्य
तादृशं कुर्यात्। अनेन निष्क्रम्य शम्याप्रासात्परस्तान्न गच्छेयुरिति वचनात्। एते निष्क्रम्य कृत्वोदकार्थं वे
द्यां समस्ता उपस्थाया परयाद्वारा नित्ययाद्वृतासदो द्वार्ये चाग्निमृत्वयतरूली प्रतिप्रसर्पंति। एते वृति
निष्क्रांतानि दिश्यंते। एते निष्क्रमणानंतरं यत्किंचिदुदककार्यमस्ति चेत्कृत्वानास्ति चेदकृत्वा वेदिं प्रविश्य न
वेद्यां ये धिष्ण्यास्तेषां समस्तोपस्थानं कृत्वा उपस्थितां श्चानुपस्थितांश्चेत्येतदुक्तं भवत्यर्थः। अपरयाद्वा
नानिष्ययाद्वृता मंत्रेणासदो द्वार्ये चाग्निमृत्वयतरूली प्रतिसर्पंति। कृत्वोदकार्थमित्यत्र न विधीयते यथापा

र्ममनूद्यते। एषाह्सर्पतीति वचने। सर्पतीति वचनद्वयेनेन पूर्वोक्ताश्चत्वारः कालाः उच्यंते तेषु तस्य व
चनस्य संभवात्। अतस्तेषु सर्वेष्वयमेषक्रमः प्रयोगो निःसर्पणादिः प्रतिप्रसर्पणांतः संकर्तव्यः न
केवलं प्रातःसवनांत एवेति। एवं यथैव गृहपतिः। यजमानस्तथैव ब्रह्मा प्रतिसर्पणं कुर्यादिका
सर्वेषु ह्राह्रीनेषु सर्वेषु गृहपतिरेवेति॥११॥ ॥एतस्मिन्काले ग्रावस्तुत्प्रपद्यते। अस्याप्यस्मिन्नेव का
लेप्रपदनं न प्रातरनुवाककालइत्यच्छावाकेन तुल्यं। तस्योक्तमुपस्थानं। अस्यापि पूर्वोक्तमुप
स्थानं प्रसर्पणं च भवति तत्र विशेषमाह। एवं याह्लावा हविर्धाने प्रपद्य दक्षिणस्य तु हविर्धानस्य प्राग्
दग्युत्तरस्याः सन्निरसस्तृणं निरस्यरा आनमभिमुखो वा तिष्ठते। प्रसर्पणमेवात्र प्रपदनमित्युच्य
ते। असौ तु हविर्धानं एवं याह्लावा प्रपद्यते एवं वदेव हविर्धाने इति द्विवचनं शालायामेवोपचारात्।
शालाकटद्वयसंबंधादुपचारः। हविर्धाने ग्रावः शालायामपि मुख्य एव योगस्याविशिष्टत्वादुभयोस्तस्य
पद्य दक्षिणस्य शाकटस्य युत्तरमक्षं निरस्तस्य प्राग्दग्वोदेवानस्तस्मिन्मंत्रेण निरसनं कृत्वा तत्र ग्रा वाम
ग्रानमभिमुखस्तिष्ठेत्। दक्षिणामुखः प्रत्यग्दक्षिणामुखो वा। नचोपवेशनः। निरसनोपवेशनयोः १६४

साहचर्यप्रदर्शनार्थं। अप्राप्तएवोपवेशनमंत्रः प्रतिषिध्यते। पोऽस्य ग्रावसोमपइति तु। उपविष्टस्य विहितत्वा।
त्तातिष्ठतो न प्राप्नोतीति विधीयते। अथास्माअध्वर्युरुष्णीषं प्रयच्छति॥ उष्णीषं शिरसो वेष्टनं वासः। नदं
अलिनाप्रतिगृह्णाति: प्रदक्षिणं शिरः संमुखं वेष्टयित्वा यदा सोमांशुं न भिषवाय व्युपोदस्यथ आव
पोऽभिष्टुयात्॥ यदा सोमलता अभिषवार्थं अध्वर्यवो व्युपोहंति विक्षिपंति तदा ग्राव्णामभिष्टवनं कुर्या
त्॥ मध्यमस्वरेणेदं सवनं॥ इदमादीदं माध्यंदिनं सवनं मध्यमस्वरेण प्रयोक्तव्यं। इदं ग्रावस्तोत्रमारभ्य माध्यं
दिनं सवनं वर्त्तते॥ तत्र स्वरग्रहणं बाधकबाधनार्थं। बार्हस्पत्येष्टौ सौमिक्यइतिप्रधानोपांशुत्वं प्राप्तं तस्य
बाधनार्थं। तेन तस्यामिष्टौ प्रधानमपि मध्यमस्वरेण भवति। अभित्वा देवसवितः युंजते मन उत युंजते
धिय आत्मनइंद्र क्रतुमंतं मा चिदन्यद्विशं सतप्रैतवदं त्रिष्ट्यबुर्दं। एतत्सूक्तम र्बुदनामधेयं भवति। प्रा
या ग्रुत्तमौ आवत्सं सप्रवोग्रावाण इति। सूक्ते आवपनेतिशेषः। अर्बुदस्य प्राग् उत्तमायाइत्यर्थः॥ सू
क्तयोरंतरोपरिष्टात्पुरस्ताद्वा पावमानीरोप्य यथार्थमावाग्रहणा छिद्रयापरिधानवेष्ट्यं यजमान
स्योष्णीषं। सूक्तयोरुपरिष्टात्पुरस्ताद्वेति संबंधः। सूक्ते इत्यध्याहृत्य अंतरवाक्येन संबंधः। त्रयाणामन्य

तमस्मिन्स्थानेपावमानीरावपेतयथार्थंयावत्प्रयोजनमित्यर्थः।यावद्राजिषयमितितदारंभोआरंभवि
धानात्तत्रैवग्राव्णांव्यापारसंभवात्अस्यचग्रावस्तोत्रत्वादिति।आग्रहग्रहणाद्ग्रावस्तोत्रांतर्भा
वेपिपावमानीनांदृश्यमानसोमाभिधानात्संपूयमानःसोमस्तावंतंकालमनुवर्ततइतिकृत्वेदमुच्यते।
त्रिरुत्पार्बुदस्योत्तमयापरिधायवेधंयजमानस्योत्तरीयंयजमानायदातव्यमित्यर्थः।आदाययथार्थं
मंत्रेष्वर्बुदःसु।यजमानायदत्तेतस्यार्थप्राप्तमुच्यतेनाशास्त्रंविधीयते।अनेनमंत्रेणपादानमप्यत्रहस्ता
द्धस्तांतरसंक्रमणमात्रंयजमानस्यैवतत्त्वमिति।प्रतिप्रयच्छेदितरेषु।अनंतरोर्बुदःसुयेनेदंदत्तंतस्मा
यपुनःप्रयच्छेदिति।प्रतिशब्दसंबंधादवगम्यते।अथापरमाभिरूपंकुर्यादितिगाणगारिः।अपरमिति
अपरमिदंग्रावस्तोत्रंनपूर्वमित्यर्थः।प्रकृताविदंनप्रवर्ततइतिभिन्नविषयत्वादपरत्वात्प्रयोगो
युक्तः।कार्यविशेषेतल्लिंगस्यविधानादेवाभिरूपत्वेसिद्धेअभिरूपवचनंकार्यव्यत्यासेऽप्यव्यत्यास
सिध्यर्थं।गाणगारिवचनंपूजार्थं।आप्यायस्वसमेतुतइतितिस्रोऽभिमृजंतितदादशासिपएतमुत्संदत्ता राम
सिपोम्यमानःसुहस्त्यादशाभिर्विवस्वतोदुहंतिसप्तैकामधुस्तासिष्णुवी।मिष्माकत्वन्गोषुधावति १६५

पवित्रेपरिषिच्यतइत्यस्मिन्काकलंगोषुधावतिइत्येतोवर्मविगाहतइतिद्वे।एतासामर्बुदस्यचतुर्था
सुदृढयुक्टचातिशुत्वानवदध्यात्।एताद्वादशास्त्रोकुर्कांताःस्तोशितारस्तचाभवंति।एतासांपाव
मानीनांत्वचातेषुअर्बुदस्यत्वानवदध्यात्विपरीतंवा।अत्रविशेषोनशक्यतेवक्तुंउरवगमत्वात्।आ
प्यायमानेप्रथमं।आप्यायनमुदकसेकः।क्ष्णूयमानेद्वितीयां।मार्जनंचूर्णमादायहस्ताभ्यांपेषणं।दुह्यमा
नेतृतीयां।दोहनंप्रसिद्धं।आसिच्यमानेचतुर्थीं।आसेचनमभिषवेणद्रवीकृतस्याधवनीयेसंभरणं।दोह
च्छेदेदृढच्छेदेचतुर्थीं।निमित्तावृत्तावावृत्त्यभ्यावस्त्रावचनं।आविदन्यद्विशांसतेतिवदिग्रावाणःसंक्रादे
रन्।संक्रादनंशब्दनं।अत्रापिनिमित्तावृत्तावावृत्तिरस्ति।अस्यास्त्वोनिमित्तावेपिप्रयोगःस्वस्था
नेचतुर्थ्याअभ्यावचनादिदमवगम्यते।समानमन्यत।अर्बुदःपावमानीभ्योन्यत्सर्वंसमानंभवतीत्यर्थः।
अर्बुदमेवेत्येके।अवधारणादिदमेवसर्कंनान्यल्लिंविर।प्रवोग्रावाणइत्येके।अत्राप्यवधारणंद्रष्टव्यं।
उत्कसर्पणां।प्रसर्पणमत्रकर्तव्यमित्यर्थः।स्तुतेमाध्यंदिनेपवमानेविहर्त्यांगानाम्॥१२॥दधिघर्मेण
श्चरतिप्रवर्ग्यवांश्चेत्।अंगारविहरणवचनंतत्कालपरिज्ञानेतद्भावपरिहारेयत्नकरणार्थं।दधिघर्मो

श्रौ·वृ·
१६६

कर्म

नामैवविशेषः। तेनचरन्तिप्रवर्ग्येणाश्चेदयंक्रतुः। नचेन्नक्रतुत्वाद्दधिघर्मः। तस्योक्तमङ्गावानंघर्मेण। त
स्येतिवचनंयोगविभागार्थंयोगविभागप्रयोजनमप्रवर्ग्येपिदधिघर्मस्यविधेःप्रापणमिति। घर्मेणेति
वचनमङ्गावनादन्यस्यघर्मेणसंबंधस्यैकश्रुत्यस्यापिप्रापणार्थं। तेनोत्तिष्ठतावपश्यतेत्यस्याःशंस
त्यादिवोदनाभावेपिऐकश्रुत्यंभवति। इज्यान्नक्षिणाश्च। इज्याव घर्मेणाव्याख्याता भक्षिणश्च घर्मेणे
वव्याख्याताः। भक्षिश्चाह्वोनकर्तृपलक्षणार्थंप्रयुज्यतेकथं… दिस्वात्मनोपिविधेयत्वात्। येनेनभक्षस्य
भक्षवर्ज्जंणांचघर्मवत्ताविधीयते… निष्ठतावपश्यतेयाद। अस्यालिंगजनितमेवका
र्यमाहेतिवचनमस्याभ्रुवास्यालंमान्दितिवमर्थं। तेनोत्तरेवानुक्याभवति। अनयाधर्मुप्रे
षरूपमभिधानंक्रियते। श्रातंहविरित्युक्तः। श्रातंहविरित्यन्वाह। इयमनुवाक्या। श्रातंमन्यऊध
निश्रातमग्नावितियजति। अग्नेवीहीत्यनुवषट्कारोदधिघर्मस्याग्नेवीहीतिवा। मयित्यदि
न्द्रियंबृहन्मयिदक्षमयुत्क्रतुः। त्रिः… विभातुमध्याकृत्यामसत्सासदविराजाज्योतिषासह
तस्यदोहमशीयतेतस्यतईड्पीतस्यत्रिष्टुप्छंदसउपहूतस्योपहूतोभक्षयामीतिभक्षजपः। राम १६६

यधिष्ण्यवेलांप्रांचमंगारेर। भिधिहरेयुःपश्चात्स्वस्यधिष्ण्यस्योपविश्योपहवमिष्ट्वापरिलाग्ने
पुरवयमितिजपेत। धिष्ण्यावतांमध्येयंकविरधिष्ण्यवतंधिष्ण्येभ्यःप्रांचंसंतंयद्यगारेरभिविहरे
युस्तस्यनैमित्तिकमिदंपश्चात्स्वस्यधिष्ण्यस्योपविश्योपहवंयजमानादिष्ट्वापरिलाग्नेपुरवयमि
तिजपेत। अनिष्ट्वादीक्षितः। दीक्षितस्योपहवयाचनप्रतिषेधाददीक्षितस्योपहवयाचनंयजमा
नादितिगम्यते। अस्यैवनैमित्तिकस्यनिमित्तापत्तिकालेद्वन्यत्राम्नानंतृतीयसवनेप्यस्यनैमित्तिक
स्यप्रापणार्थं। सवनीयानांपुरस्तादुपरिष्टाद्वापशुपुरोडाशेनचरंति। प्रकृतिप्राप्तस्यपशुपुरोडाश
स्यकालविधिरयं। अक्रियामेकेन्यत्रतदर्थवादवदनात्। तस्यपुरोडाशस्याक्रियामेकेआचार्यामन्यंते
ति हेतुबलात्सोयंहेतुःअन्यत्रतदर्थवादवदनादिति। प्रयोजनोवादस्तदर्थवादःतस्यवदनंतदर्थवाद
द वदनंतत्प्रयोजनवादस्यान्यत्रवदनादित्यर्थः। अन्यत्रेतिसकृद्वाक्प्रैषउच्यते। तत्राग्नीषोमौ… पुरोडा
शैरित्याम्नातं। पुरोडाशवतीरितिबहुवचनदर्शनात्सवनीयदेवतार्थानिधीयतेनपशुपुरोडाशार्थंदेवतेति तेर
गम्यते। तेनात्रप्रकृतिप्राप्तमभिधानमपश्यंतोकरणनिमित्तमेवेदमभिधानमितिमन्यमानाअ

क्रियामुक्तवंतः। क्रियामात्रमरथ्योन्विनात्प्रतिषेधात्। अतिदेशप्राप्तस्य प्रतिषेधाभावादात्रमरथ्यः पशुपु
रोडाशस्य क्रियामेवमन्यते आत्रमरथ्यग्रहणं तस्य पूजनार्थं न विकल्पार्थं तस्मात्पशुपुरोडाशः कर्त्तव्य एव। यत्तु
नविदमन्यत्र तदर्थवादवदनादित्यनभिधानादकरणमुक्तं तदयुक्तं। प्राप्तस्य प्रतिषेधाभावात् करणमेवेति। अ
नभिधानं पुनर्यत्सूक्तवाकशेषेषूक्तं तदहेतुरेवं श्यस्य पवितेर्मंत्रेभिधानशक्तिर्नास्ति चेदनभिधानमस्तु
किं कुर्मः। यथाकथंचिदभिधानं वा कल्पनीयं। पुरोडाशाद्युत्कमानाराशंसासादनात्। नलिदृष्टिदेवत्याः
एतस्मिन्काले दक्षिणानीयं तेहीनेकाहेषु। अधिकृते काले पुनः कालविधानं यच्चानुसवनं दक्षिणा
नयनं विहितं तत्र त्रिषु सवनेषु नाराशंससादनोत्तरकालमेव दक्षिणानयनमित्येवमर्थं अहीनैका
ग्रहणं सत्रे प्राप्त दक्षिणापि नास्तीति सूचनार्थं। कृष्णाजिनानिध्नन्त्वंतः स्वयमेव दक्षिणापथयंतिदी
शंसेत्।नवा।कृतेपिबृहत्सामनिबृहतोयोनिंनशंसेदित्यर्थः।आश्विनेनग्रहेणसपुरोळाशेन
चरंति।आश्विनेनेत्यश्विदेवत्येनेत्यर्थः।इमेसोमासस्तिरोअह्न्यासस्ती।आस्तिष्ठंतिपीतयेयुक्ता।
हविष्मतानासत्यारथेनाकातनुपभूषतंपिबध्याइत्यनुवाक्या।होतायक्षदश्विनासोमानांतिरोअ
ह्न्यानामितिप्रैषः।प्रवामंधांसिमद्यान्यस्थुरुत्मानापिबतमश्विनेतियाज्येअध्यर्धमिनवानं।अत्रा
प्येवोरेवद्विलंनयाज्याकार्यस्य।अत्राश्विनेनेतिदेवताविधानेनेयंत्रात्रयाज्येतिज्ञापनार्थं।यद्येत
स्यपुरोळाशस्यास्विष्टकृतावरेपुः पुरोळाशाआग्नेपवतामग्नेवृधानआहुतिमितिसंयाज्ये राम
द्रूर्वंतोतिरात्रइतिशेषः।।५।।यदिपर्यायानभिव्युछेत्सर्वेभ्यएकंसंनयेयुः।एवंतावच्चतुर्विधःसो १८९

मयागोज्योतिष्टोमाख्यस्यएकःतस्यैवविशेषमुपरिष्टाद्वक्ष्यति।अनांतराळेपर्यायाश्विनप्रसंगेनतेषां
नैमित्तिकमपिवक्तुमारभते।यदिपर्यायानभिव्युछेदिति।अस्यायमर्थः।यदासर्वेपर्यायाःप्रयुक्ता
नभवंतियद्येवमाशंकास्यादतिक्रांतप्रायारात्रिःसापर्यायाणामाश्विनस्यचापर्याप्तेतितदास
र्वेभ्यःपर्यायिभ्यःएकंपर्यायंसंभरस्यकुर्युरित्यर्थः।एतमेवार्थंविवृणोति।प्रथमान्होताद्वितीयान्मै
त्रावरुणोब्राह्मणाच्छंसीचोत्तमादच्छावाकः।प्रथमात्पर्यायाद्धोतास्वंशस्त्रमाददीत।मैत्रावरुणा
ब्राह्मणाच्छंसिनौद्वितीयात्स्वेशस्त्रे।उत्तमादितरःस्वमेवशस्त्रमिति।होतेहोप्रथमाद्वाउत्तमा
त्।प्रथमःपर्यायःप्रयुक्तःमध्यमोत्तमावप्रयुक्तोतयोराश्विनस्यचापर्याप्तारात्रिरित्याशंकास्यात्त शं
देवंकुर्युः।होदोत्रैमैत्रावरुणोप्रथमाद्ब्राह्मणाच्छंस्यच्छावाकावुत्तमादिति।अत्रप्रथमादिति
न वचनमप्रयुक्तयोरेवप्रथमान्मध्यमादित्यर्थः।अत्रद्वयोरधिकृतत्वादंत्यस्यद्वितीयत्वेप्युत्तम
त्वाद्बप्रयोगादन्यत्रापिद्वयोरंत्यस्योत्तमत्वंसाधितंभवति।तेनान्यत्राप्युत्तमादित्ययंविधिर्द्विरा
त्रेप्यंतेभवति।अपिवासर्वेस्युस्तोमानिवृत्ताः।अपिवासर्वेस्तोमानिवृत्तान्केयुःनसंनयम्

श्रौ॰ष॰
१८७

योर्विकल्प उक्तः। अत्र संभरणस्यासंभवे निर्हास ७

ति। सर्ववचनं प्रवेश्ययोरभिष्टुत्योः संभरणनिवृत्यर्थं। अयं स्तोमनिर्हासो होत्रकाणामेव भवति। न
होतुरित्यर्थं उक्तः। शास्त्रोपाय इत्यत्र उक्तग्रहणेन स्तोमनिर्हास इत्यनेनैतद्विधीयते। सर्वपंचद
शस्तोमाः सतः पंचस्तोमान् वेयुरिति। होतुरुक्तपंचदशस्तोमा एव सर्वत्र। स्तोमनिर्हासे त्वेवं शस्य से
निर्हास इत्याह। ऊर्ध्वं स्तोत्रियानुरूपेभ्यः प्रथमोत्तमास्तृचांश्च सेयुः। स्तोत्रियानुरूपास्तावद्यथा
पूर्वं भवति। तेभ्य ऊर्ध्वं यद्वस्य मस्तित्स्यादितस्त्वन्यत्तृचाद्युत्तरं तद्य एवं च त्वारस्तृचान्वेयुः।
एतस्य मार्गाणि होत्रकाशस्त्राणि भवेयुः। होतुरुक्तपूर्ववदेव। निर्हास एवैकस्मिन्। पूर्वयोरभिष्टु
त्योः संभरणनिर्हासैरेवैको विधीयते। अवधारणं भवति नानंतरायामेवाभिष्टुत्ये। होत्रव
र्जमित्येके। एके शाखिनो होतृवर्जमेव निर्हासं कुर्वंति। आश्विनादेकस्तोत्रियो नेविवत्तदुप
सद्गति। इदं चाभिष्टुतिनिमित्तमेव। तं पुरस्तादनुदैवतं स्वस्य छंदसोदयथा स्कतेषां सेत। तं स्तोत्रि
यमाग्नेयक्रतोरदंतौ छंदसः पुरस्तात्सक्त छंसेत। अनुदैवतमिति नात्रवीप्सा विवक्षिता। य राम
थास्कतमिति पूर्ववदेव। त्रीणि पाप्तिग्नाताद्विनं। आश्विनादेवो नास्यां संख्यायाः विधा नाश्रूतिपश्चा १८७
न्या

करयोद ११

नवचनं अस्मिन्पक्षे निर्हास एवासाधारणो धर्म इतिज्ञापयि
तुं तेनोत्तरस्त्रेनिर्दिहं तं होतृवर्जनं सर्वास्वभिष्टुतिषु साधार ५

गच्छसोयदीनित्वत स्यामेव संख्यायामंतर्भवंतीत्यवगंतव्यं। प्रायश्चित्तप्रसंगादन्यान्यपि सोम
प्रायश्चित्तान्यत्रैवोच्यंते। विमतानां प्रसवसंनिपाते संसवो न तर्हि तेष्वनद्यावापर्वतेन वा। विमता
विरुद्धमतयः। विद्विषाणा इत्यर्थः। प्रसवशब्देन सुत्या लक्ष्यते। नद्यावापर्वतेन वा अव्यवहितदे
शे विमतानामेकस्मिन्नहनि सुत्यासंनिपाते सति संसवो नाम दोषो भवतीत्यर्थः। नद्यावापर्वतेन वा
त्क भयत्र वाग्राह्यप्रयोगादन्यदपि व्यवधायकं शास्त्रांचरो कमस्तीति गम्यते। तद्यथा स्वानिवादव
गंतव्यं। अपि केचित्तर्हि तेष्वपि। विमतानां नद्यादिभिरनंतर्हितेष्विति च विशेषणद्वयमुक्तं। त
दुभय व्यभिचारायकल्पिताद्वयेन संमतानामपि संसवदोषोस्तीत्येकोर्थः। अंतर्हितेष्वपि
परो४ देशेष्वसंसवोस्तीत्यर्थः। एवमेके शाखिन आमनंतीत्यर्थः। तथासति संसवो देवतावाहनाते। एवं स
ति आसन्नदेवतानामावाहनात्संसवः कर्तव्यः। एतदेतं कर्मकायिकं वाचिकं च द्रुततया कर्त
व्यमित्यर्थः। लघ्वस्तोपायाः शीतप्रभृत्यादयः प्रयोक्तव्याः। किंच। क याज्ञेनेति च मरुत्वतीयेषु रस्ता
त्रक स्यचां सेत। इदं च तस्मिन्निमित्ते कर्तव्यं। मरुत्वतीयेशस्त्रेयस्मिन्सूक्ते निविद्धीयते तस्य सूक्त

ते ४

स्य पुरस्तादिदं सूक्तं वासेत्। तत्राद्ये निविद्धानीयत्वं समुच्चयार्थः। तेन तस्य मरुत्वतीयस्य प्रवि
ष्टाया मेकसूक्तत्वेन प्रक वेत्यथमेषामाहावस्य यमाहावः कयाशुभीयादौ न वति। द्वित्रादिसू
क्ते कयाशुभीयस्यानाद्यत्वाद्स्यादौ न भवति तच्च सर्वेषामाद्ये भवति आहावः। यो ऽनन्तरं वेति
निष्केवल्ये। तथाह्वः पुरस्तात्सूक्तस्येति त्वानुवर्त्तते। नात्राषिसर्वविदे त्यर्थो योजनीयः। ममाग्ने व
र्च इति वैश्वदेवसूक्तस्य। अत्रापि पदत्रयमनुवर्त्तते। वैश्वदेवशस्त्रे वैश्वदेवसूक्तस्य पुरस्तादित्यर्थः।
अपि वैतेष्वेव निविदो दध्यादुद्धरेदितराणि। अपि वा एतेष्वागन्तुषु निविदो दध्यात्। येभ्यः पुरस्ता
दिमानि सूक्तानि विहितानि तान्युद्धरेत्। पूर्वेषां निविद्धानसूक्तानां मुद्धारसंयोगेन तेषु निविदो
दध्यादिति यच्चिद्दधाति तेज्ञापयति यस्मिन्निविद्धीयते तस्याव्यवधानेन पुरस्तादेतानि भवंति। न
निविद्धानीयानां पुरस्तादिति। स्थानं वा निविदो ति दूरे न्माप्रगामेति पुरस्तात् सूक्तं शस्त्वान्यस्मिं राम
स्तद्दैवते दध्यात्। निविद् स्थानं यद्यपि दूरे तदा यस्मिन्सूक्ते निविदिति पन्ना तासु वा पर सूक्तं समाप्या १८८
गंतुके तद्दैवते तां निविदं दध्यात्। निविद्स्थानादिति हारो नामैवं रूपः। सूक्तस्य यस्मिन्नन्तराले वि
१नि

कात्तद्दैवतात् पुरस्तान्माप्रगामेतीदं सूक्तं अखंडितं शस्त्वान्यस्मिन्नागंतु१

न

धीयते तस्मात्प्राक्तर्वाक्कृतदंतगतेन प्रणवेनाहावमकृत्वैवानंतरामेवर्चं संधाय तस्यामृचो
दितेवसाने वसानपर्यंतमुक्त्वा यदावस्येत्। एवं प्रकार एव निविद्धितिहारो नान्यप्रकार इति। अ
तो ऽन्यथा यः प्रमादः स ऋग्दोष एवं निविद्धितिहारः। पुरस्ताद्वचनं माप्रगामीयस्य पुरस्तादिति
पनं निविं सूक्तं समाप्य माप्रगामीयं शस्त्वान्यत्तद्दैवतमानीय तस्मिन्निदध्यादित्येवमर्थं। सूक्तग्रहणं
बृहस्पतिसवादिष्वपि हीनस्तोमेषु माप्रगामीयस्यारक्षणार्थं। अत्र किंचिदुच्यते। यदि पर्या
यानित्यत्र पर्यायानिति कर्मप्रवचनीययोगे द्वितीया। अन्नीति कर्मप्रवचनीयो लक्ष्यलक्षण
संबंधद्योतकः। उद्विविवासेविपूर्वः। संभावनायां लिङ्। अत्र पर्यायलक्षणं श्रुतिर्लक्ष्या। ए
तदुक्तं भवति। यदि पर्यायोपक्रमे तेषु वाचास्यमानेषु उषःकालआगच्छेत्तदा वक्ष्यमाणं नै
मित्तिकं कर्मकर्त्तव्यमिति॥६॥ सोमातिरेके स्तुतशस्त्रोपजननः। सोमातिरेको नाम सवनार्थो
यः सोमः स सवने परिसमाप्ते यद्यतिशिष्येत। तदा सोमातिरेक इत्युच्यते। तदा स्तुतशा
स्त्रयोरुपजननं भवति। छंदोगैः स्तोतव्यमस्माभिः शंस्तव्यमित्यर्थः। प्रातः सवने स्ति सोमो ऽयं

१८९ श्र२

स्तुतो गौर्धयति मरुतामिति स्तोत्रियानुरूपौ। महाँ इन्द्रो य ओजसा तो देवा अवन्तु न इत्यैन्द्राग्निर्वै
२म ष्णवीभिर्नित्तौ मातिरात्रस्यैन्द्राग्नयजेत। पादग्रहणेप्यैन्द्राग्निर्वैष्णवीभिश्चेति बहुवचन निर्देशाद्दोवदर्थ
मुभयो गृहीतयाः। ऐन्द्राग्निर्वैष्णवीभिश्चेति चवाच्यसामर्थ्यात्सु मुद्दिताभिरेको नयीभिः सोमा
तिरेकनिमित्तं स्तोममतिशस्यएकयाद्वाभ्यां वा प्रातःसवने परिमितानिरुत्तरयोः सवनयोरि
त्यनेनन्यायेन। यया कयाचिदैन्द्राग्नया गायत्र्या यजेत। प्रातःसवनत्वाद्गायत्र्येति विशेष्यते। वैष्ण
व्या वा। गायत्र्येति विशेषः। ऐन्द्रावैष्णव्येति गौणगारिर्दैवतप्रधानत्वात्। यद्यैन्द्रावैष्णव्या यजेत वा
दा यथा वा वत्रास्त्रमेवं याज्येत्येतद्विरुध्येतां। अथ यदैन्द्रावैष्णव्या यजेत तदा तद्देवत्यायां गायत्र्याः
या अभावात् गायत्र्यं प्रातःसवनमित्येतद्विरुध्येत। तत्रैकस्य त्यागे सति छंदएव त्यक्तव्यं। बहि
रंगत्वादप्राधान्यात्तस्येति देवताया स्त्विविधेयत्वादंतरंगतेति मन्यमानो गौणगारिर्दैवता जिर्
प्रधानत्वादित्युक्तवान्। संयोकर्मणा सामिषादिनोमीति॥ सैषा ऐन्द्रावैष्णवी त्रिष्टुप् अनयैवय राम
ष्टव्यमिति सिद्धांतितं। माध्यंदिने बण्महाँ असि सूर्ययोदुत्य इद्भर्तिं वसुरिति प्रगाथो स्तोत्रियानु १८९

रूपौ। महाँ इन्द्रो नृवदिति त्वानुकं यावि श्वासांजनिता रामती नामिति याज्या। ऐन्द्राग्निर्वैष्णवीभिश्चे
त्याद्यत्राप्यनुवर्तते। अतो हीनपादग्रहणमत्राक्षरलाघवार्थमेव न कृत्स्नसूक्तग्रहणार्थं।
तृतीयसवनमुत्तरोत्तरां संस्थामुपेयुरातिरात्रात्। तृतीयसवने यदि सोमोतिरिच्येत तदा उ
त्तरोत्तरां संस्थां कुर्युरातिरात्रात् एतदुक्तं भवति। यद्यग्निष्टोमे तृतीयसवनेतिरेकः स्यात्त
दोक्थ्यां कुर्युः। यद्युक्थ्ये षोडशिनं। यदि षोडशिन्यतिरात्रमिति यद्यतिरात्रे तर्हि वक्ष्यतीति। त्र५
एवं चेदातिरात्रादिति वचनमुत्तरोत्तरां संस्थामित्यत्र संनिहितार्थ क्वचित्स्त्रः संस्थागृह
तेइत्येवमर्थं इतरथाग्निष्टोमेतिरेके त्याग्निष्टोमः प्रसज्येत। षोडशिनि वाजपेये अ
तिरात्रे च तोर्यामित्येतन्निष्टत्यर्थं मातिरात्रादित्युक्तं। अतिरात्राद्र्ध्वं तत्तेअ[illegible]वि
ष्टनामप्रतद्विष्णुस्तवते[illegible]तिस्तोत्रियानुरूपौ। माध्यंदिने न शेषः॥ महाँ इन्द्रो नृवदि
त्यादि याज्यांतः शेष इष्यते। तेषामित्था समरणं शिमीवतोरिति याज्या। इयं वा याज्या माध्यंदि वा
वा· नेष्केष्मिवति। आग्निष्टोम वाजपेयाप्तोर्यामिषु तृतीयसवनेषु सोमातिरेके इदमेव शास्त्रं भवति।

स्य

श्रौ०सू०
१९०

सोमातिरेकादन्येन वा निमित्तेन शस्त्रांतरोत्कर्षे नयदि स्कत शस्त्रोपजननं स्यात्तदाप्यनेनै
व सोमातिरेकोक्तेनानुसवनं शस्त्राणि संपादनीयानि। स्तोत्रियस्तत एव तदनुसारेणानु
रूपः कल्पनीयः। एतच्च सोमातिरेके प्रातःसवने स्तिसोमद्रव्ये तावतैवास्यार्थस्य सिद्धत्वात्
शस्त्रोपजननं इत्यस्माद्वचनाल्लभ्यते। एतदुक्तं भवति। यत्र यत्र नैमित्तिकः शस्त्रोपजननः स्तत्रैत
च्चानुसवने मे तेन विधानेन शस्त्राणि कल्पनीयानि। स्तोत्रियानुरूपौ छंदोगप्रत्यय तदनुसार
कल्पनीयामिति। ७॥ क्रीते राजनि नष्टे दग्धे वा॥ प्रायश्चित्तं वक्ष्यत इति शेषः। नष्ट इत्युक्ते ना
शप्रकारविशेषाग्रहणात्सर्वप्रकारेण नाशो गृहीतो भवति किमर्थं दग्धवचनमिति। तस्य प्र
योजनमुच्यते। लता वस्थे सोमे द्वादशभ्यो वसाश्वकादिभ्यो मन्त्रेभ्यो न केशकीटादिनिर्दुष्टे त
स्यत्यागो न कर्तव्य इत्येवमर्थं। अन्यदपि दग्धवचनप्रयोजनमस्ति। केचिदेवं वदंति दग्धे सोमे तदेव
भस्माभिषुत्य तेन यष्टव्यमिति तन्निवृत्त्यर्थं चेति। सोमनाशे प्रायश्चित्तं वक्तुं प्राप्ते सदुक्तादी
नांशालानां दाहे प्रायश्चित्तस्याल्पत्वात्तदेव प्रसंगादाह। अपि दग्धानि सदो हविर्धानान्यनाहृता

राम
१७०

क्रियेरन्। अनाहृता अमंत्रकमित्यर्थः। आहृतानि वा। न्यायविकल्पोयं। शालाकृतावदृष्टार्थः तेनासु
मंत्रव्यापारः केवलमदृष्टार्थ एव तस्यादृष्टार्थस्याश्रयत्वात् शालाप्रधानसंबंधे द्वारभूते स्यर्थः। स्व
द्वारभावो दादाश्रागे वनिर्वृत्त इति न पुनः क्रियामंत्राणामिति एवं पक्षः। उत्तरस्कपक्षो यत्कार्यार्थिय
इस्त्रपादीवानि सर्वाणि तेषु तस्य तत्कार्यजनने सामर्थ्यजननाय मंत्रादयः संस्काराः प्रयुज्यंते। त
द्यदि स्वकार्यमकृत्वैव नश्येत्तदा तस्य कथं प्रधानेन संबध्यादिति पुनरपि मंत्राः प्रयोक्तव्या
इति सिद्धं। इदानीं सोमनाशे प्रायश्चित्तमाह। अन्यं राजानमभिषुणुयुः। अन्यं राजानमानीय त
मभिषुत्य तेन यजेतेत्यर्थः। अनधिगमे पूतीकान्फाल्गुनानि॥ सोमानधिगमे पूतीकान्फाल्गु
नानि च संसृष्टान्यभिषुणुयुः। पूतीका नाम लतारूपाः सोमसदृशाः फाल्गुनानि नाम स्तंब
रूपा ओषधिविशेषाः। अप्रसिद्धाः पदार्थाः अभियुक्तेभ्यः शिक्षितव्याः। अन्या वा ओषधयः पू
तीकैः सह। फाल्गुनानामभावे अन्या वा ओषधयः कुशादर्भाद्याः पूतीकैर्मिश्रयित्वाभिषोतव्याः। अन्या
ओषधयः पूतीकैः सहेति पूतीकानां स्थायित्वदर्शनात्सर्वसूत्रोक्तानामेभिः सहितानामेव प्रतिनि

धित्वमवगम्यते। अतएवाचार्यः सोमप्रतिनिधौ न केवलमेकद्रव्यमिच्छति। अन्यावाओषधयःप्र
तीकैरिति सहभावेनिर्देशात्। तस्मादेतिवचनेन तद्रूपप्रतिप्रतीकानामपि भावेद्रव्यांतराणि सहमिश्र
यितान्यभिषुत्य तेर्यष्टव्यमिति। प्रायश्चित्तं वाप्युत्तरत्र वक्ष्यते। उत्तरसमत्त्वस्य सुत्याविषयत्वादिदं दी
क्षोपसद्विषयं भवति। दीक्षासु क्रीतोनष्टोदासोमलाभाद्दीक्षावर्धयेत्। उपसत्सूपसदो वर्धये
त्तत्र सर्वत्र प्रधानकालाविरोधेनादवर्धनं कर्तव्यं। अदवर्धने क्रियमाणेपि प्रधानकालाविरो
धेनालभ्यमाने प्रतिनिधिमुपादायदेवकल्पितकाले प्रधानयागं संपादयेत्। इत्थं वा कुर्यात्।
प्रायश्चित्तं तूत्तरत्र प्रयोगं विसृज्य सोमं संपाद्यतस्मादेवकर्मणि प्रयोगांतरमारभेत। सुत्यादेती
दं प्रायश्चित्तमिष्यते। अथवात्याम वरुणपांशास्त्रांतरे प्रायश्चित्तविशेषोक्तिर्वेलकर्तव्यो। सत्यास
क्रमेवमन्येत। सुत्यासु नष्टेराजनि तदलाभेतत्क्रमेव। प्रतिनिधिप्रयोगमेवेत्यर्थः। तत्कर्तव्यत्वेनम
न्यतेत्यर्थः। नात्रादवृद्धिप्रयोगत्यागौ वा कर्तव्य इत्यर्थः। प्रातिधुक्षमानः सवने। प्रातिधुगिति सद्योदुग्ध
पयउच्यते। तस्मात्तः सवने प्रतिनिधिद्रव्यमभिषुत्य तद्रसेनमिश्रयेदित्यर्थः। शृतंमाध्यंदिने। क्षीरं

शृतंपयःशृतमित्युच्यते। तेनमध्यंदिने प्रतिनिधिद्रव्यरसंश्रीणीयात्। दधितृतीयसवने। सर्वविन्मि
श्रयेदित्यर्थः। श्रायंतीयं ब्रह्मसामयदि फाल्गुनानिवारवंतीयं यज्ञायज्ञीयस्य स्थाने। यदिफा
ल्गुनानि प्रतिनिधित्वेन प्रविष्टानि तदैतस्मिन्। श्रायंतीयवारवंतीये ब्रह्मसामाग्निष्टोमसामका
र्ययोर्भवतो यथासंख्येन। श्रायंतीयमेके। एके शाखिनः श्रायंतीयं यज्ञायज्ञीयस्य कार्यं भवतीत्याहुः।
ब्रह्मसामप्रकृत्यैवेति। एकदाक्षिणं यज्ञं संस्थाप्योदवसाय पुनर्यजेत। एवं प्रतिनिधिनाक्रियमा
णं यज्ञप्रयोगमुदवसानीयापर्यंतं समाप्य तस्माद्देशादुदवसाय सोमं संपाद्य तमेव यज्ञं पुनः प्रयुं
जीत। तस्मिन्पूर्वस्य दक्षिणा दद्यात्। पुनः प्रयोगे तां दक्षिणां दद्यात् यत्संख्याकाः पूर्वस्मिन्प्रयोगे सं
कल्पिताः स्युस्तत्संख्याका एव दद्यात् न वैकल्पिकसंख्यांतरयुक्ता इत्यर्थः। पूर्वस्मिन्प्रयोगे एकैव गौर्द
क्षिणा। सोमाधिगमे प्रकृत्या। यद्यपाते पि प्रतिनिधौ यागात्प्रागयदि सोमो लभ्येत तदा प्रतिनिधि
द्रव्यं त्यक्त्वा सोमेनैव यष्टव्यं। प्रतिनिधिनिमित्तानि सोमक्रयणानि च न भवंति। एतच्चैकाहेषु। अ
हर्गणेषु तंत्रमध्ये उदवसाय पुनर्यागो न शक्यते कर्तुमिति। सर्वाहः साधारणत्वात्प्रयोगस्य।

श्रौ॰ सू॰
१७२

यदा पुनरहर्गणेषु सुत्यासु भिन्नवा प्रतिनिधिनैवैकमहः क्रियते। तदा सत्रप्रयोगं समाप्य तदवसाय
तदेवाहः पुनः प्रयुंजीरन्। सत्रिणः संदत्ता एवं तदर्थमेव यज्ञं संस्थाप्येति यज्ञग्रहणं कृतं। तस्याय
मभिप्रायः। आरब्धो योयज्ञः फलसाधनं तस्य प्रयोगं समाप्ये तत्कर्तव्यं। नावांतरमेकस्याहः प्रयो
गमिति। एकाहेषु प्रतिनिधावुपात्ते प्रतिनिधिनैवेच्छा पुनर्यष्टव्यमेव॥ ५॥ दीक्षितानामुपतापे परि
हिते प्रातरनुवाके नुपाकृते वा पुष्टिपते पुष्टिपत्रस्तु षेत्र स्तुः प्राणाय प्राणं [illegible] मनेमानं वाचे
वाचमस्मै पुनर्दद्धि स्वाहेति ब्रह्माहुतिं हुत्वा शीतोष्णा आपः समानीयैकविंशतिमासु यवान्कुश
रद्भि पिंजूलांश्चावधाय ताभिरैरवार्थं कुर्वीत तानि रेइन माप्लावयेज्जीवानाम स्थाता ऋइममसुं जी
वयत जीविकानाम स्थाता ऋइममसुं जीवयत संजीविका नाम स्थाता ऋइममसुं जीवयत संजीवि
का नाम स्थाता ऋइममसुं संजीवयत संजीविकानाम स्थाता ऋइममसुं संजीवयतेत्योषधि
सूक्तेन च। दीक्षितानां मध्ये यः कश्चिद्दीक्षित उपतप्येद्व्याधिपीडित इत्यर्थः। तत्र नैमित्तिकमुच्यते। परिहि राम
ते प्रातरनुवाके प्रागेवापोनप्त्रीयारंभादेतस्मिन्काले अनुपाकृते वा प्रातरनुवाके एतयोरन्य १७२

तरस्मिन्काले पुष्टिपत इत्यनेन ब्रह्माहुतिं हुत्वा शीतोष्णा आपो मिश्रयित्वा तास्वेकविंशतिं यवान्प्र
क्षिप्य एकविंशतिकुशपिंजूलांश्चाधाय। आप्लाव्यानुमंत्रयेत। आसिक्तमुपतप्तं दीक्षितमाप्लावयेत्स्नापयेत्।
जीवानाम स्थातेत्येवमादिभिश्चतुर्भिर्मंत्रैर्याश्चौषधीः प्रथमजाता इत्यनेन सूक्तेन च सर्वेषां मंत्राणा
मंते सकृदेवप्लावनं कर्तव्यं न प्रतिमंत्रं। एतत्सर्वं ब्रह्मणा कर्तव्यं। अस्य सत्रस्य मध्ये ताभिरद्भिरव
स र्थं कुर्वीत। तत्कर्म तदोषधिसूक्तेन च वै स्मातु परिहाद् इष्टव्यं। तत्र ब्रह्मणः कर्तृत्वाभावात्। अस्यायम
र्थः। तानि रेवाद्भिरुपतप्तस्यावमनकर्मुदक कार्यं शौचादिकर्तव्यमिति। तस्य कर्तृत्वाथास्त्वयमेवाश्च
कावन्यो यः कश्चन परिवारकः। अत्रो नात्र ब्रह्मा नियम्य तद्ग्रूलकर्षोंकुरएव। आप्लावने प्रकृते आप्लाव्यानुमं
पाप्लवोत्तिवचनामाप्लावनानुमार्जनयोः समानकर्तृकत्वसिध्यर्थं। तेनैतदपि ब्रह्मैव करोति। उपां जेत।
श्वंतर्यामौ तेप्राणापानौ पातामसावुपशुसवनस्त्वा व्यानं पातु सावैंद्रवायवस्त्वा वाचं पातु सौ मैत्रा
वरुणस्त्वा चक्षुषी पातु सावाश्विनस्त्वा श्रोत्रं पातु सावाग्रयणस्त्वा दक्षिणाकर्त पातु सावुक्थ्यस्त्वांगानि
पातु सौ ध्रुवस्त्वायुः पातु सावितिं॥ उपांश्वंतर्यामावित्यादिभिरष्टभिर्मंत्रैरनुमंत्रयेत। आसावि

तस्यस्थानेउपतप्तस्यनामसंबुध्यागदंदीयात्।प्रथमेननासिकामनुमृजेत्।द्वितीयेनसर्वं
शरीरं।सर्वशरीरव्यापिलाद्यानस्य।यस्यमंत्रस्यस्थानविशेषोलिंगेनावगतः तेनतदेवानुमृजे
त्।अन्येनसर्वशरीरं।यथासनमुपरिक्रमणं।उपतप्तस्यैतस्मिन्कर्मणि[illegible]कृतेततः स
वेदीक्षितायथासमासनमुपरिक्रमेयुर्गच्छेयुरित्यर्थः।अतोवगम्यतेपूर्वस्मिन्कर्मणिक्रियमाणे
सर्वेदीक्षिताआसनासदनतत्रैवासतइति।ज्ञातारमिंद्रमवितारमिंद्रमितितास्यादिः।इयमृक्
तार्क्ष्यस्याद्यान्नवति।अनयासहतत्कर्मविन्निमित्तेतार्क्ष्यकार्यंकरोति।यद्यप्यन्यदेकाहिका
द्वैधदेवंस्वस्त्यात्रेयनिविदंदध्यात्।यद्यप्यानोभद्रीयादैकाहिकार्यत्तस्मिंनदनिवैश्वदेवस् द
केनवतीतिनिविद्धानीयंतदातदुक्स्वस्तिस्वस्त्यात्रेयेतदुचेनिविदंदध्यात्।स्वस्त्यात्रेयशब्देनल
क्षणयात्रगृह्यतेतृचस्यैवान्यत्रप्रवृत्तिदर्शनात्।स्वस्त्यात्रेयस्यनिविद्धानत्वेनविधानात्तस्मिन्नद याम
निष्ठर्वस्यनिविद्धानस्योद्धारोभवति।प्रकृत्यागदे।अगदेव्याध्यपगमइत्यर्थः।तदानेमेविकाराःक १०२
र्तव्याइत्यर्थः।।।।संस्थितेतीर्थेननिर्हृत्यावभृथेप्रेतालंकारान्कुर्वंति।संस्थितेमृतइत्यर्थः।त

स्मिन्नुपतप्तेमृतेतमतीर्थेननिर्हृत्यनिर्गमय्यावभृथार्थंसंकल्पितेदेशेनिधायप्रेतालंकारान्कुर्वंति
येलोकेप्रेतस्यैतेलंकाराइतिप्रसिद्धास्तेप्रेतालंकारास्तैरलंकुर्युरित्यर्थः।अत्रकिंचित्संस्थितेऽती
र्थेनेतिपदच्छेदः।निर्हृत्यावभृथेऽवभृथार्थोदेशआवभृथस्तस्येदमित्यण्।अथवाऽवभृथ
इत्येवपदच्छेदेसतिअवभृथशब्दस्तदर्थेदेशेलक्षणयावर्त्तते।केशश्मश्रुलोमनखानिवापयंति।प्रे
तस्यकेशादीनांवापनंकर्तव्यं।नलदेनानुलिंपंति।नलदोनामद्रव्यविशेषः।सर्वाभियुक्तेभ्यःक्षी
रिन्वयःतत्कृतेनानुलेपनेनानुलिंपंति।नलदमालांप्रतिमुंचंति।मालाचनलदकृतास्यप्रतिमो
क्तव्याः।निष्पुरीषमेकेकृत्वापृषदाज्यंपूरयंति।प्रेतस्यशरीरेयान्यंत्राणितानिनिष्पुरीषाणिकृ
त्वापृषदाज्येनपूरयितव्यानि।पुनःशरीरेबंधयितव्यानीतिमन्यंतेकेचिच्छाखिनः।अहतस्यवाससःपा
शतःपादमात्रमवछिद्यप्रोर्णुवंतिप्रत्यग्दशेनाविःपादं।अहतमनिवसितंवाससोवयनारंभदेशः
पाशइत्युच्यतेसमाप्तिप्रदेशोदशा।पाशप्रदेशेपादमात्रमपच्छिद्यतत्पादमात्रमवछेदंनिधायतेन
वाससाप्रत्यग्दशेनप्राकृशिरसंप्रेतमाविष्पादंप्रोर्णुवंतीत्यर्थः।अवछेदंमस्यपुत्राअमाकुर्वी

श्रौ॰सू॰

१०८ रन्। तद्वच्छेदं प्रेतस्य पुत्रा अमात्या वा कुर्वीरन् स्त्री कुर्यादित्यर्थः। अग्नीनस्य समारोप्य दक्षिणतो ब-
हिर्वेदि दहेयुः। अस्य प्रेतस्य अग्नीनुद्धृत्य अरण्योः समारोप्य देवयजनस्य दक्षिणतो बहिर्वेदि प्रे-
तमानीयाग्निं मथित्वा विहृत्य तत्रैव दहेयुः दहनविधिनैव। आहार्येणानाहिताग्निं। योनाहिता-
ग्निः सत्री भवति तस्मिन्मृते अयं विशेषः आहार्येणाग्निना तं दहेयुः। आहार्यशब्देनौपासनमुच्यते।
पत्नी च दीक्षिता तस्य पत्नी यदि म्रियेत तां चाहार्येणैव दहेयुः। आहार्यशब्देनात्र लौकिकोप्युच्यते।
अत्रायं विशेषः। येनाहिताग्निना सर्वाधानं कृतं तस्य पत्नी लौकिकेन। यस्यौपासनमस्ति तस्य प-
त्नी औपासनेन। अतोवगम्यते। आहार्यशब्देन श्रौतोग्निर्लक्ष्यत इति। प्रत्येत्याहुः समापयेयुः प्र-
त्येत्य दहनदेशाद्यत्सर्वं परीभूतमहस्तत्समापयेयुरित्यर्थः। प्रातरनन्यासमनन्तरं निर्दिष्टं कर्माणि श-
स्त्रानुवचनानि इष्टवनसंस्तवनानि॥ यस्मिन्नहनि दीक्षितं दहनं कृतं। तस्मात्परमनन्तरमहः प्रा-
त्रि तरित्युच्यते। तस्मिन्नहनि शस्त्रादीन्यभ्यासौ हिंकारवर्जितानि न कुर्युः। तत्रापि ... वे आद्यां सर्वमि- राम
वाभि हिंकारो नास्ति। आद्ये च शस्त्रे। तत्राभ्यासमात्रस्यैव निषेधः। एवमन्यत्र यथासंभवं निषेधः क- १०८

ल्पनीयः। पुरायद्ग्रहणात्तीर्थेन निष्क्रम्य त्रिः प्रसव्यमायतनं परीत्य पत्सु पविशंति। तस्मिन्नेव आतुरन-
न्यासमित्युक्तलक्षणे दहनि शस्त्रादीन्यभ्यासादि हिंकारवर्जितानि न कुर्युः। उर्ध्वं णा यागे वतीर्थेन यह२
निष्क्रम्य त्रिः प्रसव्यमप्रदक्षिणं श्मशानायतनं परि ... यतनं परिक्रम्य पविशंति। पश्चाद्धो-
ता। श्मशानायतनादिति विशेषः। उत्तरो धर्मः। तस्य पश्चाच्छंदोगाः। तस्य ग्रहणमध्वर्युरिव पश्चाच्छंदोगा उ-
पविशंति। नायतनस्येत्येवमर्थं। ब्रह्मणो दक्षिणत इति सिद्धत्वान्नोक्तं। आयं गौः पृश्निरक्रमीदित्युपां-
शु स्तुवते। आस्तुतश्छंदोगा उपांशु स्तुवते। स्तुते होता प्रसव्यमायतनं परिव्रजेत्सा त्रियमनुद्रवेत् प-
णुवन्। होता अप्रणुवन् स्तुते छंदोगैस्त्रिः प्रसव्यं श्मशानायतनं परितो व्रजन् स्तोत्रियमनुद्रवेत्। व-
क्ष्यमाणोत्र स्वरः। उपांशुस्तुवत इति स्तुवतोपांशुत्वविधानं होतुरनुद्रवणेप्युपांशुत्वप्रापणा-
र्थं। स्तोत्रियवचनमृगुपलक्षणार्थं। यास्तुवते ता अनुब्रूयादिति। शंसत्यादिचोदनाभावाद्
वसामिधेनीधर्माभावे सिद्धे पुनः स्तोत्रियग्रहणं संबंधाच्छस्त्रधर्मप्राप्त्याशंका स्यात्तन्निवृत्त्यर्थं।
प्रणवप्रतिषेधः। अथैनदनुद्रवणं किंरूपमिति। अनुमंत्रणमिति ब्रूयात्। प्रेतस्याभिधानमत्र वि

श्रौ·सू·
१७५

कीर्ष्यति। नच मंत्रलिंगादवगतं। यामीषु स्पष्टमेवैतत्। सार्पराज्ञीषु चानयैव दिशा प्रेताभिधानं कल्प
नीयं अत्र च ब्रूयादिति वक्ष्ये अनुद्रवे दिशमनुवाक्संबंधाज्ज्ञायते अनुमंत्रणप्रकारोयमिति। तथा
च वक्ष्यति। तं दह्यमानमनुमंत्रयत इति। ते नानुमंत्रणधर्मा एवामु कर्तव्याः। यामीश्च तासु इमास्त्रितथा
भूतेन रक्ष्याः। यमेन यमाय नैश्चैताः चोदिताः। सूक्तं तु यमदृष्टं तेनैतायाम्य इत्युच्यते। न यमदे
वत्या इति। प्रेहि प्रेहि पथिभिः पूर्व्येभिरिति पंचानां तृतीयमुद्धरेत्। मैनमग्ने विदहो माभिशोच इ
ति षट्। प्रवाले तथा वयमु प्रविह्वानि तिवतस्रः उपसर्प मातरं भूमिमेतामिति वतस्रः सोमएके
भ्यः। इदं सूक्तं। उरूणसावसुतृपा उडुंबलौ इति च। समाप्य संचित्य तीर्थेन प्रपाद्य यथासनमा
सादयेयुः। एतदनुद्रवणं समाप्यानंतरमस्थिसंचयनं कृत्वा तमस्थिकुंभं तीर्थेन प्रवेश्य यदप्यभ्र
वस्य पूर्वमासनस्थानं तत्रास्थिकुंभमासादयेयुरित्यर्थः। भक्षेषु प्राणभक्षाभयित्वा दक्षिणेन मा
वा र्जालीयेन निनयेयुः। दक्षिणस्यां दिशि श्रोण्यां अत्र वा निनयेयु[illegible]र्मार्जालीये वा निनयेयुरिति राम
प्रदर्शनार्थं। द्रवं निनयेयुरितरत्प्रक्षिपेयुरित्यर्थः। सप्तदशामद्भिर्विति त्रिवृतः पवमानाः रथंतरए १७५

स्तोमाग्निष्टोमः। यस्मिन्नहनि दीक्षितः प्रमीयते तदहरु के न प्रकारेण समाप्य तदनंतरं सप्तदशास्तो
मं त्रिवृत्पवमानकं रथंतरपृष्ठमग्निष्टोमसंस्थं महरंतरं दीक्षितमरणनिमित्तं सत्रमध्ये सत्रिभिः क
र्तव्यं। संस्थितेवभृथमेकेग्रामयंत्येतस्यैतदहरभिवाचयंतः। एतस्मिन्नहनि समाप्ते एतान्यस्थीन्यवभृ
थकाले अवभृथार्थं संकल्पितास्त्रकुंभेन सह प्रक्षिपेयुः एतस्य प्रेतस्यैतदहरिति वदंतः। सर्वे सत्रि
ण इति सूत्रार्थः। एके संस्थित इत्यस्येदं प्रयोजनं संस्थिते तीर्थेनित्यारभ्य एतकेन प्रकारेण एतदंतं कर्म
दीक्षितमरणनिमित्तं सत्रिभिः कर्त्तव्यं। अतः परं प्रेतसंबंधो नास्तीत्येके आचार्या मन्यंते। तेनातः स्य
परं सत्रिणः सत्रमेव समाप्य यथेष्टं गच्छेयुः। निर्मथ्येनवा दग्ध्वानिन्वाय संवत्सरादेनमग्निष्टो
मेन याजयेयुः। इदानीं दहनादारभ्य पक्षांतरमुच्यते। इतेष्वग्नयः पूर्ववदेवानुगताः एवतिष्ठंति।
स्व योररण्योः मंथने नाग्निं समुत्पाद्य तेन पूर्वोक्तदेशे पात्रचयनवर्जं दग्ध्वास्थीनि संचिता
नि निरवायाविकृतं सत्रं समाप्य सत्रसमापनकालादारभ्य संवत्सरे पूर्णे तान्यस्थीन्यादाय
तानि यजमानं कृत्वाग्निष्टोमेन प्रातरभ्यासमित्येवमादि विशेषणविशिष्टेन याजयेयुः। तए ये२

श्रौ॰ सू॰
१९६

वसत्रिणाहुत्यय म परः पक्षः ।अस्मिंन्पक्षे पूर्वस्मिंश्च पक्षे सत्रसमापने मृतपुत्रपत्न्यादय
वसमापयेयुः नेदीक्षितं वादीक्षयेयुः ।शेषसमापनेमृतस्य संस्थापरणार्थं मृतस्य संनिकृष्टं
दीक्षयित्वा सत्रसमापनं कुर्युः ।निर्मथ्य दहनपक्षेनेदिष्ठप्रवेशो मत्यप्य स्थिवशानि स्याएव ।अ
पिवालानेगृहपतौ गृहपतौ मृते तदहः अहूतं समाप्यावभृथं कृत्वा सद्यः सोदहनं कृत्वा सत्राद
त्थानं भवति न पुनः शेषं समापयेयुरित्यर्थः ।नकेनकृतः शास्त्रविकारः ।यः संवत्सरे स्थितयज्ञान्यस्मिं
श्चाहनि गृहपतिर्म्रियेत तयोः शास्त्रविकारस्त्वक्तः ।अनभ्यासमित्यादयो येविकारास्तेक्तास्तेतवोर्द
योरपि भवन्तीत्यर्थः ।एकाहेषु यजमानासनेशयीत ।एकाहेषु यजमानः स्वेषु यस्मिन्नासन आस्ते
मृतोपितत्रैव शायीत यावत्स एकाहः परिसमाप्यते ।मृते पितस्मिंनासने स्थे तदहः परिसमापनं कुर्यु
रित्यर्थः ।संस्थितेपायतीश्चवभृथं गमयेयुरित्यालेखनः ।तस्मिन्नहनि संस्थिते अवभृथकाले अु
पायती घपगर्त्तीखुवहंती स्थितियर्थः ।तास्व स्वकश्यं कर्मकृत्वातं प्रेतं तत्र प्रक्षिपेयुरित्यर्थः । राम
एवमालेखन आचार्य आह ।एर्णसिदोदहेयुरित्याश्मरथ्यः ।तस्मिन्नहनि समाप्तेवभृथकाले पूर्वेण १९६
वै

सदोयोदेशास्तस्मिन्देशेतंप्रेतं सर्वैर्यज्ञपात्रैः सह तैरेवाग्निभिर्दहेयुरित्याश्मरथ्य आह ।एषएवावभृ
थः ।अस्मिन्पक्षेऽन्योवभृथोन कर्तव्यः ।एषएवावभृथोभवेत्प्रेतदहनमेभिरग्निभिर्यज्ञसाधनैश्च
स्मिन्देशेदहनेन समापनमिति ॥१०॥ अग्निष्टोमोत्यग्निष्टोम उक्थ्यः षोडशी वाजपेयोतिरात्रोप्तो
र्याम इति संस्थाः ।अत्यग्निष्टोमोनाम संस्थाविशेषः ।अग्निष्टोमे राजन्यस्य षोडशिनं गृह्णीयादिति व स्य
चनादाग्निमारुतादूर्ध्वं षोडशिग्रहस्य स्तोत्रशस्त्रे यदा भवतस्तदासोत्यग्निष्टोम इत्युच्यते ।वाजपेया
प्तोर्यामौवक्ष्यते ।इतरेऽप्रचैवोक्ताः ।सोमयागोत्र प्रकृतस्तेन तस्यैते संस्थाविशेषाः सर्वे सोमयागाः ।
संस्थया सप्तविधा एवेत्यर्थः ।तासां यामुपयंति तस्यामंते यज्ञपुच्छं ।तासां संस्थानामध्ये यां संस्था
मुपयंति कुर्वंति तस्यामंते यज्ञपुच्छं नाम वक्ष्यमाणं कर्म कर्तव्यं ।एवं स्थिते यां कांचित्संस्थां प्रकल्प्य
प्रवृत्तानां संस्थां लोभेनकुत्वाल्लस्त्रादधिकैर्निमित्तवशेन शास्त्रांतरमापद्यते यदा तदांतन्त्रिमिवल्वा न
तत्संस्थांते व सामर्स्थाविपरिणामत इति ।तस्मादेवशास्त्रादूर्ध्वं यज्ञपुच्छनाम कर्म कर्तव्यमित्येवमर्थं
तासां यामुपयंति तस्यामंते इत्युक्तं ।अनुयाजाद्युक्तं प्रभृतानां न्यासकाल ।तदिदं यज्ञपुच्छमुच्यते ।

अनूयाजादिशंयुवाकपर्यंतं पशौ यदुक्तं तद्यदिह कर्त्तव्यं। उत्तमस्त्विदमसूक्तवाकप्रैष इति प्रैष
विशेषविधानादेव पाशुकमेवात्र तंत्रं भवति नेष्टिकं। अतः पशुनैवास्येदं प्रयोजनं पशौ यदु
ह्यासनं दक्षिणातआहवनीयस्य तदत्र कर्त्तव्यमिति। तेनानुयाजादौ भनोतादौ चैवं भवति पशु
आशंयुवाकादि ति ४ पुरोडाशोऽसदस्येवासीनेतिसिद्धं। आशंयुवाकात्पाशुकं कर्त्तव्यं नोर्ध्वमित्येवमर्थं। उत्तमस्त्वि
दमसूक्तवाकप्रैषः। प्रैषसमाम्नाये द्वौ सूक्तवाकप्रैषावाम्नातौ तयोरुत्तरइत्यर्थः। अवीवृधत
पशुदेवतां ५ इति पुरोडाशदेवतां। अवीवृधतेति पुरोडाशदेवतां पशुदेवतां चेत्यध्याहर्त्तव्यं। अस्मिन्सूक्तवाकप्रै
षे अवीवृधत पुरोडाशैरित्याम्नातं। तत्र पशुदेवता अग्निं पुरोळाशानां देवता इंद्र इत्युद्दिष्टदेवते
सन्निहिते तत्रावीवृधतेत्येकवचनांतं यदेकां देवतामभिधत्ते। पुरोळाशैरिति बहुवचनं केवलप
शुदेवताभिधानेन घटते केवलेंद्राभिधाने च प्रकृतिप्राप्तं पशुदेवताभिधानं न कृतं स्यात। अतः
संनिधानाविशेषादुभे अपि देवते अभिधत्ते। तंत्रेणेति मन्यमानः पुरोळाशदेवतां पशुदेवताभि राम
त्युक्तवानाचार्यः। एवं सति पुरोळाशैरिति बहुवचनं पुरोळाशानां धानादिपंचकं चाभिप्रेत्योपपं १९७

न्नं भवति। एवं सति अक्रियामेकेऽन्यत्र तदर्थवादवदनादिति पशुपुरोळाशाकरणे यस्य पशुदेवता
नभिधानमस्मिन्मंत्रे हेतुत्वेनोपवर्णितं। तदपि परिहृतं भवति। तेन पशुपुरोडाशश्च कर्त्तव्यो भव
ति। अवीवृधत पुरोळाशैरित्येवास्मिन्मंत्रे वक्तव्यं भवतीति सिद्धं। एके यदि सवनीयस्य पशोः प
शुपुरोळाशं कुर्युरवीवृधेतां पुरोळाशैरित्येव ब्रूयात। मंत्रस्याद्रुतिरिति वाऽस्यत्नोषः। अक्रियामेक
इत्येके आचार्याः पशुपुरोळाशाक्रियामुक्त्वा तु सूत्र एवार्चे क इति प्रसवं तिष्ठंते। तएव माहुः। यदि सव
नीयस्य पशोः पशुपुरोडाशः क्रियेत तदा द्वयोर्देवतयोः पुरोडाशेन वर्धने कर्त्तव्ये अवीवृधेतां पुरो
डाशैरिति द्वयोरभिधानाय मंत्रो ब्रूयान्न तथा ब्रवीति। अतः पुरोडाशदेवतैवात्राभिधीयते न पशु
देवता अतस्तस्या अनभिधानात्पशुपुरोडाशस्याक्रियैवेत्येके आहु[illegible]रित्यर्थः। एवमेकीयपक्षमु
पन्यस्यात्मीयपक्षेऽभिधाननिर्वाहमुपपादयति। सवनीयेनैवं द्वौ वर्धति पशुपुरोळाशेन पशु
देवता। अवीवृधतेति देवतायागसंबंध उच्यते। स चोभयोरविशिष्टः संनिधानं चाविशिष्टमस्मि
न्मंत्रे तथा दर्शनात। एवं सत्येकवचनस्याविवक्षितत्वादुभयोरभिधानमेवं युक्तं नैकस्याएवेति। अस्मि

श्रौ॰ सू॰
१८

न्नुपपन्ने पुरोडाशौ वौरितीदमप्यनयैव दिशा घटत इत्युक्तं । सवनीयैरेवेंद्रो वर्धते । पशुपुरोडाशेन पशुदे
वतेति । ऊर्ध्वं ग्रावस्तुवाक्याद्धारियोजनः । ग्रावस्तुवाक्कालस्य व्यातिदेशः प्रयुक्तो हारियोजन उच्यमानस्तस्मा
दूर्ध्वमेव भवति । तत्किमूर्ध्ववचनेन तस्येदं प्रयोजनं तृतीयसवनं तावच्छस्त्रांतमेव । यत्पुनः शास्त्रा
दूर्ध्वमनुयाजादि ग्रावस्तुवाक्यांतं तदेष्टिकत्वाद्गुत्तमस्वरेण भवति । तस्मादूर्ध्वं यत्सोमिकं तत्र स्वरविधा
नाभावादनियतस्वरं भवतीति । तस्य स्वरविधानार्थमूर्ध्ववचनं । ग्रावस्तुवाक्शब्देनात्र ग्रावस्तुत
कस्वर उच्यते । स चोत्तमः तेनायमर्थः । तेनाद्गुत्तमस्वरेण हारियोजनः प्रयोक्तव्य इति । अपाः
सोममस्तमिंद्र प्रयाहि धानाः सोमानामिंद्राद्धि च पिब वसुन्नमिति ब्रह्मणा के चिना दनीइति ।
हारियोजनस्यानुवाक्याप्रैषयाज्याः । इज्यानुवाक्ये अंत्येष्वहस्सु । एते याज्यानुवाक्ये अहर्गणे
षु यान्यंत्यान्यहानि तेषु भवतः । अंत्यवदेकाह इति न्यायादेकाहेष्वपि भवतः । तिभ्यासुकं मघव
न्नापनामोऽयं यज्ञो देवया अयं मियेध इतीतरेषु । अहर्गणेषु वीर्येभ्यो यानीतराणि तेष्वेते भ राम
वतः । अनंत्येष्वित्यर्थः । पनायादिम मघवं न्तान याहीति वानुवाक्यो तेरवत्स्वहस्सु । हारियोज १८

हा
नविषयत्वादस्य विधेरहः शब्देनात्र सुत्याहान्येवोच्यंते । तेन सारस्वतसत्रादिषु यानि सुत्यान्यसोत्या
त्यादीनि रूपरेवंति तेष्वनंत्येष्वियमनुवाक्या भवति । तिभ्यासुकमिति वा । अयं यज्ञ इत्येषैव याज्या ।
अनुवषट्कृतेति प्रैषं मैत्रावरुण आह इदं मद इव मघवंन्निहते अइति । हारियोजनाधिकारात्तस्यै
वानुवषट्कारात्प्रयोगे वातिप्रैषनामकं मिदं मद इत्यादिकं प्रैषं मैत्रावरुण आह । मैत्रावरुणग्रहणम
नुवषट्कृत इति वचनाद्धोतुः प्राप्तिर्माकानिवृत्त्यर्थं । आहेति वचनं जपादिवद्ध्वादित्यर्थं । अस्य
तु विषयं वक्ष्यति । तायमानरूपाणां प्रथमादहः प्रवर्त्तेतैत्यासाति प्रैषाविति । अगत्यतिरात्रे । अति
रात्रे कृतो वक्ष्यमाणः षः ग्राहस्यस्थाने अयमप्याहः कर्त्तव्यः । समर्थनिगमत्वात्तदेवोहे प्राप्ते पुनर्वचन
मस्य प्रैषस्यादर्गणेष्वनंत्यादर्थं तयोरुत्पत्ते रहर्गणानां च द्वादशाहप्रकृतित्वा द्वादशाहस्य
चातिरात्रादित्वात्तत्प्रभृतित्वादस्य प्रवृत्तेः सैवास्य प्रकृतिरिति कृत्वानूहं मन्यमानस्योत्तर
मथेत्यति रात्र इति । अयमभिप्रायः । सत्यं द्वादशाहेनात्यान्यहान्यस्य प्रकृतिरिति । किंतु तेष्वे
व यस्मिन्नहनि प्रकृतित्वेन गृह्यते स्य मंत्रस्य यथार्थमभिधानं संभवति तदेवास्य प्रकृतिरिति

ण्यो ब्राह्मणे २

श्रौ·सू·
१८८ कृत्वातिरात्र इह एव तु कुर्यादिति। अथ चतुःसुत्यामिति च॥ इदमपि सर्ववेदे वदृष्टव्यं। तस्यां तृतीयसुत्यामाग्नीध्रः श्वः
सुत्यां प्राह श्वः सुत्यां वा एषां ब्राह्मणानां तामिंद्राग्निभ्यां प्रब्रवीमि मित्रावरुणाभ्यां वसुभ्यो रुद्रे
भ्य आदित्येभ्यो विश्वेभ्यो देवेभ्यः सोम्येभ्यः सोमपेभ्यो ब्रह्मन्वाचं यच्छेति। अतिप्रैषस्यांते माग्नीध्रः
कं श्वः सुत्यासंशंश्वः सुत्यां वा एषामिति एतं मंत्रं प्राह। आह हेतेनावं नैव जपादिषट्कवा
वृत्यां पांशुलेखि दे निवृत्ते प्रकर्षवचनादुत्तम एवात्र स्वरो भवति तस्यां तृतीयवचनम
ति प्रैषः श्वःसुत्ययोः संबंधकरणार्थं तेन तस्मिन्नति प्रैषे येत्यूहविधिः श्वःसुत्यां मंत्रे पि न भव
ति। श्वःसुत्यामंत्रे पि ब्रह्मेति वचनाद्युत्तमस्वरो विदितः सोति प्रैषे विभक्तः॥ अनुवषट्कारा
त्वागिंसयमपि श्वःसुत्यां मंत्रे पि भवति उपांशुत्व याद्यतो स्यां हारियोजनां तन्नाविमंद्रादीना
य मर्थिंनियमं व्यावृत्त उत्तमस्वरं नियमंतीति अयमप्युच्यते तु॥ ११॥ आह तमुन्नेता द्रोणकल
शामिळामिव प्रतिगृह्योपहवमिष्ट्वा वेक्षेत॥ उन्नेता हतमुन्नेतरूप ह्वयस्वेत्युक्त्वा वेक्षेत तूष्णीं। राम १८८
द्रोणकलशस्थं सोमं। हरिवतस्ते हारियोजनस्य हुतस्य सोमस्य शस्तो क्थस्य ... यजुषा योगजसो
अ

धाइयं विप्रो वाचमर्चेन्निपवं नू। अयकस्य चिद्रुहता दनीके सोमो राजा न सखार्यं रिषे २

गोसनि रश्वसनि स्तस्य त उपहूत स्योपहूतो भक्षयामीति प्राणभक्षं भक्षयित्वा प्रतिप्रदाय द्रोणकल
शमात्मानमाप्याय्य ... प्रस्तृमं विनिःसृप्याग्नीध्रीये विनिःसृप्याऊतीजु ह्वत्य यंपीत इंदुरिंद्रं मदे धार
स्वाहा। इदं राधो अग्निनादत्तं मागाद्यशो भर्गः सह ओजो बलं चादीर्घायुत्वाय चातशारदाय प्रति
गृभ्णामि मह्द ते वीर्याय स्वाहेति। हरिवत इति प्राणभक्षमंत्रः। आत्मा प्यायनं सुखं हृदयानि मंत्रानि
मंत्राभ्यां। यथाप्रस्तृप्तमिति योयेन पथा सदो हविर्धाने वा प्रस्तृप्तः स तेन विनिःसृप्येत्यर्थः। विनिःसृप्या
हुतीरिति होमयोर्नाम। अयं पीत इदं राध इति होममंत्रौ। आहवनीये षड्यृचा क्रत्व्यन्यादधा
ति देवकृतस्यैनसोवयजनमसि स्वाहा पितृकृतस्यैनसोवयजनमसि स्वाहा मनुष्यकृतस्यै
नसो वयजनमसि स्वाहा आत्मकृतस्यैनसो वयजनमसि स्वाहा एनस एनसो वयजनमसि स्वा
हाय होदेवाश्चकृमजिह्वया गुरुविंतिच॥ आहवनीयवचनं आग्नीध्रीयाधिकारात्। शाकलाभ्याधानं
पंचजिर्यज्ञुर्भिरिकयर्चा॥ द्रोणकलशाद्धानागृहीत्वा वेश्येन्वा परिस्थामा ... रयतप्रजया च धनेन
च। इंदुस्त्वं कामदुघास्त्वका मान्मे धुक्ष्व प्रजां च पशूंश्चेति आद्यर्याः इत्यवेक्षणमंत्रः। अथवा प्र

वेनिगमोवेक्षणार्थः। उत्तरोवघ्राणार्थैरिति। अवघ्रातः परिधिदेशे निवपेयुः। तस्मिन्नवघ्राय ताधोना
अंतः परिधिदेशेनिवपेयुः। अत्रदेशाग्रहणात्परिध्यभावेपिसदेशोगृह्यते। प्रत्येत तीर्थदेशेनासणा
श्चमसास्तान्सव्यावृतोव्रजंति। आहवनीयदेशात्सर्वदक्षिणावृतः प्रत्येत्याग्नीध्रीयंगच्छेयुः। विनिः
स्तप्राकुलिप्रभृतिएतावत्सर्वैः कर्त्तव्यंसर्वेप्याग्नीध्रीयदेशंगच्छन्तुतेषुयेचमसिनस्तेसव्यावृतोन्हत्वाति
र्थदेशेचमसानङ्गिःपूर्णानिधर्मुभिःस्थापितानुजयेयुर्हरितनतृणानिविमृज्यप्रतिस्वंचमसेभ्य
स्त्रिः प्रसव्यमुदकेनात्मनः पर्युक्षंतेदक्षिणेः पाणिभिः। तोश्चमसाञ्जलिलाहरितत्तृणान्याईहृणा
नीत्यर्थः। तानिचहरवर्जालीयानिशास्त्रांतरेविशेषदर्शनात्। तानितृणानिनिधायस्वेस्वेचमसे
तरामुक्षिप्यसर्वेचमसिनः स्वात्स्वाच्चमसाद्दूर्वारसमुकाखपोगृहीत्वाताभिरद्भिःस्वंस्वमात्मा
नंदक्षिणैः पाणिभिरप्रदक्षिणंपर्युक्षंतेदक्षिणाग्रहणपाणीश्चमसेष्विसत्रसव्याधिकारनिवृत्य
र्थं। इतरेषांप्रदक्षिणं। सव्यैर्वापाणिभिःप्रदक्षिणंपर्युक्षंते। स्वधापितृस्वधापितामहायस्वधाप्रपि राम
तामहायेति। एतेत्रयः पर्युक्षणमंत्राः। उक्तंजीवमृतेभ्यः। पिंडदानेयदुक्तंविधानंतदत्रापिप्रत्येतव्यं। २००

तत्रशुक्रयाज्यावेभ्यइतकपायांतरमक्तिअत्रोपायांतरस्यासंभवाद्यस्ययेनास्त्रयोनवेयुःसएवप
र्युक्षणंकुर्यान्नान्यः। तद्दृडंमन्यत्सर्वेकुर्युः। पाणीश्चमसेष्ववधायाभुभूतस्यदेवसोमतेमतिविदो
नृभिःस्तुतस्यस्तुतस्तोमस्यशस्तोक्थस्येष्टयजुषोयोनक्षागोसानिरवधसनिस्तस्यतउपहृत
उपहृतस्योपहूतोभक्षयामीतिप्राणाभक्षंभक्षयित्वामादृप्रजांपरासिचमित्येतेनाभ्यात्मंनिना
याछायंवोमरुतःश्लोकएत्वित्येतयाभिमृशंति। चमसिनः स्वेस्वेचमसेस्वंस्वंदक्षिणंपाणिमवधा
यततः स्वस्वचमसाद्दूर्वारसयुतावपआदायावैप्रत्यप्नुधतस्येतिमंत्रेण। ततोमादृप्रजामि जि
त्यनेनात्मंस्वचमसस्थाअपोभूमौनिषिंचेयुः। एतेनेतिवचनमनुष्टुप्सुद्वारेपिअस्याअनुष्टुप्नोदु त्रो
ह्वारार्थो। ततोछायंवइत्येतयर्चाचमसस्थाअपोभूमौनिषिक्ताअभिमृशंति। दधिक्राव्णोअकारि
षमित्याग्नीध्रीयेदधिद्रप्सान्प्राश्ययसरव्यानिविसर्जनउन्नाकवीयुवानासत्याधर्मणास्यती।
परिसत्यस्यधर्मणाविसरव्यानिसृजामहइति। दधिक्राव्णाइत्येतयाग्नीध्रीयेदधिद्रप्सान्प्रा
श्नीयुःसयजमानाः सर्वर्त्विजः। ततःसरव्यविसर्जनमपिकुर्युः। उन्नाकवीइतिमंत्रेणासरव्यविस

उर्निंनाम तानूनप्त्राग्निमुद्दिनाद्येतावंतं कालं सखित्वेन वर्त्तितव्यं। तत्स खिल्वस्मिन्काले विस
र्जनीयमित्यर्थः। तच्च परस्परं हस्तसंस्पर्शनेन विसर्जनीयं॥१२॥ पत्नीसंयाजेश्चरित्वावभृ
थं व्रजंति। यथाप्रसृप्तमित्यचोदाद्युषेत्यनेन होता होमार्थं निःसर्पति स इदानीं वेदं गृह्णाति ततः प
त्नीसंयाजेश्चरित्वा पत्न्यै वेदप्रदानादि प्रणीतापात्रनिनयनांतं कर्मकृत्वैव वेदस्तरणं कृत्वा अकृत्वा वा ७४
प्रायश्चित्तानि कुर्यात्। इतरेरन्वारब्धः। ततो हृदयशूलोद्वासनमत्रैव कर्त्तव्यं। यद्यनूबंध्या
पशुर्न करिष्यते तदा हृदशूलोद्वासनं पशुकर्हेभिरेव कर्त्तव्यं। तत्र संस्थाजपमेवावस्थाप्यावभृथदे
शं परिव्रजंति। व्रजंतः साम्नो निधनमुपयंति। साम पंचनिधनं कृतं स्यात्तन्निधनमित्युच्यते
तदवभृथो गच्छंतोऽभ्युपयुरित्यर्थः। तत्स्वर्त्विजामेतत्कार्यं। अवभृथं यास्यातिष्ठंतश्चरंति। अवभृथेष्टि
र्नाम्यजले क्रियते। तयातिष्ठंतश्चरेयुः। प्रयाजाद्यनूयाजांतानां स्यामिळान बर्हिष्मंतौ प्रयाजानु
याजौ। अप्सुमंतौ। आज्यभागौ अग्नवत इत्यर्थः। गायत्रौ॥ गायत्रौ चैतौ भवतः। सन्नंनेदकरणं यत्र -नाम
यत्राप्सुमंतौ तत्र तत्र गायत्रौ भवत इत्येवमर्थः। वारुणं हविः। हविर्ग्रहणं हविर्दोषे सति यागावसरे पुन २०१

हविरे र्वोत्पाद्ययष्टव्यं। न पुनराज्येनैवेष्टव्यमित्येवमर्थः। अवतेहेळो वरुण नमोभिरिति द्वे। अग्नी
वरुणौ स्विष्टकृदर्थौ। स्विष्टकृदर्थ इति स्विष्टकृद्यागे अग्नीवरुणौ देवता भवत इत्यर्थः। तेन स्विष्ट
ग कृत्स्थाने न प्रयोक्तव्यः। अत्रानिर्देशात्सर्वादग्नीवरुणाविति आदिश्यस्त्वं न इत्याद्यायष्टव्यं। त्वन्नो अग्ने
वरुणस्य विद्वानिति द्वे। संस्थितायां पादावुदकांते वदधुर्नमो वरुणायाभिष्ठितो वरुणस्य पाश इति।
संस्थितायामवभृथेष्टौ सर्वेस्मदीयानमो वरुणायेत्यनेन मंत्रेण पादप्रक्षेपणान्यादधुरुदकांते वदध्युः।
उदकांते तीरसमीपवर्त्तिन्युदक इत्यर्थः। संस्थितवचनमवधानादीनामिष्टिसंबंधित्वज्ञापना
र्थं। तेनेष्टेरक्रियापक्षे अवधानादयोपि न भवंति। ततआसीमंति न कस्यावभृथोसि नक्षित
स्यावभृथोसि नक्षकृतस्यावभृथोसीति। तत इति पूर्वेणोदं संबद्धमिति दर्शयति। आचामंति अपः
पिबंतीत्यर्थः। त्रिस्त्रिर्मंत्रैः पिबंति। सर्वत्र शौचार्थमाचमनं कर्त्तव्यं। प्रोथ्य प्रथमेन प्रस्तीर्वंति
प्रगिरंत्युत्तराभ्यां। तेषु पानेषु विशेष उच्यते। प्रथमेन पीताश्च अपः प्रोथ्य प्रस्तीर्वंति प्रोथनमिति
उत्तरास्य शोधनार्थः क्रियाविशेष उच्यते। तं कृत्वा निष्ठीवेयुरित्यर्थः। उत्तराभ्यां प्रोथ्य प्रगिरं
पीताः

अदीक्षिता अभ्युक्षेरन्नेव नाप्लवेरन्। अपि शब्दात् प्लवनमप्यनुकृष्यते। अस्य चाव धारणासंबंधो भवति। तेनायमर्थः॥ ५

ति। आचमनविधानादेव प्रगिरंतीति सिद्धे पुनः प्रगिरंतीति वचनमत्रापि प्रोक्षणप्राप्त्यर्थं। त
त इति आचमनात्पूर्वं तआपो अस्मान्मातरः शुंधयंत्विदमापः प्रवहत स्मुमित्यादि आपयो यथयः सं
लिति। नतइतिपूर्वं तत्पदार्थसंबंधार्थं आचमेतिवचनं गौणार्थमाचमनेकृते पुनराप्लवनांगमाच
मनं कृत्वाप्लवेरन्नित्येवमर्थं। स्नानमाप्लवनमित्युच्यते। तदेभिर्मंत्रैः कुर्युरित्यर्थः। एतयावृताभ्यु
क्षेरन्नवाप्यदीक्षिताः। अनयावृताएभिर्मंत्रैरित्यर्थः। एतयावृता अदीक्षिता अभ्युक्षेरन्नेव
नाप्लवेरन्नेव वेत्येवं विकल्पो भवति॥ उन्नेतैनानुन्नयति। उन्नेता स्वशास्त्रोक्तविधिना सर्वा
नुदकादुत्तारयति। उन्नेतैव स्वो अमुं नयान इत्युन्नीयमानाञ्जपति। उन्नेत्रा उन्नीयमाना उन्ने
तारित्येतं मंत्रं जपति। उद्वयं तमसस्परीत्युदेत्य। ब्रुयुरिति शेषः। उदेत्योदकादुत्तीर्येत्यर्थः। इय
मप्यृङ् मंत्रसंज्ञा भवति। तेनोपांशुप्रयोक्तव्या लिंगादेवकल्पकारः कल्प्यो। समानमतऊर्ध्वं हृ
दयशूलेनासंस्थाजपात्। अस्यायं च ऊर्ध्वं कर्तव्यं तद्धृदयशूलोद्वासनेन समानं भवति। अ ग
त्र हृदयशूलोद्वासनाभावादनुमंत्रणमपासु पेक्ष्य श्रीनिं संस्पर्शनपरिहारार्थमयं तु भवत्यादक २०२

ऽऽईयोन्नेत ५
नो

र्तव्यां अनवेक्षमाणा इत्यादयः सर्वैः कर्तव्याः समिदाधानांताः पदार्थाः। आसंस्थाजपादिति वचनं
हृदयशूलोद्वासनेन संस्थाजपस्य संबंधज्ञानात्तस्यापि प्रापणार्थं। संस्थाजपेनोपतिष्ठंते ये
ये पद्वत्तकर्माणः। अवधानादय एते पदार्थाः सर्वैरस्मदीयैः कर्तव्याः। संस्थाजपस्तु पद्वत्तकर्म
भिरेव कर्तव्य इत्येवमर्थं वचनं। इदं चान्यत्प्रयोजनं मपद्वत्तकर्माणः संस्थाजपं कुर्युरिति संस्था
जपस्य कर्तृसंबंधं ब्रुवन्कर्तृद्वारेण प्रयोगांगत्वमस्य दर्शयति। तेन सोमप्रयोगे यत्कर्तृसंबंधि
सोमप्रयोगावयवः सति च तेनस्यैव संस्थाजपो भवति। तेन दीक्षणीयादिषु संस्थाजपस्य प्रसं
ग एव नास्तीति सिद्धं॥ १२॥ गार्हपत्यमुदयनीययाभ्वरंति। गार्हपत्ये शालामुखीय इत्यर्थः।
सह्युत्तरवेदिप्रणयनादूर्ध्वं सोमस्य गार्हपत्यो भवति वचनाद्धृतः प्रणयति गार्हपत्य इति। उद स
यनीयया नामेष्टिः। तस्याः शालामुखीय एवाहवनीयो भवति प्रायणीययोक्तो॥ प्राय इत्यर्थं
प्रायणीययाऽस्या वैलक्षण्यप्रदर्शनार्थं। तत्र वैलक्षण्यं त्रामुवंताक्तं संस्था वेत्येवमा
दि तस्या अधर्युप्रत्ययत्वान्नास्माभिर्निश्चीयते। शनैस्तारामित्येष स्वरो विज्ञानाति दिश्यते अ

बधिरत्वरत्वात्तस्य पदार्थस्य धर्मोऽतिदेशेन प्राप्यते। नावधिधर्म इति। पथ्यास्वस्ति इति होतमाज्य
हविषी। सर्वसाम्येविशेषउच्यते। तत्र चतस्त्रआज्यहविषो देवताः अदितिः पंचमी चरुहविः।
पथ्यास्वस्तिस्तत्र प्रथमाइ हृचतुर्थाभवतीत्यर्थः। विपरीताश्च याज्यानुवाक्याः। तत्र याया याज्या सेह
नुवाक्या तत्र या नुवाक्या सेह याज्या भवतीत्यर्थः। ते चैव कुर्युर्य प्रायणीयां। तत्र येकेन्तरिस्त्वए
वात्रनियम्यते। तत्र यदि प्रतिनिधिभूतः कुर्यात्तत्र वात्र कुर्यादित्यर्थः। प्रकृत्यासं याज्ये॥ विप
रीताश्च याज्यानुवाक्याइत्यस्य प्रतिप्रसवोयं। सौंस्थितायां मैत्रावरुण्यनूबंध्या। उदयनीयेष्टां
नाम ७ समाप्तायां मित्रावरुणदेवत्यानूबंध्यापशुःकर्त्तव्यः। सदस्येके। सपशुः सदस्यासीनैर्होत्रादिभिः
कर्त्तव्य इत्येक आहुः। अस्मिन्नपि पक्षे दंडप्रदानांतमुत्तरवेद्यामित्येके। उत्तरवेद्यामेके। एके
शालेवन्तउत्तरवेदिसमीपआसीनेरित्याहुः। हुतायां वपायां यथेकादशिन्यप्रतः हुता
ग्नीषोमीयेवपासंचरेणप्रविशेत्वा गार्हपत्यसत्वान्नेण पशुना चरन्ति। अनूबंध्यायां वपायां नाम
हुतायामिदं नैमित्तिककर्मोच्यते। यदि यस्मिन्कृत्वावग्नीषोमीयस्थाने सवनीयस्थाने वा २०२

पश्वेकादशिनी प्रयुक्तास्यात्तदातस्मिन्कृत्वावस्मिन्स्थाने ग्नीषोमीयेण संचरेण। अग्नीषोमी
यप्रणयनेयः संचरस्तेनेत्यर्थः। तेन संचरेण शालामुखीयं गत्वा तत्रत्वाष्ट्रेन त्वष्टृदेवत्येन
पशुना यजेयुरित्यर्थः। अंजनादि पर्यग्निकृत्वोत्सृजत्य पुनरायनाय। तं त्वाष्ट्रं पशुं यूपांजना
दि पर्यग्निकरणांतं कृत्वोत्सृजंति। अपुनरायनायअपुनरागमनायेत्यर्थः। तावानेवास्य प
शुयागो भवति नात ऊर्ध्वं कर्त्तव्यो भवतीत्यर्थः। यदि त्वध्वर्युरेवआज्येन समाप्नुयुस्तथैव होता
कुर्यात्। उक्तः पक्षउत्सर्गोनिरमोयमपरः पक्षउच्यते। यद्यध्वर्युरेव आज्येन तं पशुयागं समाप
येयुस्तदा होतापि तथा कुर्यात्। होत्रग्रहणं मैत्रावरुणस्यापि प्रदर्शनार्थं। तथैवेत्यस्य विवरणा
र्थमाह। संप्रैषवदादेशान्। आज्येन समापनेऽनेके पक्षाः संभवंति। आज्येनाह्वेन संव्यवहार
मात्रं कृत्वा पशुवदेव क्रियत इत्येकः पक्षः। संव्यवहारोपि पशुशब्देनेत्यपरः। इष्टिवदेवाज्येन
त्वाष्ट्रयाग इत्ययमप्यपरः पक्षः। इष्टिपक्षेपि वपापुरोडाशादिस्थानेषु त्रिःकृत्वः क्रियत इत्यप
रः पक्षः। यद्यन्यथापि कुर्युस्तस्य तस्यानुगुणमादेशान्समदीयाः कुर्युरित्यर्थः। पशुन्निपातान्।

न्ब्रूयान्। एतदुक्तं भवति। यथा यथा ध्वर्यवः तं संप्रैषेषु देवतादेशाः आदेशाश्च कृताः तद्देवद्व्यदेवतानामादे

निपातानामेवं प्रकाराः मेदउद्धृतं पार्श्वतः श्रोणितं इति ये पशुसमवेताभिधायिनो द्रव्यांतरसमवेता
भिधायिनो वामंत्रमध्ये निपातितास्ते निपाता उच्यंते। तानाज्येन क्रियमाणे पशुसंस्क्रियायां पशुवदेव ब्रू
यादित्यर्थः। यद्यनूबंध्ये पशुपुरोडाशमनु देविकाहवींषि निर्वपेयुर्धातानुमती राका सिनीवा
ली कुहूः। यद्यत्र देविका हवींष्यनुनिर्वपेयुरन्वायातयेयुरित्यर्थः। तदा ... दयः पंचदेवता यष्टव्याः। धात्री४
ते याग देविका इत्युच्यंते। स्रुक्ष्णो नोपदेशाद्याम्नायात्यत्वं स्पष्टयति। धाता ददातु दाशुषे प्राचीं जीवातु
मक्षितां वयं देवस्य धीमहि सुमतिं वाजिनीवतः। धाता प्रजाया उत राय ईशे धातेदं विश्वं भुवनं ज
जान। धाता कृष्टीरनिमिषाभिचष्टे धात्र इद्धव्यं घृतवज्जुहोतेति॥ धात्रुरिह देवाम्नातेऽतरेषामहस्य दे
शान्यायेनान्वेषणीयाः। दैवीनां चैता यदेता गृष्टा गौः पृथिवी। एषां च यं वानां दैव्य इति समाख्या यद्दे
ता अन्वाया तयेयुस्तदेता देवता न वंतीति। स्मतु रथिनं भागादीति द्वे आद्यं तनोषिर विमिभिरा
वहती पाष्या वार्यापिनता अवरिपुककाटो अकृतेनता नशांति न दभाति तस्करो बलित्था राम
पर्वतानां दृन्हाविधा वनस्पतीन्। मर्यस्यचातुर्मास्यैर्योगहीतव्येश्राज्यानुवाक्ये। पशुला नेपयस्या २०४

मैत्रावरुण्यनूबंध्यास्थाने। अनूबंध्यायाः पशुद्वयालाभे मैत्रावरुणीयपयस्या कर्तव्या देवताभि
निर्देशाः प्रकृतायाएवानुबंध्यायाः पशुलाभेन पयस्या कर्तव्या नान्यासामनूबंध्यानामन्यासामनू
बंध्यानामयं पक्षो नास्तीत्यर्थः। स्थानग्रहणांतकार्यकरीयं पयस्या न पशुलाभेने मित्ति कं कर्मांतर
मिति प्रदर्शनार्थं। आज्यभाग प्रभृति वाजिनांता एषा पयस्यैतदादि रेतदंता भवति। बंधुप्रयया
दन्यथा वा भवति। कर्मिणो वाजिनं भक्षयेयुः। उत्तरविवक्षार्थमेतत्। सर्वे तु दीक्षिताः। सत्त्रविषयेय
जमानत्वात्सर्वे भक्षयेयुः। सर्वे तु दीक्षितोत्थिताः पृथगग्नीन्समारोप्योदमदेवयजनान्यथितोद
वसानीययायजंते। तु शब्दो विशेषविध्यर्थः। तेनास्मिन्सत्त्रे यद्यमस्ति सामान्यतो विशेषतश्च। सा
मान्यतस्ता... वद्दयमर्थः। प्रकृते न ज्योतिष्टोमे माख्ये न सोमेन यजमानो दीक्षणीयया दीक्षा प्रवि
ष्टः सत्सोमेनेष्ट्वा अवभृथे दीक्षोन्मोचनं कृत्वा तस्मादुत्थित एवानूबंध्यां तं प्रयोगं समाप्य तदंते
२ ग्नी नैष्णाः समारोप्य उदमदेवयजनाद्योदेशात्तस्मिन्नग्नीन्मथित्वोदवसानीयया यजेते तैत्ये कार्थः।
अपरस्तु यदि सवे दीक्षिता स्युः सत्त्रं चेदित्यर्थः। दीक्षिता उत्थिता इति यावत् कर्तव्यः। समास पावे

र्थस्य दुर्गमत्वात्। यदि सर्वेषां। सितास्तु तत्र [illegible] तंधर्म तं [illegible] कृत्वा सर्वेषां [illegible] नवनीत
स्येधेवानृणा। [illegible] पुरुषकृत मारोप्य तर्व दग्धयित्वा [illegible] दव सानीय [illegible] र्थ [illegible] लि
त्रेषलोर्थः। मथनस्यार्थ सिद्धे इ [illegible] मथन वचनेन तदानीमेव मथित्वा [illegible] दव सानीयात्
न [illegible] वमर्थं जे नोदव सानीया सो मांगे नव नितानामित्यर्थः [illegible] स्यामि [illegible]
नरि सम्भावायां तत्र [illegible] तथमिति सिद्धं भवति। [illegible] प्रायश्चित्तानि [illegible]
[illegible] सर्व मच्छन वतः सं [illegible] [illegible] सेयमुदव सानं [illegible]
भवति। [illegible] धेये [illegible] [illegible] र्थः॥ किंवा विछ [illegible]
करोत [illegible] तरादिना केवलम [illegible] [illegible] वाक्यार्था [illegible]
तेनास्य दित्यर्थः॥१४॥ ॥इत्या [illegible] ध्यायः समाप्तः॥
[illegible] लिखितं मया॥ यदि [illegible] मम दोषो न दीयते॥ शु॥ ॥
॥शु॥ ॥शु॥ ॥शु॥ ॥शु॥ ॥शु॥ ॥शु॥ ॥शु॥ ॥शु॥ ॥शु॥ ॥शु॥ ॥शु॥